शास्त्रसंदेश-३१

# स्तोत्रसंदेशमाला

## कल्याणक–छायापूर्तिस्तोत्राणि



मुनि विनयरक्षितविजयजी म.सा.

शास्त्रसंदेश-३१

# स्तोत्र संदेशमाला-५

## कल्याणक-पादपूर्तिस्तोत्राणि

: સંપાદક - સંકલન :

પ.પૂ.આચાર્ય ભ.શ્રીમદ્

વિજય રામચન્દ્રસૂરીશ્વરજીના સામ્રાજ્યવર્તી

પૂ.આ.શ્રી બોધિરત્નસૂરીશ્વરજી મ.સા.ના

શિષ્યરત્ન

પૂ.મુ.શ્રી વિનયરક્ષિતવિજયજી મ.સા.

પ્રકાશક-પ્રાપ્તિ સ્થાન

शास्त्रसंदेश

C/o અસલ, ૩, મણિભદ્ર એપાર્ટમેન્ટ,

આરાધના ભવન માર્ગ, સુભાષચોક, ગોપીપુરા-સુરત-૧

**સ્તોત્ર સંદેશમાલા-૫**

कल्याणक-पादपूर्तिस्तोत्राणि

આવૃત્તિ : પ્રથમ, વિ.સં. ૨૦૭૮, મૌન એકાદશી,
તા. ૧૪-૧૨-૨૦૨૧

પેજ : ૧૨ + ૨૪૬ + ૬

સ્તોત્ર : ૫૫ શ્લોક : ૧૫૬૮

**: પ્રમાર્જના :**

પૂ.આ.શ્રી **દીવ્યકીર્તિસૂરિશ્વરજી** મ.સા.

પૂ.પં.શ્રી **શ્રુતતિલકવિજયજીગણી**

પૂ.મુ.શ્રી **હિતરક્ષિતવિજયજી** મ.સા.

પૂ.મુ.શ્રી **વિરતેન્દ્રવિજયજી** મ.સા.

પૂ.મુ.શ્રી **કિરતેન્દ્રવિજયજી** મ.સા.

**: છંદ-સંયોજના :**

પૂ.સા.શ્રી **ભવ્યરત્નાશ્રીજી** મ.સા.ના શિષ્યા

પૂ.સા. શ્રી **પુણ્યરત્નાશ્રીજી** મ.સા.

ટાઈપ સેટીંગ : શ્રી સાંઈ કોમ્પ્યુટર્સ-નિતિનભાઈ, અમદાવાદ.

મુદ્રક : બાલારામ ઓફસેટ-અમદાવાદ.

વિશેષ નોંધ : સ્તોત્ર સંદેશમાલાના ૨૦ ભાગનું સંપૂર્ણ પ્રકાશન જ્ઞાનદ્રવ્યના વ્યયથી કરવામાં આવેલ છે. ગૃહસ્થવર્ગે મૂલ્ય આપી ઉપયોગ કરવો.

આભાર...!　　અનુમોદનીય...!　　અનુકરણીય...!

## સ્તોત્ર સંદેશમાલાના
## ભાગ ૫ ના
## દ્રવ્ય લાભાર્થી

## શ્રી નગીનદાસ પૌષધશાળા
## પાટણ

આપશ્રીએ જ્ઞાનદ્રવ્યથી કરેલી
શ્રુતભક્તિની
અમો હાર્દિક અનુમોદના કરીએ છીએ.
ટ્રસ્ટીગણ તથા કાર્યકરોના
અમો આભારી છીએ.

*શાસ્ત્રસંદેશ, સુરત*





**સ્તોત્ર સંદેશમાલાના ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોનો સંપૂર્ણ સમાવેશ કરવામાં આવેલ છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) જૈન સ્તોત્ર સંચય-૧, ૨, ૩ - આ. માણિક્યસાગરસૂરિ
(૨) જૈન સ્તોત્ર સંચય-૪, ૫ - મુનિ લાભસાગરગણિ
(૩) જૈન સ્તોત્રાવલી - મુનિ લાભસાગરગણિ
(૪) જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - મુનિ ચતુરવિજયજી
(૫) સ્તોત્ર સમુચ્ચય-મુનિ ચતુરવિજયજી
(૬) શ્રી જૈન સ્તોત્ર સંગ્રહ ભાગ-૧,૨ - યશોવિજય જૈન ગ્રંથમાળા, બનારસ
(૭) શ્રી સ્તોત્ર રત્નાકર ભાગ ૧,૨ - યશોવિજય જૈન સંસ્કૃત પાઠશાળા, મહેસાણા
(૮) સ્વાધ્યાય દોહન - આ. કનકચન્દ્રસૂરિ
(૯) શ્રી નેમિનાથ સ્તોત્ર સંગ્રહ-મુનિ તીર્થભદ્ર વિ.ગણિ
(૧૦) સ્તોત્ર સંગ્રહ - મુનિ વૈરાગ્યરતિ વિ.ગણિ.
(૧૧) બૃહદ્-નિર્ગ્રન્થ-સ્તુતિ મણિમંજુષા-મધુસૂદન ઢાંકી - જિતેન્દ્ર શાહ
(૧૨) સંસ્કૃત પ્રાચીન સ્તવન સંદોહ-મુનિ વિશાલવિજયજી
(૧૩) વિવિધ તીર્થકલ્પ - મુનિ જિનવિજયજી
(૧૪) શ્રી જૈનસ્તોત્રકોશ - મુનિ ચંદ્રોદયવિજયજી સૂર્યોદયવિજયજી
(૧૪) શાસન પ્રભાવક આ. જિનપ્રભસૂરિ ઔર ઉનકા સાહિત્ય
(૧૫) અનુસંધાન ભાગ ૧ થી ૮૫ - આ. શીલચન્દ્રસૂરિ

(દરેક ભાગમાં આવતા પ્રાચીન અપ્રકાશિત સ્તોત્રો)

**સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં નીચે જણાવેલ પુસ્તકોમાંથી અમુક સ્તોત્રો લીધેલા છે. તેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.**

(૧) વિવિધ કલ્પ સંગ્રહ

(૨) નમસ્કાર સ્વાધ્યાય ભાગ ૧,૨, ૩

(૩) સરસ્વતી પ્રાસાદ

(૪) કાવ્ય સંગ્રહ ભાગ ૧,૨

(૫) વર્ધમાન વિદ્યાકલ્પ

(૬) વિધિ માર્ગપ્રપા

(૭) શ્રી વલ્લભીય લઘુકૃતિ સમુચ્ચય

(૮) સમયસુન્દર કૃતિ કુસુમાંજલી

(૯) ચતુર્વિંશતિ જિનેન્દ્ર સ્તવનાવલિ

(૧૦) શ્રી જિનવલ્લભસૂરિ ગ્રંથાવલિ

(૧૧) યુગાદિવંદના

(૧૨) શ્રી અજીતનાથ વંદનાવલી

(૧૩) શ્રી સંભવનાથ વંદનાવલી

(૧૪) શ્રી પ્રકરણ રત્નાકર ભાગ-૨

(૧૫) મહાકવિ શ્રી જયશેખરસૂરિ ભાગ-૨

(૧૬) શ્રી પાર્શ્વનાથ ઉપાસના

(૧૭) મહાપ્રભાવિક નવસ્મરણ

(૧૮) ભૈરવ પદ્માવતી કલ્પ

(૧૯) તુલસીપ્રજ્ઞા (પાર્શ્વ સ્તુતિ સંગ્રહ)

(૨૦) ધર્મવર્દ્ધન ગ્રન્થાવલી

(૨૧) બૃહત્ હ્રીંકારકલ્પ વિવરણ તથા વર્ધમાન વિદ્યા કલ્પ

(૨૨) શ્રી ઋષભ-વીરેશાદિ ચતુર્વિંશતિ જિન સ્તવનાવલી

(૨૩) મન્ત્ર કલ્પ સંગ્રહ

(૨૪) શ્રી જિનેન્દ્ર નમસ્કારાદિ સંગ્રહ

(૨૫) ગિરનાર ગ્રંથોની ગોદમાં

(૨૬) સૂરિમન્ત્ર સમુચ્ચય ભાગ-૧/૨

(૨૭) શ્રી જીરાવલા સ્તોત્રાદિ સંગ્રહ

(૨૮) સમ્બોધિ (ઈ.સ. ૨૦૧૪ સુધીના)

(૨૯) નિશ્રેયસમ્ ભાગ ૧ થી ૧૧

(૩૦) શ્રુતસાગર - કોબા

---

***આ સિવાયના પણ અનેક પુસ્તકોમાંથી સ્તોત્રો એકત્રિત કરવામાં આવેલ છે તે સર્વેના પૂર્વ પ્રકાશકોના અમો આભારી છીએ.***

---

સ્તોત્ર સંદેશમાલાના આ ૨૦ ભાગમાં એકત્રિત કરેલ સ્તોત્રોના પુસ્તકો માટે નીચે જણાવેલ જ્ઞાનભંડારોનો વિશેષ સહકાર મળેલ છે. તેના ટ્રસ્ટીગણ અને કાર્યકરોના અમો આભારી છીએ.

(૧) વિજયરામચન્દ્રસૂરીશ્વરજી આરાધના ભવન
ગોપીપુરા-સુરત

(૨) વિજય દાનસૂરીશ્વરજી જૈન જ્ઞાનભંડાર
ચંદનબાળા- મુંબઈ-૭

(૩) શ્રી રત્નત્રયી આરાધના ભવન - પાલડી - અમદાવાદ

(૪) શ્રી કૈલાસસાગરસૂરિ જ્ઞાનમંદિર - કોબા - અમદાવાદ

(૫) શ્રી ગીતાર્થ ગંગા- પાલડી - અમદાવાદ

(૬) શ્રી નેમિ-નંદન શતાબ્દિ ટ્રસ્ટ - પાલડી-અમદાવાદ

(૭) શ્રી શ્રુતઆનંદ ટ્રસ્ટ -પાલડી - અમદાવાદ

(૮) આ.શ્રી ૐકારસૂરિ જ્ઞાનમંદિર - સુરત

(૯) શ્રી હરિભદ્રસૂરિ શાસ્ત્રસંગ્રહ - સુરત

# પ્રકાશકીય...!

પૂર્વના પુણ્યવંતા મહાપુરુષોએ પ્રરૂપેલા પ્રકરણોની એક ગ્રંથમાળા એટલે શાસ્ત્રસંદેશમાલા, આજથી ૧૬ વર્ષ પૂર્વે ૪૦૬ પ્રકરણો ગ્રંથો ૨૦ ભાગમાં પ્રકાશિત કરેલ તે પછી ૧૧ વર્ષે પૂર્વે ૧૩૭ પ્રકરણ ગ્રંથો ચાર ભાગમાં તથા ૬૨૬ ગ્રંથોના ૧,૭૭,૦૦૦ શ્લોકો સમાવતા અકારાદિના ચાર ભાગ અને સંવેગરંગશાળા નામનો મહાનગ્રંથ પ્રકાશિત કરેલ અને આજે ૮૦ પ્રકરણ ગ્રંથો બે ભાગમાં પ્રકાશિત થઈ રહ્યા છે. એટલે આજ સુધીમાં ૬૨૩ પ્રકરણ ગ્રંથોના ટોટલ ૨૬ ભાગ અને અકારાદિ ચાર ભાગમાં સમાવિષ્ટ કરી પ્રકાશન કરવાનો લાભ અમોને મળેલ છે.

પ્રકરણોની સાથે સાથે પૂજ્યશ્રી સ્તોત્રો-સ્તુતિઓ પણ સંગ્રહિત કરી રહ્યા હતા તે પણ આજે ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨૦૦૦ થી અધિક સ્તુતિઓના ૨૦ ભાગ અમો પ્રકાશિત કરી રહ્યા છીએ.

જૈનશાસનમાં આજ સુધીમાં પ્રકાશિત થઈ બહાર પડેલ પ્રકરણ ગ્રંથો અને સ્તોત્રો-સ્તુતિઓ જે અલગ અલગ હતા તે બધા જ આજે હવે એક સાથે મળી રહેશે. આ

દ્વારા શ્રી ચતુર્વિધ સંઘની સેવાનો લાભ અમોને મળેલ છે તે માટે અમો ધન્યતા અનુભવીએ છીએ.

સંખ્યાની દષ્ટિએ અધધ... થઈ જાય તેવા ૬૨૩ પ્રકરણ ગ્રંથો ૬૨૬ + ૮૦ ગ્રંથોની અકારાદિ, ૨૨૦૦ થી અધિક સ્તોત્રો અને ૨000 થી અધિક સ્તુતિઓ પૂજ્યશ્રીએ સંકલન-સંપાદન કરી આપ્યા તે માટે અમો તેઓશ્રીના આભારી છીએ.

પૂર્વની જેમ આ ૨૦ + ૨ પુસ્તકો માટે પણ અલગ-અલગ સંઘોએ પોતાના જ્ઞાનદ્રવ્યમાંથી લાભ લીધેલ છે તે માટે પણ અમો તે તે સંઘ + ટ્રસ્ટીઓ + કાર્યકરોના પણ આભારી છીએ.

ટાઈપ સેટીંગ શ્રી સાંઈ કોમ્પ્યુટર્સવાળા નિતિનભાઈ તથા પ્રીન્ટીંગ બાઈન્ડીંગનું કાર્ય બાલારામ ઓફસેટવાળા રીતેશભાઈએ વિશેષ ખંત-કાળજીપૂર્વક કરી આપેલ છે.

**-શાસ્ત્રસંદેશ**

# अनुक्रमणिका


| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १ | गर्भावतीर्णं भववार्द्धितीर्णं, | पू.आ.श्री सोमसुन्दरसूरि | १ |
| २ | भुवनमोहनरूपसुसम्पदः, | पू.आ.श्री सोमसुन्दरसूरि | २ |
| ३ | स्तुवे चारुचारित्रमार्गं चरन्तं, | पू.आ.श्री सोमसुन्दरसूरि | ४ |
| ४ | केवलालोकसङ्क्रान्तविश्वत्रय- | पू.आ.श्री सोमसुन्दरसूरि | ६ |
| ५ | प्राप्तमुक्तिवनितामुखसङ्गं, | पू.आ.श्री सोमसुन्दरसूरि | १० |
| ६ | कल्याणकारीणि जिनेश्वराणां, | पू.आ.श्री सोमसुन्दरसूरि | ११ |
| ७ | यद्योगतः शम्भवतीर्थनाथः, | पू.आ.श्री सोमसुन्दरसूरि | १३ |
| ८ | जयश्रिये शास्वतशर्महेतवे | पू.आ. श्रीमुनिसुन्दरसूरि | २९ |
| ९ | निलिम्पलोकायितभूतलं श्रिया | पू.आ.श्री जिनप्रभसूरि | ३४ |
| १० | पद्मप्रभप्रभोर्जन्म गर्भाधानं च | पू.आ.श्री जिनप्रभसूरि | ३५ |
| ११ | प्रीतद्वात्रिंशदिन्द्रोदितवितत- | पू.आ.श्री जिनवल्लभसूरि | ३६ |
| १२ | पुरन्दरपुरस्पर्द्धि - वर्द्धितर्द्धि- | पू.आ.श्री जिनवल्लभसूरि | ३९ |
| १३ | गर्भावासनिवास जन्मसमया | मुनिप्रवरश्री विनयहंसगणि | ४० |
| १४ | विनम्र-देवाधिभुवः किरीट- | | ४२ |
| १५ | श्रीमल्लिजन्मव्रतकेवलानि तथा | | ४४ |
| १६ | नमिवि जिण ताण कित्तेमि | पू.आ.श्री सोमसूरि | ४६ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| १७ | सम्मं नमिऊण जिणे चउवीसं | पू.आ. श्री जिनवल्लभसूरि | ४९ |
| १८ | पणयसुरविसरसिरमउडम- | पू.आ.श्री जिनवल्लभसूरि | ५२ |
| १९ | इअ तीअवट्टमाणाणागयचउ- | | ५४ |
| २० | तित्थं पयवण सुयदेवयं च | | ५५ |
| २१ | उवसग्गहरं पासं, पासं वंदामि | पू.आ. श्री भद्रबाहुसूरि | ७० |
| २२ | उवसग्गहरं पासं, पासं वंदामि | पू.आ.श्री भद्रबाहुसूरि | ७० |
| २३ | उवसग्गहरं पासं, वंदिअ | पू.मु.श्री तेजसागर | ७४ |
| २४ | पणमिय सुरन(व)रपूइयपय- | पू.पं. श्री लक्ष्मीकल्लोलगणि | ७६ |
| २५ | अजिअं जिअ-सव्व-भयं, | पू.श्री नन्दिषेणमुनि | ७८ |
| २६ | शक्रः सहस्त्रनयनोऽपि गुणा- | पू.आ. श्री जिनदत्तसूरि | ८५ |
| २७ | सकलसुखनिवहदानाय सुर- | पू.आ.श्री जयशेखरसूरि | ८८ |
| २८ | अजितो जयदो जयाजितप्रभु- | मुनिप्रवरश्री विनयहंसगणि | ९१ |
| २९ | शिवसुखकारण ! भवनिस्तारण | पू.उपा.श्री गुणविजय | ९३ |
| ३० | सिरिजुअं जुअलं पणयं सया | पू.आ. श्री राजविजयसूरि | ९७ |
| ३१ | मेरुविजयविबुहाणं विबुहाणं | पू.मु. श्री लावण्यविजय | १०० |
| ३२ | सिरिरिसह-अजिअ-संभव- | | १०६ |
| ३३ | उल्लसिक्कमणक्खनिग्गयपहा- | पू. आ. श्री जिनवल्लभसूरि | १०८ |
| ३४ | गब्भअवयार सोहम्मसुरसामि- | पू.मु.श्री वीरगणि | १११ |
| ३५ | सकलार्थसिद्धिसाधन-हरिचन्द- | पू. बालकमुनिश्रीशान्तिचन्द | ११३ |
| ३६ | भक्तामर-प्रणत-मौलि-मणि- | पू.आ.श्री मानतुङ्गसूरि | ११९ |

| क्र.नं. | आद्यचरण | कर्ता | पेज नं. |
|---|---|---|---|
| ३७ | नम्रेन्द्रचन्द्र ! कृतभद्र ! जिनेन्द्र | पू.मु.श्री समयसुन्दरविजय | १२६ |
| ३८ | श्री'शान्ति'मङ्गिसमवायहितं | पू.श्री लक्ष्मीविमलमुनिवर्य | १३४ |
| ३९ | भक्तामर ! त्वदुपसेवन एव | पू.आ. श्री भावप्रभसूरि | १४२ |
| ४० | पादारविन्दमकरन्दरसैकलुब्ध- | पू.पं.श्री विनयलाभगणि | १५० |
| ४१ | राज्यर्द्धिवृद्धिभवनाद् भवने | पू. उपाध्यायश्री धर्मवर्धनगणि | १५८ |
| ४२ | भक्तामरभ्रमरविभ्रमवैभवेन, | पू. आ. श्री धर्मसिंहसूरि | १६६ |
| ४३ | भक्तामरस्तवनमध्यगतानि | महो.श्री हेमहंसगणि | १७३ |
| ४४ | नम्रदेवशिरोरत्न-भासकं | पू. मु. श्री रत्नमुनि | १८० |
| ४५ | कल्याण-मन्दिर-मुदार-मवद्य | पू.आ. श्री सिद्धसेनदिवाकर | १८४ |
| ४६ | कल्याणमन्दिरमिमं कुरु | पू.आ. श्री भावप्रभसूरि | १९२ |
| ४७ | कल्याणभाजनमघस्य विनाशहेतु | पू.मु.श्री कनकविलाशविजय | १९९ |
| ४८ | कल्याणकेलिनिलयं विलयं | | २०७ |
| ४९ | श्रेयोबीजमवद्यारी, प्रणिपत्या- | पू. मु. श्री रत्नमुनि | २१५ |
| ५० | श्रेयोमहोदयलतावनयौवनश्री- | पू.आ. श्री हेमविमलसूरि | २२० |
| ५१ | हर्षोत्कर्षप्रणम्रत्रिदशपति- | पू.मु.श्री विनयहंसविजयगणि | २२८ |
| ५२ | श्रीवामेयजिनं निरस्तवृजिनं | पू.मु.श्री विनयहंसगणि | २३२ |
| ५३ | श्रेयो दधानं कमलानिधानं | | २३६ |
| ५४ | कल्याणवल्लीवनवारिवाहं, श्रेयः | | २३९ |
| ५५ | स्वस्तिश्रीकीर्त्तिकान्तिप्रगुणगुण | पू.मु.श्री रामचन्द्रगणि | २४२ |

पू.आ.श्री सोमसुन्दरसूरिविरचितः

# १. ॥ श्रीच्यवनकल्याणकस्तवः ॥

(उपजाति)

गर्भावतीर्णं भववार्द्धितीर्णं, स्तुवे जिनेन्द्रं प्रणतामरेन्द्रम् ।
पापापनोदत्रिजगत्प्रमोद-हेतुं तमोहं गुरुभक्तितोऽहम् ॥ १

स्वद्धर्या त्रिलोक्यामपि निस्समाना-
द्दिवो विमानान् ननु नाथ ! तस्मात् ।
कथं महीयं न महीयसी स्यान् ?
निरस्य, यद्यां स्वयमाश्रयस्त्वम् ॥ २

मत्यादिकज्ञानवरत्रयर्द्धि-र्या यावती पूर्वभवे तवासीत् ।
गर्भागतस्यापि सहैव साऽऽगात्,
सौभाग्यभङ्गी तव काप्यपूर्वा ॥ ३

त्वय्यागते कुक्षिसरो मरालवत्, स्वप्नानपश्यज्जननी चतुर्दश ।
भावित्वदीयोरुगुणश्रियां किल,
स्वस्वानुरूपं दिशतः समुच्छ्रयम् ॥ ४

नानानिधानानि पदे पदेऽपि, प्रकाशयन् गर्भपदस्थितोऽपि ।
भृत्यादिकस्यापि न कस्य कस्य,
प्रमोदहेतुर्भगवन्नभूस्त्वम् ? ॥ ५

त्वां कुक्षिकोणे जननी दधाना, सौन्दर्यतेजःसुषमामवाप ।
यथैव बिभ्रत्यमलाऽभ्रमाला, स्वाभ्यन्तरे दीप्रसहस्ररश्मिम् ॥६

कथं स राजा त्रिजगज्जनानां, न श्लाघनीयोऽनघसर्वभावः ? ।
त्वं पूरको विश्वमनोराथानां, प्राप्तोऽवतारं जिन ! यस्य गेहे ॥७

महीगृहग्रामपुराकराद्यं, तद्वासवस्यापि न किं नमस्यम् ? ।
त्वयेश ! विश्वैकसुखाकरेण, निजावतारेण पवित्रितं यत् ॥ ८

इन्द्रादिदेवैर्महितः प्रमोदाद्, गर्भावतारोऽजनि ते यदाऽर्हन् ।
आविर्भवद्भूरिशुभानुभावा, भूरप्यभूद्देव ! तदैव सर्वा ॥ ९

इतिच्यवननामकं जिनवरेन्द्रकल्याणकं,
तव स्तवनगोचरं विनयभक्तिभावादहम् ।
नयन् न परमैहिकं किमपि नाथ ! नैवार्थये,
परं कुरु ममाक्षयं प्रवरबोधिलाभोदयम् ॥ (पृथ्वी) १०

पू.आ.श्री सोमसुन्दरसूरिविरचितः

## २. ॥ श्रीजन्मकल्याकस्तवः ॥

भुवनमोहनरूपसुसम्पदः, प्रणतवासवमौलिमिलत्पदः ।
जनिमहस्तवनेन तव प्रभो !,
सफलतां गमयामि निजां गिरम् ॥ (द्रुतविलम्बित) १

(वैतालीयम्)

तव जन्मनि चेतनावतां, कुतुकं किं यदि सम्मदः सताम् ।
चतुरङ्गुलकीमुदश्वसद्यदचैतन्यवती धरित्र्यपि ॥ २

समिरः सुखकृद्ववौ तदा, तरवः फेलुरकाल एव च ।
अभवंश्च दिशोऽतिनिर्मला-स्तव जन्माजनि भारते यदा ॥ ३

तव जन्मनि सृत्यऽगारतः, परितो योजनमानभूतले ।
वरगन्धजलाभिषेचनं, चेलक्नोपमरीरचन् सुराः ॥ ४

अभवद्दिवि दुन्दुभिध्वनिः सुमवृष्टिश्च जनुःक्षणे तव ।
समलाः सकला जलाशयाः, स्वापः प्रापुरतिप्रसन्नताम् ॥ ५

शिखिनोऽपि च दक्षिणार्चिषो,
निखिला जज्वलुरुज्ज्वलस्थिते ! ।
ऋतवश्च षडप्यवातरन्, वनदेशेषु विशेषतः स्वयम् ॥ ६

तव सूतिविधेर्विधायिकाः, पुरतश्चामरदीपधारिकाः ।
ददिरे जिन ! शान्तिकारिका,
न मुदं कस्य दिशां कुमारिकाः ? ॥ ७

सकले समकालमेव ते, जनुषि प्रादुरभून्महामहः ।
त्रिजगत्यथवाऽस्ति वास्तवं, न किमेकं चरितं तवाद्भुतम् ॥८

निजकुक्षिसुरत्नधारिकायै, जगदुद्योतकदीपदे ! नमस्ते ।
इति शंसति यां पुरा तुराषा-
डुपमेया तव केन सा प्रसूः स्यात् ? ॥ (औपच्छन्दसिक) ९

जनुषा तव ये पवित्रिता, दिनमासाऽयनहायनर्त्तवः ।
जगदेकजयावहा विभो ! सुखदास्तेऽद्य ममापि संस्मृताः ॥१०

ददृशेऽशनमम्बयापि ते, नहि नीहारविधिश्च जन्मतः ।
शुचिता भुवनेऽप्यनुत्तरा, यदहो ! स्तन्यमपीश ! नापिबः ॥११

(द्रुतविलम्बित)

तव जनुःसमये जिन ! नारकाः,.
अपि भवन्ति समे सुखिनः क्षणम् ।
तदपराऽसुमतां तु किमद्भुतं,
ननु सुखानुभवे भुवनेश्वर ! ॥ १२

तव जनुःस्वपनोदकपावितं दिविजराजसमाजकृतोत्सवम् ।
सुरगिरेः शिखरं जिन ! कस्य तन्,
न जनयेन्निजदर्शनवासनाम् ? ॥ १३

कनकरूप्यमणीगणवर्षणैः, सुरकृतैस्तव जन्मनि मोदतः ।
जनकराजगृहाङ्गणभूमिका-ऽभवदिह स्फुटरोहणभूरिव ॥ १४

वपुषि ते रुधिरामिषमुज्ज्वलं, जिन ! निकाममनामयवर्ष्मणः ।
श्वसितमप्यनुपाधिसुगन्धि यत्,
क इव वास्त्यपरोऽतिशयोऽमुतः ॥ १५

इतिजनुःसमयस्मृतिहेतवे, तव नवं स्तवनं जिन ! यः पठेत् ।
विगतविघ्नभरः प्रतिवासरं, स लभते वरमङ्गलमालिकाम् ॥१६

पू.आ.श्री सोमसुन्दरसूरिविरचितः

## ३. ॥ श्रीदीक्षाकल्याणकस्तवः ॥

(भुजङ्गप्रयातम्)

स्तुवे चारुचारित्रमार्गं चरन्तं,
जने सम्मदाद्वैतमुत्पादयन्तम् ।
महेन्द्रादिदेवैर्मुदाऽभ्यर्च्यमानं,
जिनं ध्वस्तनिश्शेषभावारिमानम् ॥ १

जगुर्ये पुरस्ते तपस्यां प्रपित्सो-
स्तदुत्साहकानीश ! वाक्यानि भक्त्या ।
पदातिप्रवेका इवोद्यद्विवेका,
न लोकान्तिकास्ते सुराः कस्य शस्याः ? ॥ २

ददानो महादानमिच्छानुरूपं,
मणिस्वर्णदुर्वर्णकुप्यादिरूपम् ।

प्रजानां प्रभो ! निर्विशेषं सहर्षं,
भवे कल्पवृक्षायसे स्मैकवर्षम् ॥ ३

रथाश्वेभशुद्धान्तपत्त्यादिपूर्णं,
परित्यज्य राज्यं सुदुर्मोचमन्यैः ।
भवान् संयमैश्वर्यमीशोर्यकार्षी-
द्विशेषज्ञतेत्थं तवैवावभाति ॥ ४

त्वयि प्रस्थिते देव ! दीक्षां जिघृक्षा-
वुदूहुर्मुदोद्भिन्नरोमोद्गमा ये ।
अहम्पूर्विकातो जना याप्ययानं,
त एव स्वकार्यैकसिद्ध्येकतानाः ॥ ५

मृगेन्द्रासनच्छत्रसच्चामरादि-
श्रिया संयमार्थं पुरान्तर्व्रजंस्त्वम् ।
विमानाधिरूढः प्ररूढाधिकश्री-
र्नतः संस्तुतः प्रेक्षितोऽसीश ! धन्यैः ॥ ६

वनं पावनं तन् मुने ! यस्य मध्यं,
त्वयाऽध्यासि चारित्रलक्ष्मीविवाहे ।
द्रुमो निस्समोऽसौ महातीर्थमुर्व्यां,
तलेऽस्थापयस्त्वं निजौ यस्य पादौ ॥ ७

विमुच्याखिलाङ्गाद्यलङ्कारवारं,
स्वयं मुष्टिभिः पञ्चभिर्लोचमुच्चैः ।
सृजन्तं भवन्तं जना येऽभ्यपश्य-
न्नवश्यं दृशःश्लाघनीयास्तदीयाः ॥ ८

स्वयम्बुद्धभावस्य सिद्धप्रणामो-
त्तरं सर्वसामायिकं गृह्णतस्ते ।
मुदाऽवन्दिषातां पदाम्भोरुहे यैः,
सुजन्मान एते ध्रुवं भाविभद्राः ॥ ९

पुरा ज्ञानलब्धित्रयर्द्ध्या समृद्धं,
द्रुतं योगमारूढवन्तं भवन्तम् ।
स्वसङ्केतहूतेव तुर्याऽतिवर्या,
प्रपेदे मनःपर्ययज्ञानलक्ष्मीः ॥ १०

यथा केशरोमादिकां संस्क्रियां ते,
नरा निर्मिमाणा मुने ! सौवभक्त्या ।
तपस्यां प्रपन्नस्य साऽस्थात्तथैवेत्यहो !
योगमाहात्म्यजा तेऽङ्गसिद्धिः ॥ ११

इति नुतिविषयं त्वां यो नयत्यात्मभावा-
च्चरणविधिविधूताशेषकर्मप्रपञ्चम् ।
सुलभसुकृतलाभः सोऽल्पकालादपीश !
श्रयति निहतकर्मा मोक्षसौख्यं सुखेन ॥ (मालिनी) १२

पू.आ.श्री सोमसुन्दरसूरिविरचितः

## ४. ॥ श्रीकेवलज्ञानकल्याणकस्तवः ॥

(स्रग्विणी)

केवलालोकसङ्क्रान्तविश्वत्रय-
स्यैकवाक्याऽस्तनैकप्रजासंशय ! ।
बाढमप्यक्षमाङ्गां निजां गामिमां,
गोचरे चारयाम्यद्य ते संस्तुतेः ॥ १

ध्यातवांस्त्वं यदा शुक्लभेदद्वयी-
मादिमां मोहनीयक्षयैकक्षमाम् ।
आविरासीत्तदा देव ! ते केवलं,
प्रातरैन्द्र्यां दिशीवांशुमन्मण्डलम् ॥ २

वर्षमेतन्मुने ! ऽद्वैतहर्षं जने,
दत्तदुःखप्रवासः स मासस्तथा ।
वासरः सौख्यभाभासुरश्चाभवत्,
केवलं लेभिषे येषु संवेदनम् ॥ ३

शक्रचक्र्यादिलोकस्य साऽर्ह्या मही,
यामधिष्ठाय शुक्लं भवान् ध्यातवान् ।
पादपोऽप्येष सङ्ख्यावदर्च्यः स य-
च्छायमास्थाय संविच्छ्रियं भेजिवान् ॥ ४

विश्वमन्तर्गताशेषभावोत्करं,
केवलज्ञानतः सर्वतः पश्यतः ।
गोप्यमन्तर्हितं दूरमभ्यन्तरं,
वस्तु नास्त्येव किञ्चित्तवाऽनीक्षितम् ॥ ५

ज्ञानभाजः सुयोगैकरूपात्मनो,
जातु माभूत् कुयोगोऽस्य किञ्चिद्विभोः ।
पादभूम्यन्तराले किल स्वर्गिणः,
स्वर्णपद्मान्यधुस्तेन ते सर्वदा ॥ ६

विश्वविश्वाधिपत्यैकसंसूचकं,
प्रातिहार्याष्टकं चैत्यवृक्षादिकम् ।

दैवतैर्देव ! ते निर्मितं भक्तितः,
कस्य नाश्चर्यकृज्जायते वीक्षितम् ॥ ७

अन्यदेवेष्वदृष्टाश्रुतामद्भुतां,
सम्पदं रत्नरैरूप्यवप्रादिकाम् ।
वीक्षमाणोऽपि हृष्येन् न यस्तावकी-
मेष काष्ठं दृषन् नाथ ! चञ्चाऽथवा ॥ ८

केऽपि देवाऽसुराः कर्त्तुमन्यत्र ये,
त्वत्समं नाङ्गमङ्गुष्ठमात्रं क्षमाः ।
देशनायाः क्षणे तेऽपि रूपत्रयीं,
त्वादृशीं तन्वते ते प्रभावादहो ! ॥ ९

देवतिर्यग्नरश्रेणिसाधारणं,
पुण्यपीयूषकुल्यैकतुल्यं विभो ! ।
वाक्यमायोजनागामुकं तावकं,
कं न कुर्यात् समुत्कर्णमाकर्णितम् ? ॥ १०

नूनमासन्नमोक्षा इमा द्वादश,
स्युर्न कस्य प्रभो ! हर्षदाः पर्षदः ? ।
या मुखालोकने देशनाकर्णने,
दत्तचित्तोपयोगाः पुरस्ते स्थिताः ॥ ११

हस्तिसिंहं मृगव्याघ्रबभ्रूरगं,
श्वैणरक्ताक्षताक्ष्यखुमार्जारकम् ।
मुक्तवैरं मिथः स्नेहभृत्ते विभो !
देशनासद्मगं कं न चित्रीयते ? ॥ १२

योजनोर्वीमिते देव ! ते स्थानके,
मान्ति तिर्यग्नृदेवा असङ्ख्या अपि ।
वागतिक्रान्तमाहात्म्यभाजस्तवै-
तादृशामद्भुतानां न सङ्ख्याऽस्ति वा ॥ १३

त्वां नमन्ति द्रुमाः सर्व एवर्त्तव-
श्चाश्रयन्त्याशुगा वान्ति पृष्ठानुगाः ।
पक्षिणो दक्षिणं यान्ति देवाऽखिलाः,
कण्टकाः स्युस्तथाऽधोमुखास्तेऽध्वनि ॥ १४

रोगदुर्भिक्षमारीतिराजोद्भवा,
नोद्भवन्ति प्रजानामिहोपद्रवाः ।
योजनानां सपादे शतेऽवस्थिते,
त्वय्यहो ! ध्वान्तसङ्घा यथोष्णद्युतौ ॥ १५

श्रीगणाधीश्वराणां त्रिपद्यर्पणात्,
त्वं जगन्नाथ ! तीर्थप्रवृत्तिं यदा ।
आतनोषि स्म विस्मापितेन्द्रव्रजं,
भूरशेषा बभासे सनाथा ततः ॥ १६

इत्येवं केवलश्रीरभसभरपरीरम्भलाभाप्तशोभं,
भक्तिप्रह्वामरेन्द्रासुरनरनिकरारब्धपादाब्जसेवम् ।
देवं यः स्तौति भक्त्या प्रतिदिवसमसौ पञ्चमज्ञानलक्ष्मी-
लीलासौख्यानि भुक्त्वा परमपदसुखान्यप्यवाप्नोति तूर्णम् ॥१७

(स्रग्धरा)

पू.आ.श्री सोमसुन्दरसूरिविरचितः

# ५. ॥ श्रीनिर्वाणकल्याणकस्तवः ॥

(स्वागता)

प्राप्तमुक्तिवनितामुखसङ्गं, ध्वस्तकर्मपटलं विकलङ्कम् ।
रूपगन्धरसहीनमनन्तं, श्रीजिनं नुवति कर्म करोमि ॥ १

मुक्तिमाश्रितवति त्वयि नाथे, भूरियं जिन ! बभूव गताभा ।
अस्तमाप्तवति भास्वति किं नो,
द्यौर्भवेद् गलितकान्तिविताना ॥ २

देव ! मुक्तिललनासुखलिप्सो-
र्यत्र तेऽनशनमीश ! किलाऽऽसीत् ।
तत्पदं तव पदैः परिपूतं, पूजनीयमिह कस्य न विश्वे ? ॥ ३

वीतराग ! तव निर्वृतिकाले, त्वद्वियोगजनितातुलदुःखात् ।
एककालममरासुरनृणां, क्रन्दनध्वनिरभूदनिवारः ॥ ४

देव ! दूरतरमुक्तिपदं ते, केवलार्ककलितस्य गतस्य ।
व्यानशेऽन्धतमसैः समकालं, विश्वमेतदखिलं क्षणमात्रम् ॥५

त्वद्द्विजास्थिशुचिनिर्जरराजो, मामहुर्मुहुरहो ! अधिनाकम् ।
भस्मरत्नमपि देव ! तनोस्ते, नाऽऽपि राजभिरपीह महार्घ्यम्॥६

आपतद्भिरभितः परियद्भि-र्देवदानवसुरीनिकुरुम्बैः ।
मोक्षपर्वरजनी तव जज्ञे, केवलद्युतिमयी सकलाऽपि ॥ ७

तीर्थकृत्त्वकमला विमलाऽपि, त्यज्यते स्म भवता गतरूपा ।
आदृता सपदि सिद्धिवधूः किं,
विज्ञता तव विभोऽभिनवेयम् ॥ ८

नैव जन्म न जरा न च रोगाः, क्षुत्तृषामृतिमुखा अपि भावाः ।
क्षिप्तकर्मपटलस्य कदाचिद्देव ! निवृतिगतस्य तव स्युः ॥ ९

सिद्धिसौधमधिरूढवतस्ते, ज्ञानदर्शनबलप्रमदानाम् ।
सम्पदोऽनुभवतोऽखिलकालं,
नान्तरं जिनपतेऽस्ति न चान्तः ॥ १०

ज्ञानतोऽनवरतं जगदेतन्, निर्वृतौ तव सुखं यदनन्तम् ।
लेशतोऽपि बत तस्य समस्ते,
नास्ति विष्टपतलेऽप्युपमानम् ॥ ११

सिद्धबुद्धपरिनिर्वृतमुक्त-क्षीणदुःखकृतकृत्यमुखास्ते ।
संस्मृता बहुविधा अभिधाः स्युः
पापपङ्कविगमाय न केषाम् ? ॥ १२

इति विशृङ्खलयाऽपि गिरा मया,
जिन ! नुतोऽसि महोदयमाश्रितः ।
त्वमिह तत् कुरु येन जिनेश ! मे,
भवति ते पदवी न दवीयसी ॥ १३

पू.आ.श्री सोमसुन्दरसूरिविरचितः

## ६. ॥ श्रीजिनकल्याणकस्तवः ॥

(उपजाति)

कल्याणकारीणि जिनेश्वराणां, पञ्चापि कल्याणदिनानि वन्दे ।
आह्लादिताशेषजगज्जनानि, महोत्सवाद्वैतरमामयानि ॥ १

हरिप्रक्लृप्तोत्सववन्दनप्रसू-सुस्वप्ननिध्यागमसूचितोदयम् ।
गर्भागमाख्यं निखिलार्हतां सतां,
कल्याणकं यच्छतु मोदमादिमम् ॥ २

जगत्त्रयोद्योतनमिन्द्रनिर्मिता-
भिषेचनं नारकलोकशर्म च ।
इत्यादिभावैर्भुवनाद्भुतैर्युतं,
श्रीजन्मकल्याणकमर्हतां स्तुमः ॥ ३

संवत्सरोत्सर्जनविश्वतोषणै-
र्लोकान्तिकामर्त्यसभक्तिभाषणैः ।
सम्प्राप्तशोभं शिबिकादिकैस्तथा,
जिनेन्द्र ! दीक्षादिनमस्तु नः श्रिये ॥ ४

चतुर्निकायामरनिर्मितस्फुरत्-
सत्प्रातिहार्यातिशयर्द्धिबन्धुरम् ।
साऽलोकलोकाकलनैककौशले,
हेतुर्जिन ! ज्ञानदिनं सुखाय नः ॥ ५

ऐकान्तिकात्यन्तिकसौख्यभाजनं,
ज्ञानाद्यनन्तर्द्धिचतुष्टयान्वितम् ।
येष्वर्हतां सिद्धपदं बभूव तान्,
स्मरामि निर्वाणदिनान्मुदा सदा ॥ ६

तीतादिकालत्रितयेऽखिलार्हतां,
श्रीभारतैरावतभाविनां सना ।
गर्भादिकल्याणकपञ्चके ध्रुवान्,
स्मरामि मासोडुतिथीन् यथाक्रमम् ॥ ७

कल्याणकानामिति ये नवं स्तवं,
दिने दिने पापठति प्रमोदतः ।
तेषामशेषाः सुखसम्पदोऽद्भुता,
भवे भवे बोभुवति प्रभास्वराः ॥ ८

पू.आ.श्री सोमसुन्दरसूरिविरचिताः

## ७. ॥ श्रीजिनकल्याणकदिनस्तुतयः ॥

यद्योगतः शम्भवतीर्थनाथः, सत्केवलोद्योतरमामवाप ।
सा पञ्चमी कार्त्तिकमास आसीत्,
श्यामापि शुक्ला सुतरां कथं न ? ॥ (इन्द्रवज्रा) १

द्वादश्यशुक्लाऽपि किलोर्जमासः
प्रासाधि जन्मच्यवनोत्सवाभ्याम् ।
याभ्यां निजाभ्यां जिननायकौ तौ,
नमामि पद्मप्रभनेमिनाथौ ॥ (उपजाति) २

यद्वा-निजच्यवनजन्मभ्यां,
कार्त्तिकद्वादशी श्रियम् ।
श्यामाप्यलम्भि याभ्यां तौ,
नेमिपद्मप्रभौ भजे ॥ (पथ्यावक्त्रम्) २

पवित्रिता येन सितेतरा व्रत-
स्वीकारतः कार्त्तिकत्रयोदशी ।
तत् सर्वशुद्धेति दधे प्रथां नु सा,
सर्वापि पद्मप्रभमानमामि तम् ॥ (इन्द्रवंशा-उपजातिः) ३

यन्मोक्षपर्वप्रभवेन दीप-,
उत्सवेन वैशद्यमिता जिगाय ।
राका: कुहू: कार्तिककस्य सर्वा:
सार्व: स वीर: शिवतातिरस्तु ॥ (उपजाति:) ४

बाहुलस्य धवले तृतीयके,
सत्तिथावतिथिताऽऽप्तकेवलम् ।
विश्वविश्वजनताहितावहं,
श्रीजिनं सुविधिमर्च्चयाम्यहम् ॥ (रथोद्धता) ५

कार्तिकस्योज्ज्वलद्वादशीवासरे,
केवलज्ञानमासादयामास य: ।
स्फातिमत्प्रातिहार्यातिशेषश्रियं,
श्र्यरं सादरं तं स्मरामीश्वरम् ॥ ६

(स्रग्विणी) । कार्तिक: ॥ १ ॥

कर्पूरगौरवपुष: सुविधेर्जिनस्य,
या जन्मनोऽजनि जगत्सुखदस्य कर्त्री ।
सा पञ्चमी शितिसहस्य कथं नमस्या,
न स्यात् सुरासुरनृणां जननीव रामा ? ॥ (वसन्ततिलका) ७

सुविधिं विधिवत् स्तुमो जिनं,
नवमं येन जगन्नवं कृतम् ।
निजसंयमराज्ययोगत:
सहषष्ठीदिनमाद्यपक्षगम् ॥ (वैतालीयम्) ८

मार्गकृष्णदशमीदिने शमी-
भावमाप्तमहमाप्तमन्तिमम् ।

ज्ञातनन्दनमनन्तसंविदं,
दम्भवर्जितहृदा मुदा स्तुवे ॥ (रथोद्धता) ९

प्रभुं पद्मरागप्रभं देवपद्म-
प्रभं भग्नसर्वान्तरारातिगर्वम् ।
सहस्यासितैकादशीप्राप्तमोक्षं,
सुखज्ञानसाम्राज्यभाजं भजेयम् ॥ (भुजङ्गप्रयातम्) १०

येन जन्मशिववर्त्मगमाभ्यां,
भूषिता किल मणीवलयाभ्याम् ।
मार्गशुक्लदशमी रमणीव,
श्र्यरो भवहरोऽस्तु ममाऽसौ ॥ (स्वागता) ११

श्रीमल्लिजन्मव्रतकेवलानि,
तथा नमिज्ञानमरव्रतं च ।
यस्यामजायन्त सिता सहस्य
सैकादशी स्यान्नहि कस्य शस्या ? ॥ (उपजातिः) १२

मार्गमासि विशदा चतुर्दशी
शम्भवस्य जनुषाऽर्हतोऽजनि ।
इन्द्रवृन्दमहिता हितोल्लसन्-
नारकावधिजगज्जनोत्सवा ॥ (रथोद्धता) १३

सा मार्गशीर्षस्य कथं न राका,
स्याच्चित्रकृद्यत्र बभूव भाग्यात् ।
गुणैर्दृढः संयम एव मुक्ते-
र्निबन्धनं श्रीजिनशम्भवस्य ॥ १४

(उपजातिः) । मार्गशीर्षः ॥ २ ॥

यत्राश्वसेननरनाथगृहं महर्द्ध्या,
स्वर्ग्यागमेन च जितत्रिदिवं विरेजे ।
सा पौषकृष्णदशमी जिनपार्श्वजन्म-
पूता पवित्रयतु मानसमस्मदीयम् ॥ (वसन्ततिलका) १५

राज्यं परित्यज्य बभार सारं,
पार्श्वो जिनो यत्र चरित्रभारम् ।
पौषस्य कृष्णामपि पुण्यरूपा-
मेकादशीं तां मनसा स्मरामि ॥ (इन्द्रवज्रा) १६

पोषस्याद्यद्वादशीलब्धजन्मा,
योऽभूद्भूमेर्भूषणं भारतस्य ।
सेवे द्युत्याऽपास्तचन्द्रप्रभस्ये,-
त्यस्यांह्रीं श्रीदेवचन्द्रप्रभस्य ॥ (शालिनी) १७

पौषमास्यविशदत्रयोदशीप्राप्तसंयमरमासमागमम् ।
अष्टमं जिनमहा(था)ष्टकर्मभीवारणं शरणमाश्रयाम्यहम् ॥१८
(रथोद्धता)

चतुर्दशी शीतलकेवलाप्त्या,
पौषस्य कृष्णाऽसुमतां मताऽभूत् ।
मन्ये ततः सर्वजनेऽपि भूते-
ष्टेति प्रसिद्धा सकलाऽपि साऽऽसीत् ॥ (उपजातिः) १९

पौषे जनसौख्यपोषके, सितषष्ठीदिनलब्धकेवलम् ।
विमलं सकलज्ञशेखरं, वरभक्त्या समुपास्महेऽन्वहम् ॥ २०
(वैतालीयम्)

पौषशुक्लनवमीदिनलब्धप्राज्यकेवलमहोमहिमाढ्यः ।
शान्तितीर्थंकर ! किङ्करतां ते, सर्वदैव भगवन् करवाणि ॥२१
(स्वागता)

पौषे शुक्लैकादशीलब्धजन्मा, यस्य प्रोद्यत्केवलज्ञानभानुः ।
तुर्यारस्यादीदिपन् मध्यमागं,
द्वैतीयीकस्तीर्थनाथः स जीयात् ॥ (शालिनी) २२

सहस्यशुक्लैकचतुर्दशीजं, यज्ज्ञानतेजः सकलां त्रिलोकीम् ।
अपूपुरत संवरराजजन्मा-
ऽभिनन्दनस्तुर्यजिनः स नोऽव्यात् ॥ (उपजाति) २३

या श्रीमतो धर्मजिनेश्वरस्य, तं ज्ञानचन्द्रं प्रकटीचकार ।
गम्यो न योऽम्भोदविधुन्तुदादे-
स्तां पौषराकामिह कामयेऽहम् ॥ २४
(इन्द्रवज्रा) । पौषः ॥ ३ ॥

माघस्य षष्ठ्यां विशदेतरस्यां, यत्रावतीर्णो युगपच्चकार ।
हर्षं विषादं च भुवो दिवश्च, पद्मप्रभं तं प्रभुमाद्रियेऽहम् ॥२५
(इन्द्रवज्रा)

श्रीशीतलः स्वीकृतवान् द्वयोः स्व-
कल्याणयोर्जन्मतपस्ययोर्याम् ।
सा द्वादशी श्यामतमा न माघी,
मान्या भवेत् कस्य सचेतनस्य ? ॥ (इन्द्रवज्रा) २६

असिता तपसस्त्रयोदशीयं, शिवहेतुर्भवति स्म यस्य नेतुः ।
दशसाधुसहस्रसंयुतस्य,
प्रथमस्तीर्थपतिः पृणातु सोऽस्मान् ॥ (औपच्छन्दसिकम्) २७

यत्केवलज्ञानरमाप्रयोगादमाऽपि माघस्य बभूव सश्रीः ।
एकादशस्तीर्थकरो नराणामेकां शुभामेव दशां स दिश्यात् ॥२८
(उपजातिः)

यत्र जातमभिनन्दनजन्म, ज्ञानमाप वसुपूज्यसुतश्च ।
सा द्वितीयकतिथिः सितमाघे,
नित्यमेतु मनसोऽतिथितां मे ॥ (स्वागता) २९

विमलधर्मजिनेश्वरयोरहो !, जनिमहोऽजनि यत्र महाद्भुतः ।
सुविशदा तपसोऽस्तु तृतीयिका,
तिथिरसौ शिवसौख्यनिबन्धनम् ॥ (द्रुतविलम्बितम्) ३०

पक्षे वलक्षे तपसश्चतुर्थी-दिने मुनित्वं प्रतिपन्नवान् यः ।
श्यामाङ्गभूः श्रीकृतवर्मभूप-
कुलप्रदीपो विमलः स जीयात् ॥ (उपजातिः) ३१

जितशत्रुक्षितिपाललालिताङ्गं, विजयाकुक्षिसरोजराजहंसम् ।
अजितं माघसिताष्टमीन्द्रवृन्द-प्रकृतप्राज्यजनुर्महं महामि ॥३२
(औपच्छन्दसिकाऽपरान्तिका)

माघस्य शुक्लनवमीदिवसे विसृज्य,
राज्यं चरित्रकमलामुररीचकार ।
यः स्वर्णवर्णवपुरङ्कगहस्तिमल्ल-,
शैवं सुखं स तनुतामजितो जिनो नः ॥ (वसन्ततिलका) ३३

तपोद्वादशीवासरे शुक्लपक्षे,
परिव्रज्य निर्ग्रन्थनाथो य आसीत् ।
जिनः संवरक्ष्मापजन्मा तुरीयः,
स आर्यस्तपो वर्यवीर्यं वितीर्यात् ॥ (भुजङ्गप्रयातम्) ३४

माघमासविशदत्रयोदशी-वासरे समजनिष्ट यो व्रती,
भानुभूपतिकुलाभ्रभानुमान्, धर्मतीर्थकर एष शर्मणे ॥ ३५
(रथोद्धता) । माघः ॥ ४ ॥

फाल्गुने बहुलषष्ठवासरे, ज्ञानरत्नमुदपादि पञ्चमम् ।
यस्य शस्यमहिमाम्बुधेर्दधे, तं सुपार्श्वजिनमात्ममानसे ॥ ३६
(रथोद्धता)

सप्तमाष्टमजिनाववापतु-र्यत्र मुक्तिपदकेवलश्रियौ ।
फाल्गुनस्य शितिपक्षसप्तमी,
सा प्रमोदपदवीं न कं नयेत् ? ॥ (रथोद्धता) ३७

तपस्यमासस्य सितेतरस्यां, जातं द्युलोकच्यवनं नवम्याम् ।
स्वबोधये श्रीसुविधिं जिनेन्द्रं,
ध्यायामि शुद्धात्मवपुःस्वरूपम् ॥ (उपजातिः) ३८

यैकादशी फाल्गुनिकस्य कृष्णा, सत्केवलज्ञानसमृद्धिलाभे ।
नाभेयदेवस्य निदानमासी-दारा-
धयेत्तां खलु धन्य एव ॥ (इन्द्रवज्रा) ३९

श्रीसुव्रतस्याजनि केवलश्रीः, श्रेयांसनाथस्य जनिश्च यस्याम् ।
सा द्वादशी फाल्गुनमासि कृष्णा,
मुष्णातु तृष्णातुरतां नतानाम् ॥ (इन्द्रवज्रा) ४०

मासे तपस्ये बहुलत्रयोदशी-गृहीतचारित्रभरं जिनेश्वरम् ।
श्रेयांसनामानममानमत्सरं, भुजिष्यवन्निर्भरभक्तितो भजे ॥४१
(उपजातिः)

फाल्गुनासितचतुर्दशीतिथौ, देवक्लृप्तजनिमज्जनक्षणम् ।
पूजयामि वसुपूज्यनन्दनं, पापतापशमनैकचन्दनम् ॥ ४२

(रथोद्धता)

यः प्राव्राजीत् फाल्गुने कृष्णपक्षे-
ऽमावास्यायां विश्वरक्षैकदक्षः ।
तस्य श्रीमद्वासुपूज्यस्य नाम-
स्मृत्या नित्यं स्वं कृतार्थीकरोमि ॥ (शालिनी) ४३

तपस्यस्य शुक्लद्वितीयादिने द्योर्भुवं भारतीं भूषयामासिवान् यः।
अरं पारगं सर्वसंसारवार्द्धे-
र्दधे ध्यानमार्गे सुवर्णद्युतिं तम् ॥ (भुजङ्गप्रयातम्) ४४

धराधीशकुम्भप्रभावत्यपत्यं,
जिनं मल्लिनामानमानौमि नित्यम् ।
चतुर्थ्यां तिथौ फाल्गुने शुक्लपक्षे,
क्षपार्द्धे दिवोऽत्रावतीर्णो भुवं यः ॥ (भुजङ्गप्रयातम्) ४५

तपस्यमासस्य सिताष्टमी सा, न कं जनं प्रापयति प्रमोदम् ? ।
श्रीशम्भवो यत्र जितारिभूप-वंशेऽवतारं रचयाञ्चकार ॥ ४६

(उपजातिः)

तपस्यस्य सद्द्वादशी सा द्वितीया-
ऽद्वितीयैव यत्रेति कल्याणयुग्मम् ।
शिवं मल्लिरेकोनविंशो जिनेशश्चरित्र-
श्रियं सुव्रतश्चाप विंशः ॥ ४७

(भुजङ्गप्रयातम्) फाल्गुनः ॥ ५ ॥

श्लाघ्यैव कृष्णापि मधोश्चतुर्थी, पार्श्वश्च्युतिज्ञानमहात्मकेन ।
निजेन कल्याणयुगेन यत्रा–वातीतरत् स्वर्गरमामिहोर्व्याम् ॥४८

चैत्रे शितौ पञ्चमिकातिथौ यः, श्रीलक्ष्मणाकुक्षिमलञ्चकार ।
चन्द्रप्रभः श्रीमहसेनभूप–कुलाब्जहंसः स सतां श्रियेऽस्तु ॥४९
(उपजातिः)

कृष्णचैत्राष्टमीजातजन्मव्रतं, दर्शितन्यायधर्मव्यवस्थं धुरि ।
नाभिराजाङ्गजन्मानमाद्यं जिनं,
ध्यानसेवानमस्कारमार्गं नये ॥ (स्त्रग्विणी) ५०

यस्य शुक्लमधुमासतृतीया–वासरे विमलकेवलमासीत् ।
तस्य सप्तदशकुन्थुजिनेन्द्र–
स्यांह्रियुग्ममहमन्वहमीडे ॥ (स्वागता) ५१

धवलचैत्रिकमासगपञ्चमी–समुपजातमहोदयसङ्गमान् ।
अजितशम्भवतीर्थपती तथा,
जिनमनन्तमपि प्रणिदध्महे ॥ (द्रुतविलम्बितम्) ५२

चैत्रशुक्लनवमीसमवाप्ता–नन्तमोक्षसुखसङ्गममीशम् ।
शीलयामि सततं सुमतिं श्री–
मङ्गलोदरदीर[? दरी]हरितुल्यम् ॥ (स्वागता) ५३

चैत्रिकैकादशी सा सिता नो मता,
कस्य यस्यामसौ पञ्चमस्तीर्थकृत् ।
मेघभूपाङ्गभूर्भूतलप्रीतिदः, केवलज्ञानलक्ष्मीमुपार्जीद्विभुः ॥५४
(स्त्रग्विणी)

मधुमाससितत्रयोदशी-रजनीजातजनुर्महामहम् ।
त्रिशलातनयं नयाम्यहं जिनमन्तर्मनसं सुवर्णभम् ॥ ५५

(वैतालीयम्)

यस्यां सुसीमाधरराजनन्दनः, पद्मप्रभो ज्ञानमवाप पञ्चमम् ।
सा पौर्णमासी मधुमासमण्डनं,
विखण्डनं नो वितनोतु कर्मणाम् ॥ ५६

(उपजातिः) चैत्रः ॥ ६ ॥

वैशाखकृष्णप्रतिपत् पवित्रा, कथं न यत्राऽजनि मोक्षलक्ष्मीः ।
श्रीकुन्थुनाथस्य सुवर्णकान्तेः, श्रीसुरराजेन्द्रतनूद्भवस्य ॥ ५७

(इन्द्रवज्रा उपजातिः)

यो राधमासस्य शितौ द्वितीया-दिने महानन्दपदं प्रपेदे ।
श्रीशीतलं भूतलतायिनं तं, नन्दातनूजं परिपूजयामि ॥ ५८

(उपजातिः)

स्वयशसा पृथवे जिनकुन्थवे, नृपतिसुरसुताय नमो नमः ।
असितमाधवपञ्चमिकातिथौ, य उदुवाह महाव्रतसम्पदम् ॥५९

(द्रुतविलम्बितम्)

वैशाखषष्ठ्यां बहुले द्युलोकान्, नन्दोदरे योऽवततार सारे ।
श्रीशीतलः कोपदवानलेन, प्लुष्टं जगच्छीतलयत्वलं सः ॥६०

(इन्द्रवज्रा)

राधकृष्णदशमी नमनीया, सा न कस्य विदुषः पुरुषस्य ।
या मुनिं नमिजिनं शिवपुर्या, वर्यराज्यपदभाजमकार्षीत् ॥६१

(स्वागता)

माधवस्य बहुलत्रयोदशी–जातजन्ममहिमं महाद्युतिम् ।
सिंहसेननृपनन्दनं नमेः कर्मतां जिनमनन्तमानये ॥ ६२
(रथोद्धता)

अनन्तो व्रतं केवलं चाप यत्रामलं,
तथा कुन्थुनाथो जिनो जन्मकालोत्सवम् ।
इह त्रीणि कल्याणकान्येवमासन्मुदे
चतुर्दश्यशुक्लाऽपि सा माधवी वः श्रिये ॥ ६३
(शक्वर्यां छन्दोविशेषः)

चतुर्दश्यशुक्ला मुदे माधवीया,
त्रिकल्याणकीयं बभु(वे)ति यस्याम् ।
अनन्तो व्रतज्ञानलक्ष्म्याववापत्,
तथा कुन्थुनाथो जनेरुत्सवं च ॥ (भुजङ्गप्रयातम्) ६३

यः शुद्धराधस्य तिथौ चतुर्थ्यां, श्रीसंवरक्ष्मापकुलेऽवतीर्णः ।
सुवर्णवर्णः स भिनत्तु भूयो, भयं भवार्त्तेरभिनन्दनो वः ॥ ६४
(उपजातिः)

सप्तमी सपदि माधवमासः, प्रीतिदा न न भवेदवदाता ।
यत्र धर्मपरमेष्ठ्यऽवताराद्, भानुभूपकुलमुज्ज्वलमासीत् ॥६५
(स्वागता)

वैशाखे विशदाष्टमीदिने यौ,लेभाते जननोत्सवं शिवं च ।
सुमतिश्री अभिनन्दनौ जिनौ तौ,
तनुतामातनुतां ममाघराशेः ॥ ६६
(औपच्छन्दसिकाऽपरान्तिका)

राधशुक्लनवमीदिवसे यो-ऽशिश्रियच्चरणभारमुदारम् ।
मेघराजतनुजः स जिनेन्द्रो, न्यत्करोतु सुमतिः कुमतीर्नः ॥६७
(स्वागता)

वर्द्धमानजिनराट् चरणर्द्धिं, नेनयीतु चरमः परमां नः ।
माधवस्य विशदा दशमी यं, प्रापयत् प्रवरकेवललक्ष्मीम् ॥६८
(स्वागता)

राधमाससितपक्षगता सा, द्वादशी शमयताद् दुरितं वः ।
श्रीमती वसुमती विमलस्या-भूद्दिवश्च्यवनपर्वणि यस्याम् ॥६९
(स्वागता)

त्रयोदशीमाधवमाससत्का, सित सतां सन्तनुतां मतिं सा ।
यत्राजितः श्रीजितशत्रुभूप-कुले द्युलोकादुपपादि देवः ॥ ७०
(उपजातिः) ॥ वैशाखः ॥ ७ ॥

ज्येष्ठे मासे कृष्णे पक्षे, षष्ठ्यां गर्भोत्पत्तिर्यस्य ।
विष्णो राज्याः कुक्षौ देवं, श्रेयांसं तं नित्यं सेवे ॥ ७१
(विद्युन्माला)

ज्येष्ठाष्टम्यां कृष्णपक्षे यदीयं,
जज्ञे जन्माऽऽखण्डलश्रेणिपूज्यम् ।
श्रीमन्तं तं सुव्रतं तीर्थनाथं, पद्मासूनुं नूनमाराधयामि ॥ ७२
(शालिनी)

ज्येष्ठमासनवमीदिनसिद्धं, श्रीसुमित्रनरराजतनूजम् ।
कूर्मलाञ्छनमतुच्छतमाल-च्छायकायमपमत्सरमीडे ॥ ७३
(स्वागता)

ज्येष्ठमासबहुलत्रयोदशी–जातजन्ममहनिर्वृत्तिक्षणः ।
प्रार्थितार्थघटनासुरद्रुमः, शान्तितीर्थपतिरस्तु शान्तये ॥ ७४
(रथोद्धता)

नमत शान्तिजिनं कनकद्युतिं, दुरितसन्ततिशान्तिकहेतवे ।
बहुलपक्षगशुक्लचतुर्दशी, व्रतमहारमया यमरीरमत् ॥ ७५
(द्रुतविलम्बितम्)

ज्येष्ठमासि सितपञ्चमीतिथौ, मौक्तिकं फलमुपार्जयत् किल ।
ज्ञानलक्ष्मिसमलङ्कृतेः कृते,
यः स धर्मजिनराड् विजेजिताम् ॥ (रथोद्धता) ७६

ज्येष्ठस्य शुक्ला नवमीतमी यं,
दिवोऽवतार्याऽऽर्यममूमुदत्क्ष्माम् ।
श्रीवासुपूज्यो वसुपूज्यसुनु–
र्जिनः प्रवालद्युतिरेष जीयात् ॥ (उपजातिः) ७७

द्वादश्यां सितशुक्लमासगायां, जन्माजायत यस्य विश्वशस्यम् ।
श्रीपृथ्वीनृपतिप्रतिष्ठसूनुः,
स सतां यच्छतु वाञ्छितं सुपार्श्वः ॥ ७८
(औपच्छन्दसिकाऽपरान्तिका)

ज्येष्ठमासविशदत्रयोदशी, यं युयोज चरणश्रिया वरम् ।
श्रीसुपार्श्वजिनराट् सप्तमः, सत्तमां गतिमयं ददातु नः ॥ ७९
(रथोद्धता) । ज्येष्ठः ॥ ८ ॥

आषाढपक्षे बहुले चतुर्थ्यां, यस्याऽऽगमाद् भारतभूर्बभासे ।
श्रीनाभिभूपालकुलावतंसः, श्रीआदिदेवस्तनुतां शिवं सः ॥८०
(इन्द्रवज्रा)

मासे शुचावसतिसप्तमीदिने, यं मोक्षसौख्यपदवी समीयुषी ।
विश्वेश्वरं विमलमातनोमि तं,
ध्यानाधिरूढमनिशं मनोऽन्तरे ॥ (ललिता) ८१

नवमीदिवसे शुचिसितपक्षे, तपसः कमला यमलमकार्षीत् ।
विजयक्षितिपामलकुलदीपं, नमिमिन्द्रनतं नमत जिनं तम् ॥८२
(जगत्यां छन्दोविशेषः)

निजावताराात् शुचिशुक्लषष्ठ्यां, तुर्यारकप्रान्तमदीदिपद्यः ।
श्रीवर्द्धमानः परिवर्द्धमानाः,
स सम्पदो यच्छतु वाञ्छिता वः ॥ (उपजाति) ८३

शुक्लाष्टमीप्राप्तशिवं शुचौ तं, शैवेयदेवं स्वशिवाय सेवे ।
मौक्तिक्यभूद्यो यदुराजवंशे, नैर्मल्यविभ्राजि सुवृत्तताढ्यः ॥८४
(इन्द्रवज्रा)

आषाढमासस्य वलक्षपक्षे, चतुर्दशीजातमहोदयश्रीः ।
श्रीवासुपूज्यो जगदेकपूज्यो, जिनातु दुष्कर्मपरम्परा नः ॥ ८५
(उपजातिः) । आषाढः ॥ ९ ॥

श्रावणमासे कृष्णतृतीया-वासरलब्धानन्तशिवर्द्धिः ।
विष्णुसुतः श्रीतीर्थकरः, श्रीमोक्षसुखं नम्राङ्गिषु देयात् ॥८६ ॥
(रुक्मवती चम्पकमाला वा)

नभसोऽसितसप्तमीं स्तुवे, बत यत्राऽऽप्तमनन्तनामकम् ।
सुयशा निजकुक्षिकोणकेप्यधरन्मेरुगिरेर्गुरुं गुणैः ॥ ८७ ॥
(वैतालीयम्)

श्रावणेऽष्टमतिथावसितायां, मेरुमूर्ध्नि जननोत्सवमाप्तम् ।
वप्रया घृ(धृ?)तमिनं निजकुक्षौ, श्रीनमिं नमतिकर्म करोमि॥८८
(स्वागता ।)

स्वस्तश्च्युतिः श्रावणकृष्णपक्षे,
तम्यां[स्यां]नवम्यामरिहस्य यस्य ।
तं कुन्थुनाथं नृपसूरराज्ञी-
श्रीपुत्रमाराधयत त्रिकालम् ॥ (इन्द्रवज्रा) ८९

श्रावणस्य सितया द्वितीयया, सिंहवद्य इह मेघभूपभूः ।
मङ्गलोदरदरीमवातरत्, सन्मतिं स सुमतिस्तनोतु नः ॥ ९०
(रथोद्धता)

पञ्चमी नभसि मासि सिता सा, मानसं मुदमवापयतान् मे ।
नेमिनोन्नतिमनीयत यस्यां, जन्मना यदुकुलं निजकेन ॥ ९१
(स्वागता)

यः प्राव्राजीत् श्रावणे शुक्लषष्ठ्यां,
मुक्त्वा राज्यं राजीमत्या सनाथम् ।
नेमिः स्वामी श्यामलच्छायकायो,
मायामुक्तं स्वं पदं स प्रदेयात् ॥ (शालिनी) ९२

अश्वसेनतनयं विनयेना-नौमि कामितफलाप्तिसुरद्रुम् ।
श्रावणस्य विशदाष्टमघस्रे, यो विमुक्तिसुखसङ्गममाप ॥ ९३
(स्वागता)

द्योर्यश्च्युत्वा श्रावणे पौर्णमास्यां, पद्माकुक्ष्यम्भोरुहे हंसति स्म ।
देवः स श्रीसुव्रतः स्वांह्रिपद्मे, नित्यं दद्याच्चञ्चरीकव्रतं मे ॥९४
(शालिनी) श्रावणः ॥ १० ॥

भाद्रमास्यऽसितसप्तमीदिनं,
स्यान्न कस्य ननु सम्मदास्पदम् ? ।
यत्र षोडशजिनो दिवश्च्यु(श्च्य)वं,
मोक्षमष्टमजिनोऽप्यवापतुः ॥ (रथोद्धता) ९५

भद्राष्टम्यां बहुलगतायां,स्वर्गाद्भूमौ समवततार यः ।
स श्रीमान् जयति सुपार्श्वः, पृथ्वीसूनुः कनकनिभाङ्गः ॥ ९६
(मत्ता)

शुक्लनवम्यां भाद्रपदस्या-गाधभवाब्धेः पारमगाद्यः ।
भानुसमानं भुवनालोकं, श्रीसुविधिं तं ध्यायत धन्याः ॥ ९७
(रुक्मवती) । भाद्रपदः ॥ ११ ॥

अमाऽपि सूद्योतमयी कथं न, तिथिः पवित्राश्विनमाससत्का ?।
यत्रोदगान्नेमिनि केवलार्क्कः, समग्रकर्मावरणाऽभ्रमुक्तः ॥९८
(उपजातिः)

तद्युक्तमेवाश्विनपौर्णमासी, यदुज्ज्वला सर्वजनैर्न्यगादि ।
नमेर्द्युलोकागमनेन यस्यां,
मोहमयी ! द्राग्निखिलाप्यऽभूद् भूः ॥ ९९
(उपजातिः) । आश्विनः ॥ १२ ॥

सर्वे द्युलोकाऽऽगमजन्मदीक्षा-ज्ञानापवर्गाप्तिदिना जिनानाम् ।
महोत्सवोद्योतमया मयाऽमी,
स्मृताः समाधिं ददतां च बोधिम् ॥ (उपजातिः) १००

च्यवनजननदीक्षाकेवलज्ञानमोक्षा-
गमसमयविशेषेषूत्सवाढ्येषु येषां ।

क्षितिवलयमपास्तस्वर्गशोभं बभस्ति,
प्रददतु मुदमाप्तास्तेऽत्र कालत्रयेऽपि ॥ (मालिनी) १०१

उत्सर्पिण्यवसर्पिणीषु भरतेष्वैरावतेष्वर्हतां,
सर्वेषामपि भूतभाविभवतां कल्याणकेषु क्रमात् ।
मासान् भानि तिथींश्च शाश्वततया तान्येव विज्ञा जगु-
र्यस्मात्तज्जिनभाषितं प्रवचनं भक्त्या नमामोऽन्वहम् ॥ १०२
(शार्दूलविक्रीडितम्)

ये श्रीतीर्थाधिपानां समसमयभुवां विंशतेर्वा दशानां,
तावद् रूपैरुपेता इह महिमभरं पञ्चकल्याणकेषु ।
अर्हद्भक्तिप्रमोदात् तृणतुलितदिवः कुर्वते सर्वकालं,
ते सर्वेऽपीन्द्रमुख्या विदधतु विबुधाः सङ्घलोकाय भद्रम् ॥१०३
(स्रग्धरा)

पू.आ. श्री मुनिसुन्दरसूरिविरचितम्

# ८. ॥ श्रीचतुर्विंशतिजिनकल्याणकस्तोत्रम् ॥

(उपजाति)

जयश्रिये शास्वतशर्महेतवे
कल्याणकैः स्तौमि जिनांस्तिथिक्रमात् ।
श्रीसम्भवः केवलमाप कार्त्तिके
सितेतरे बाणमिते तिथौ ५ जिनः ॥ १

नेमेश्च्युतिर्भानुमिते १२ जनुः पुनः
पद्मप्रभे विश्वमिते १३ च तद्व्रतम् ।

वीरे शिवं दर्शतिथा १५ वथार्जुनाऽ-
भवत्तृतीया सुविधेर्मतिप्रदा ॥ २

द्वादश्यरे केवलदाऽथ मार्गे
कृष्णे शरे ५ऽभूत्सुविधेः सुजन्म ।
तपोऽस्य षष्ठ्यां दिशि १० वीरदीक्षा
रुद्रे ११च पद्मप्रभनिर्वृतिश्रीः ॥ ३

शुक्ले दशम्या१० मरजन्मसिद्धी हरे११ नमिज्ञानमरव्रतं च ।
जन्मव्रतज्ञानलभा च मल्लेश्चतुर्दशी सम्भवजन्मनेऽभूत् ॥ ४

तस्यैव राका१५ तपसेऽथ पौषे
श्यामे च वामेयजनिर्दशम्याम् ।
एकादशी पार्श्वतपःप्रदाऽर्के १२
जन्मेन्दुलक्ष्माऽऽप तपोऽस्य विश्वे १३ ॥ (इन्द्रवज्रा) ५

मनौ १४ मतिं प्राप च शीतलोऽथ
शुभ्रेऽभजत् तां विमलो रसे ६ ऽर्हन् ।
शान्तिर्नवम्यामजितश्च शम्भौ ११
रत्ने १४ ऽभिनन्दश्च तिथौ १५ च धर्मः ६ ॥ ६

माघेऽथ पद्माभजिनोऽसिते रसे ६
च्युतो रवौ १२ जन्मतपश्च शीतले ।
विश्वे १३ शिवं श्रीवृषभोऽभजन्मतिं
श्रेयानमायां च १५ सितेऽथ पक्षके ॥ ७

युग्मे २ऽभिनन्दनजनुर्वसुपूज्यसूनो-
र्ज्ञानं च धर्मविमलोद्भवकृत्तृतीया ।

अब्धौ व्रतं च विमलेऽजितजन्म सर्प्पे८
नन्दे९ ऽजितव्रतमिने १२ त्वभिनन्ददीक्षा ॥(वसन्ततिलका)८

यक्षे १३ धर्म्मो दीक्षितः फाल्गुनेऽथ
श्यामे षष्ठ्यां ज्ञानमापत्सुपार्श्वः ।
सिद्धिं चाश्वेऽसौ मतिं चेन्दुलक्ष्मा
नन्दे९ चासीत्पुष्पदन्तावतारः ॥ (शालिनी) ९

आदीश ईशे ११ मतिमाप सूर्ये १२
श्रेयान् जनिं केवलितां मुनिश्च ।
यक्षे १३ तपःश्रेयसि वासुपूज्ये
जनुर्मनौ १४ तस्य तपः कुहौ १५ च ॥ १०

सितेऽक्षि२वेदा४ ऽहिषु ८ चावतारा
जिनारमल्लिप्रभुशम्भवानाम् ।
प्रभापतौ १२ सुव्रतसद्व्रताप्ति-
र्मुक्तिश्च मल्लेरसितेऽथ चैत्रे ॥ ११

पार्श्वच्युतिज्ञानलभा चतुर्थ्यां
बाणे५ऽवतारः शशिलाञ्छनस्य ।
वसौ ८ युगादीशजनुश्चरित्रे
शुभ्रेऽथ कुन्थोरनले ३ ऽवबोधः ॥ १२

इषा५वनन्ताजितशम्भवेषु
सिद्धिर्निधौ ९ सा सुमतेश्च रुद्रे ११ ।
बोधोऽस्य विश्वे १३ जननं च वीरे
पद्मप्रभौ ज्ञानकरी च राका ॥ १३

राधेऽथ कृष्णे प्रतिपद्विमुक्त्यै
कुन्थोर्द्वितीयाऽजनि शीतलस्य ।
सिद्ध्यै शरे ५ प्रव्रजनं च कुन्थोः
श्रीशीतलस्यावतरश्च तर्के ६ ॥ (इन्द्रवज्रा) १४

नमेः शिवं दिश्यु १० दभूदनन्तो
यक्षे १३ मनौ १४ चास्य चरित्रबोधौ ।
जनिश्च कुन्थोर्विशदेऽभिनन्दो वेदे ४
च्युतोऽश्वे ७ ऽवततार धर्मः ॥ १५

फणभृत्य ८ भिनन्दनिर्वृतिः
सुमतेर्जन्म च तत्तपोनिधौ ९ ।
दिशि १० वीरमती रवौ १२ च्युति-
र्विमले विश्वतिथि १३ च्युतोऽजितः ॥ (ललिता) १६

ज्येष्ठे तु कृष्णे च्युतये रसो ६
ऽभूत् श्रेयांसनेतुर्मुनिजन्म नागे ८ ।
निधौ९ स सिद्धो जनिनिर्वृती श्री-
शान्तेस्तु यक्षे १३ भुवने १४ तपोऽस्य ॥ १७

सिते शरे ५ धर्मशिवं नवम्यां श्रीवासुपूज्यावतरः सुपार्श्वः ।
जातो रवौ १२ विश्वदिने १३ तपोऽस्या-
षाढे शितौ श्रीवृषभश्च्युतोऽब्धौ ४ ॥ १८

हये ७ऽपवर्गो विमले निधौ ९ श्री-
नमेस्तपस्या धवले तु षष्ठ्याम् ।
वीरश्च्युतो दन्तिनि ८ नेमिमोक्षो
रत्ने १४ विमुक्तो वसुपूज्यजन्मा ॥ १९

श्रावणे श्यामलेऽग्नौ ३ शिवं श्रेयसोऽ-
नन्तनाथाऽवतारेऽभवत् सप्तमी ७ ।
अष्टमी श्रीनमेर्जन्मने सेवधौ ९ विच्युतः
कुन्थुनाथोऽथ पक्षेऽर्जुने ॥ (स्रग्विणी) २०

नयने २ सुमतिच्युतिः शरे ५ नेमेर्जन्म रसे ६ऽस्य तु व्रतम् ।
भुजगे ८ वामेयनिर्वृती राकायां समवातरन्मुनिः ॥ २१

श्यामे नभस्ये तुरगे ७ ऽपवर्गश्चन्द्राभनेतुश्च्यवनं च शान्तेः ।
वसौ ८ सुपार्श्वावतरोऽथ शुद्धे
निधौ ९ शिवं श्रीसुविधेश्च जज्ञे ॥ २२

दर्शे १५ त्वाश्वयुजे शिवासुतमती राका १५ दिने श्रीनमे-
र्जज्ञे चाऽवतरो मयेति विनुताः कल्याणकैः श्रीजिनाः ।
कल्याणौघकराः प्रयोधमतुलं तत्त्वं त्वनन्तं स्फुर-
न्नित्यानन्दमयी यतो मम भवेदुद्यज्जयश्रीः परा ॥(शा.वि.)२३

एवं सर्वजिनेश्वरांस्त्रिजगतीश्रेयोविलासप्रदान्
शक्रालीमुनिसुन्दरस्तवगणैर्नूतक्रमान् यः स्तुते ।
सर्वाभीष्टसुखोच्चयैरविरतं स्फूर्जत्प्रमोदाऽद्वयो
मोहद्वेषि जयश्रिया स लभते श्रेयोऽचिराच्छाश्वतम् ॥ २४
(शा.वि.)

पू.आ.श्री जिनप्रभसूरिविरचितम्

# ९. ॥ श्रीपञ्चकल्याणकस्तवनम् ॥

(वंशस्थ)

निलिम्पलोकायितभूतलं श्रिया नयन्मुदं नैरयिकानपि क्षणम् ।
त्रिलोकलोकस्य रतेः प्रपञ्चकं
जिनेन्द्र-कल्याणकपञ्चकं स्तुमः ॥ १

निवेदितः प्रीतिपरैः पुरन्दरैश्चतुर्दश स्वप्नविभावितोदयः ।
महानिधानागमचारुरर्हतां तनोतु गर्भावतरोत्सवः शिवम् ॥ २

कुकुप्कुमारीकृतसूतिसंस्क्रियं सुपर्वसम्पादितमज्जनक्षणम् ।
सृजन्तमुद्योतमयं जगत्त्रयं जनुर्महं संस्तुमहे भवद्ग्रहम् ॥ ३

सुरोपनीतैः परिवत्सरं धनैर्यथाभिलाषं परितोषितार्थिने ।
जिनाधिपानां निखिलाङ्गिरक्षिणे नमस्तपस्याप्रतिपत्तिपर्वणे ॥४

अमर्त्यनिर्वर्त्तितदेशनाऽवनीकृताद्भुतः कैवलवैभवोद्भवः ।
अमन्दनान्दीरवपूरिताम्बरः करोतु जैनः शुभभाजनं जनम् ॥५

पुरन्दरक्रन्दितसम्भ्रमभ्रमत्सुरौघमालिङ्गितमुक्तिवल्लभम् ।
जिनस्य निर्वाणदिनं दिगन्तरस्फुरत्तमः सत्तमशर्मणेऽस्तु नः ॥६

महर्षयो भूतभवद्भविष्यताममुत्र कल्याणकपञ्चकेऽर्हताम् ।
विना विदेहान् दश कर्मभूमिषु
स्मरन्ति मासर्क्षतिथीन् सनातनान् ॥ ७

इत्यादृतस्त्रिभुवनप्रभुसत्कपञ्च-
कल्याणवज्रकवचं हृदि यो बिभर्त्ति ।

शस्त्राणि ते जिततराण्यपि मोहराजः
सौभाग्यभाग्ययुजि न प्रभवन्ति तस्मिन् ॥(वसन्ततिलका) ८

पू.आ.श्री जिनप्रभसूरिविरचितः

## १०. ॥ द्वित्रिपञ्चकल्याणकस्तवः ॥

(अनुष्टुप्)

पद्मप्रभप्रभोर्जन्म गर्भाधानं च नेमिनः ।
भवार्तिं कार्तिकश्याम-द्वादश्यां लुम्पतां मम ॥ १

दीक्षारस्य नमेर्ज्ञानं श्रीमल्लेस्ते च जन्म च ।
मार्गस्य शुक्लैकादश्या-मर्थात्कल्याणपञ्चकम् ॥ २

ज्ञानश्रिया वासुपूज्यो जन्मना चाभिनन्दनः ।
यां पवित्रितवान् माघ-द्वितीया सा शुचिः श्रिये ॥ ३

माघश्वेततृतीयायां ययोर्जन्ममहोऽजनि ।
प्रपद्ये शरणं पादांस्तयोर्विमलधर्मयोः ॥ ४

सुपार्श्वः प्राप कैवल्यं केवलं चन्द्रलाञ्छनः ।
यस्यां सा वः सुखायास्तु कृष्णा फाल्गुनसप्तमी ॥ ५

श्रीश्रेयांसस्य जन्माभूत् ज्ञानं श्रीसुव्रतप्रभोः ।
यस्यां सा बहुला दद्यात् फाल्गुनी द्वादशी मुदम् ॥ ६

मल्लिर्मुक्तिमुरीचक्रे दीक्षां च मुनिसुव्रतः ।
यत्र सा श्रेयसे भूयात् फाल्गुनद्वादशी सिता ॥ ७

अजितः सम्भवोऽनन्तः प्रापुर्यत्र परं पदम् ।
चिनोतु सा वः शुचितां शुचिश्चैत्रस्य पञ्चमी ॥ ८

अनन्तस्य व्रतं ज्ञाने कुन्थोर्जन्ममहोत्सवः ।
वैशाखाद्यचतुर्दश्यां नन्द्यात् कल्याणकत्रयी ॥ ९

वैशाखे विशदाष्टम्यां सुमतेर्जननोत्सवः ।
अभिनन्दननाथस्य मुक्तिश्च कुरुतां मुदाम् ॥ १०

भाद्रस्यासितसप्तम्यां मुक्तिश्चन्द्रप्रभप्रभोः ।
शान्तेश्च गर्भावतरः तारं वितरतां सुखम् ॥ ११

नम्रेन्द्रचूडारत्नांशु-मञ्जरीपिञ्जरक्रमाः ।
जयन्ति जिनशार्दूलास्त्रैलोक्याभयलग्नकाः ॥ १२

अजरामरतां यान्ति येऽपि भव्यजन्तवः ।
सा सर्वज्ञमुखाम्भोधि-निर्गतावाक् सुधाश्रिये ॥ १३

विलेपनं ददानाह्रि - नखांशुघुसृणद्रवैः ।
नम्रामराङ्गनास्येषु त्रायतां वः सरस्वती ॥ १४

इति स्तुताः जिनाधीशाः कल्याणैर्द्वित्रिपञ्चभिः ।
भव्यात्मनां प्रमोदाय श्रीजिनप्रभसूरिभिः ॥ १५

पू.आ.श्री जिनवल्लभसूरिविरचितम्

## ११. ॥ श्रीपञ्चकल्याणकस्तोत्रम् ॥

( स्रग्धरा)

प्रीतद्वात्रिंशदिन्द्रोदितविततगुणाधारपुत्रावतारं,
प्रोत्सर्पत्सर्वदेशोत्सवमवपतितानल्पपुण्योपकारम् ।
स्फीतः श्रेयः श्रिगीतावृजिनजिनगुणं वीतविद्वेषिजैनं,
गर्भाधानं धुनोत्तद्धुरविधुरविधिं ध्यायतां वर्द्धितर्द्धिः ॥ १

नानानाकिप्रचारत्रिदिवनिभभवद्भूतिसुस्वप्नपङ्क्ति-
व्यक्तव्याख्यातपुण्यप्रचयपरिचयानन्दनन्दज्जनानि ।
प्राज्यप्रोज्जृम्भमाणानि घनधननिधानानि सद्यो जिनानां,
गर्भाधानानि भूयो भवभवनभिदे वो भवन्त्वद्भुतानि ॥ २

सद्यो लोक प्रकाशत् प्रवणपरिलसज्ज्योतिरुद्योतिताशा-
ऽऽकाशं द्राक् दिक्कुमारीविसरविरचिताशेषतत्कालकृत्यम् ।
पञ्चत्वं वृत्रशत्रोर्दिशदपि शिवदं वादितानन्दनादा-
नादव्यापूर्णकर्णत्रिभुवनजनतं पातु वो जन्म जैनम् ॥ ३

आनीतस्फीतनानाह्रदजलधिनदीतीर्थमृद्वारिपूरं,
प्रक्रीडन्नाकिलोकप्रकृतसरभसोल्लासलास्यादिलीलम् ।
मेरौ सोत्कर्षहर्षद्रुतमिलितसमस्तेन्द्रसर्वप्रकार-
प्रारब्धं पापतापं द्यतु जिनजनने मज्जनाडम्बरं वः ॥ ४

तूर्णं स्वर्णं सृजास्मिन्रचय वयमिहोद्रश्मि सद्भूषणानां,
रत्नानां कुर्वमुत्रोत्करमिहनिकरोदारसारांशुकानि ।
यावद्धर्ष सहर्षं सततधनमहावर्षविच्छिन्नतर्षं,
जैनं दीक्षासु हन्यादिति सुरविसरादेशनं क्लेशनं वः ॥ ५

लीलायूंषि प्रपुष्यज्जिनकृतसफलायूंषि हृष्यद्वपूंषि,
प्रध्वस्तद्वींषि भूयोऽद्भुतसुरनिलयत्वींषि नीरागरूंषि ।
दौस्थ्यद्रुप्लूंषि वः रोगोडुमरमरकभीमुंषि कल्याणयुंषि,
द्राग्दत्ताशींषि वः स्युर्व्रतविधिदिवसान्यहर्तां पापपींषि ॥ ६

प्रीतस्वाराञ्जि हृष्टभ्रमदमरभरभ्राञ्जि नम्रासुरस्त्री-
विश्रस्तश्रञ्जि वीतप्रणतजनमनोरुञ्जि कल्याणयुञ्जि ।

तुष्यद्भूभुञ्जि पुष्यत्सुखरसमयताभाञ्जि सर्वार्थमृञ्जि,
प्रीयासुर्वो जिनानामनुपमविकसत्केवलश्रीमहांसि ॥ ७

नन्दच्चेतांसि लीलारसरभसवशोल्लासि लास्याप्सरांसि,
स्थेयः श्रेयांसि चञ्चन्वचरचितविहायांसि पुष्यन्महांसि ।
द्राक् तीर्थं तीर्थनाथ ! प्रथय कथयतेऽतीवनान्दीरवेण,
व्याप्ताव्योमानिशं वो ददतु जिनततेः केवलोत्पत्त्यहानि ॥ ८

सत्कारं यत्र देवा जिनवपुषि दधुर्वह्निवाताब्दनाथाः,
शक्रः सङ्क्रन्दनाख्यामभजदवितथां यत्र सङ्क्रन्दनाच्च ।
पूजायै यत्र भक्त्या जिनहनुरदनानग्रहीषुः सुरेन्द्राः,
तद्वः कल्याणकं स्ताच्चरममयविभोः सर्वकल्याणमूलम् ॥ ९

बद्धा क्रन्दामि वोच्चैर्जिनपतिविरहादुद्भवद्भूरिभेरी-
भाङ्कारस्फारतारप्रतिरवमिषतः कुर्वदाशु त्रिलोकीम् ।
मुक्तेराहूतियोगादवितथपदभृत्कल्पकल्याणकारि-
स्तादस्तादभ्रगर्भाद्यशिवशिवयुषामन्यकल्याणकं वः ॥ १०

इत्युद्यन्मून्दि नन्दजगदनभिमतच्छीन्दि दौर्गत्यभीन्दि,
व्यस्तस्यापन्दि बन्दीकृतवरकविसंसन्दि माद्यद्द्युसन्दि ।
सर्पत्सम्पन्दि नृत्यत्सुरपददलितादीन्द्रदीर्यदृषन्दि,
प्रीतिस्फीर्तिं द्रुतं वो ददतु जिनमहापञ्चकल्याणकानि ॥ ११

एवं यत्पञ्चकल्याणकसमयमहेष्वद्यदुद्दामधामा-
मन्दानन्दात्म जज्ञे त्रिजगदपि जिनांस्तान् सदा ये स्तुवन्ति ।
तूर्णं ते सारसांसारिकसकलसुखप्राज्यमर्त्ताधिराज्यः,
स्वः साम्राज्यादिभुक्त्वा जिनपदसहितं वल्लभं सल्लभन्ते ॥ १२

पू.आ.श्री जिनवल्लभसूरिविरचितम्

# १२. ॥ श्रीकल्याणक-स्तोत्रम् ॥

(अनुष्टुप्)

पुरन्दरपुरस्पर्द्धि - वर्द्धितर्द्धिमहोदयम् ।
भूतलं तन्वतीमर्हत्पञ्चकल्याणिकीं स्तुमः ॥ १

सुस्वप्नसूचितं सद्यः, सुरेन्द्रादिष्टमिष्टकृत् ।
स्फुरन्निधानं भगव-द्गर्भाधानं धिनोतु नः ॥ २

सङ्क्षुभ्यत्सर्वगीर्वाण - सर्वर्द्धिकृतमज्जनम् ।
विश्वविश्वोद्यदुद्द्योतं, जन्म जैनं पुनातु नः ॥ ३

समस्तशस्तवस्तूनां, दानादानन्दितप्रजम् ।
स्फीतश्रि वीतविद्वेषि, व्रतपर्व स्तुवेऽर्हताम् ॥ ४

सम्भ्रान्तशक्रं सोत्कर्ष-हर्षचङ्क्रमदामरम् ।
समुद्भूताद्भुतानन्दं, जैनं ज्ञानमहोऽवतात् ॥ ५

क्रन्दत्सङ्क्रन्दनं सद्य, उद्यदुद्दामतामसम् ।
सम्भ्रान्तत्रैदशं दिश्या-दर्हदन्त्यदिनं शिवम् ॥ ६

एवं प्रमोदप्रोदञ्च-दुच्चरोमाञ्चकञ्चुकम् ।
त्रैलोक्यं किङ्करं कुर्वत्यव्यात् कल्याणिकावली ॥ ७

इति यः पञ्चकल्याणीं, कल्याणी कुरुते हृदि ।
कल्याणालीं स शुद्धात्मा, जिनवल्लभते लघु ॥ ८

मुनिप्रवरश्री विनयहंसगणिविरचितम्

# १३. ॥ सकलश्रीजिनराज-पञ्चकल्याणकस्तोत्रम् ॥

(शार्दूलविक्रीडित)

गर्भावासनिवास जन्मसमया सद्मव्रतज्ञानिता,
निर्वाणात्मकमङ्गलालयलसत्कल्याणकेषूत्सवाः ।
आराध्याः सुधियां प्रधानविधिना स्युः सिद्धये येऽर्हतां,
स्तोष्येऽसङ्ख्यविशेषसौख्यसुषमापोषप्रकर्षाय तान् ॥ १

ये पूर्वं नरकत्रिविष्टपगतिस्थित्यादि भुक्त्वोचितं,
द्रव्यार्हन्निवहा विदेहभरतेष्वैरावतेषु क्रमात् ।
जायन्ते युगपत् ससप्ततिशतं स्वाम्बोदरे गर्भतां,
बिभ्राणाः सरसैश्चतुर्दशमितस्वप्नप्रपञ्चेक्षणैः ॥ २

किं मन्ये भुवि भूर्भुवःस्थभविनां सन्दर्शनश्रीपद,-
ज्ञप्त्यानन्तसुखाकरार्पणकलोल्लासं विधातुं स्वयम् ।
सर्वत्राद्भुतसर्वदेशविरतिख्यात्यावतीर्णा इवो,-
न्नत्यो धर्मपथाश्च भावजिनपास्ते सन्तु भद्रङ्कराः ॥ ३

च्यवनम्

उच्चस्थानगतग्रहेषु समयादिष्टेष्टवेलाबलो,-
ल्लासे सत्यवदातजन्मसमयः शस्तप्रशस्तोत्सवः ।
येषां तत्क्षणमागता सुरसुरेशासाद्यमाद्याद्विधि,-
स्नानः स्वर्णगिरौ सुरीततिकृताम्बासूति कर्म्माजनि ॥ ४

सत्यानन्दपदप्रकाश इव किं सत्सिद्धिसौधोद्धुर,-
द्वारोद्घाटनकुञ्चिकेव भविनां सौख्यावकाशावधिः ।
मन्ये नारककर्मिणामपि कलाकोटीविलासालय-
प्रादुर्भाव इवानवद्यपदवीं तन्वन्तु ते मे जिनाः ॥ ५

जन्म

राज्यं प्राज्यमभङ्गभोगसुभगं भुक्त्वा च सद्वार्षिकं,
दत्त्वा दानममानमानदमदस्त्यक्त्वाऽथ रागाङ्कुरान् ।
नत्वा सिद्धपदं सुसर्वविरतिं स्वीकृत्य सर्वात्मना,
मर्त्यामर्त्यनुता विहारपदवीं प्रापुः स्वयं ये भुवि ॥ ६

किं सोपानपरम्परामिव महादुर्गं तपःक्ष्म्याधरां,
ह्यारोढुं विकटारिकर्मविजयावाप्त्यै प्रभानामिव ।
किं वा भावि महोदयप्रसविनीं श्रीकेवलालोकसद्,
भानोः सर्वतमोभिदो भवभयं भिन्दन्तु नस्ते जिनाः ॥ ७

निष्क्रमणम्

षट्कायावनपूर्वतीव्रसुतपश्चारित्रपात्रव्रत,-
व्रातस्वान्तपदावधानविधिनाराध्य त्रिधा शुद्धितः ।
यैः श्रीकेवलसंविदुज्ज्वलकलालावण्यलीलाकला,
ब्रह्मघ्नं घनघातिकर्मकषणं कृत्वार्जिता सर्वतः ॥ ८

देवानामिव भक्तिशक्तिघटनाद्वारं सुवर्णादिक-
प्राकारैरिव वोदियाय किमपूर्वार्कप्रकाशं प्रथा ।
त्रैलोक्येऽपि शरीरिणां गुणिगुणस्वस्वार्थनिर्बाधतोद्-
बोधाय प्रथयन्तु तीर्थपतयस्ते सत्यमत्यङ्कुरान् ॥ ९

ज्ञानम्

दुष्टानिष्टनिकृष्टकष्टघटनोपादानतासंस्थितं,
कर्मोन्मूल्य समूलमुज्ज्वलगुणश्रेणीसुतीक्ष्णासिना ।
नित्यानन्तचतुष्टयाश्रयपदं यैः प्राप्य पूर्वं शिवं,
शैलेशीकरणाद्विशालधवलध्यानप्रपञ्चाञ्चितान् ॥ १०

किं लोकोत्तरसम्पदां निधिरिवारोग्यप्रभुत्वाकर,-
स्फारश्रीप्रसवस्थलीव भवभीभेदौषधीवाद्भुता ।
आधिव्याधिविषप्रकर्षकषणे किं मन्त्रयन्त्रादिकं,
सर्वे ते भयदा भवोद्भवभयं भिन्दन्तु भव्यात्मनाम् ॥ ११

निर्वाणम्

यासु क्षोणिषु सद्विदेहभरतेष्वैरावतेषूदिता,-
राध्यत्वस्थितिषूद्बभूव भविनां कल्याणकानां विधिः ।
येषामेष विशेषभक्तिनिभृतो वन्देऽखिलांस्तीर्थपां,-
स्तांस्तांस्तीर्थधिया च मङ्गलकुलाश्लिष्टप्रकृष्टश्रिये ॥ १२

भक्तिव्यक्तिजुषामयेति जिनपाः कल्याणकैकस्थितेः,
किञ्चित् ख्यातिविशेषतः स्तुतिपथं नीताः प्रसन्नोज्ज्वलाः ।
भूयासुः सकलाः सहर्षविनयश्रीसूरिपूज्यास्तथा
शिष्टेष्टाकरधर्महंससरसो भव्यो भवेयं यथा ॥ १३

## १४. ॥ संयुक्तजिन-कल्याणक-स्तुतयः ॥

(उपजातिः)

विनम्र-देवाधिभुवः किरीट-, सङ्क्रान्तपादाम्बुरुहच्छलेन ।
आज्ञां शिरस्याह वहेद् ययोस्तौ,
पद्मादि नेमी कुरुतां हितं वः ॥ १

द्वात्रिंशदत्यद्भुत-लक्षणश्री-, विराजमानाङ्गतया ब्रुवाणम् ।
नूनं जिनेभ्यो जगदुत्तमत्व-, मरं नमिं मल्लिमपि प्रणौमि ॥ २

निरस्त-दुष्टाष्ट-महारि-कर्मे-, त्यवाप्त-शक्रेन्द्र-महासपर्यः ।
ध्रुवं सभाया भवताद्विभूत्यै,श्रीवासुपूज्यः श्र्यभिनन्दनश्च ॥ ३

पीताङ्गभासा मणिशालभित्ति-,र्लिप्ता दधौ स्वर्णमयीत्वमन्तः।
सभासु यस्या प्रतिमप्रभस्य,
स धर्मनाथो विमलश्च वोऽव्यात् ॥ ४

जज्वाल नैवाङ्गजवाडवाग्नि-, रत्नैर्ययोर्वीरगभीरवृत्त्योः ।
तौ रक्षतामद्भुत-रत्नराशी, सुपार्श्व-चन्द्रप्रभ-तीर्थनाथौ ॥ ५

सम्पादिताशेषजगद्धितार्थं, कारुण्य-पण्यापणमग्र्यनाथम् ।
दृष्टिप्रसादं प्रणयीव याचे, श्रेयांसमुच्चैर्मुनिसुव्रतं च ॥ ६

विलोचनानन्द-सुधौघवर्ष-, मथाङ्कदोषेतरभावसत्कात् ।
चन्द्रोपमातीमखण्डमूर्त्ति-, मर्हन्मुनि मल्लिजिनं च सेवे ॥ ७

कर्मारिवार-प्रमथैक-वीरान्, शरण्यसारक्रमविश्रुतांश्च ।
श्येनाश्वकानन्तकसम्भवेनान्, समाश्रये क्रोध-सुयोधभीरुः ॥८

रक्तानि सून्निद्रनखोरुरोचिः-, किञ्जल्कसम्भारमनोहराणि ।
कुन्थोरनन्तस्य च पादपद्मा-, न्युपास्महे श्रीरतिमन्दिराणि ॥९

निर्दोष-निःशेष-गुणोपपन्न-, मुक्त्यङ्गना-रक्ततयैव मन्ये ।
त्यक्तान्यरामाविसरं सुभक्त्या,
ऽभिनन्दनं श्रीसुमतिं च वन्दे ॥ १०

शुक्लद्वयं तावदतीन्य लब्ध-, ज्ञानोदयस्तत्परतो द्वयेन ।
अमूल्यकाप्ताऽतुलनिर्वृतिश्री-,
दिव्वाभरणभूषिता सुरवरवनिता रे ।
भक्तिभरनमित्ता रे निजनिजनायकसहिता रे ॥ २२

हरिप्रियाप्रेरिता वेणवीणाकलिता रे ।
समश्रुतिमिलिता रे श्रीरागादिक गाता रे ॥ २३

तालरवमात्रिता मुरुजव्यापृता रे ।
नवअभिनयिता रे नर्त्तितसुराधिपदयिता रे ॥ २४

नाटिकनाटिका संसारविघटिता रे ।
समरसघकुटिता रे जिनयुगलार्चनललिता रे ॥(संस्कृतम्) २५

इत्थं मेऽजितशान्तिसद्गुणगणाऽऽविर्भावनाभाविनां
कुर्वाणेन यदर्जितं शममलं तेनाऽस्तु सौख्यं जने
श्रीपूज्यस्य चिरायुषोऽस्तु विजयाद्दानस्य पत्सेविना
श्रीराजाद् विजयाह्वयेन विधिना भाषाविमिश्रं शुभम् ॥ २६
(शा.वि.)

पू.मु. श्री लावण्यविजयकृतम्

## ३१. ॥ श्रीअजितशान्तिस्तोत्रम् ॥

मेरुविजयविबुहाणं विबुहाणं जणिअवंछिअसुहाणं ।
पयजुअलं नमिऊणं थुणामि सिरिअजिअ-संतीणं ॥१ (गाहा)

विणया णमिरणरिंदे गुणगणरयणाण रोहणगिरिंदे ।
जय जयजणणसुरिंदे णमामि ते णं जिणवरिंदे ॥ २ (गाहा)

सिलोगपुण्णलोयाणं ताणं समवलोअणं ।
ताणं निम्मललोआणं कयनिम्मललोअणं ॥ ३ (सिलोगो)

अरयमयप्पयारणे मह विबुहप्पडिबोहकारणे ।
कणयकयकयप्पयारणे पणिवइमो सइ जिणिंदवारणे ॥ ४
(मागहिआ)

मयणुम्मयणुग्गमणुम्महणे मयणासहणं
अजिअस्स य संतिजिणस्स अवस्स गुणग्गहणं ।

पकुणंति जणाण गणा विहिणा णिरया सहणं
सहलं इह होइ हु ताण सपा(या?)णसमुव्वहणं ॥ ५
(आलिंगणयं)

अजिअं जिअमोहजालयं कलिमस्स जलणुव्व जालयं ।
पुण संतिजिणं गुणालयं सइ समरेमि जिआण पालयं ॥ ६
(मागहिआ)

रमणिमणिमणणविरमणजणयमणुअसरणं
निअभणिअवयणविहणिअअमिअमणहचरणं ।
समणमणिगयणविमुणिअणहमणिअणुसरणं
णमयमयपमयमजिअमहिलजणा जणमणहरणं ॥(संगययं) ७

कारयकारयमारयवारयसारवई
सावयतावयआवयलावयभावरई ।
दिज्जउ निव्वुइरज्जमवज्जविवज्जणई
संतिवई विअ सेवयदेवयदेववई ॥ (सोवाणयं) ८

सम्मत्तवित्तिरत्तकित्तिअवरुत्तिजुत्तिसहिउत्तरुत्तमसुत्तयं
अमिअकित्तिकंतं विहलिअलीलावईवरविलासहासणिवास-
भासिअं । पुण्णपण्णयं विण्णभिण्णदिण्णं
देवदणुअमणुअणिअरमणरंजणं अजिअतित्थणाहमह
य संतितित्थणाहं विणयपणओ थुणामि सवण-
सवणिज्जरमणिज्जणामगहणुब्भ (?) यजणियसयलसिवं ॥९
(वेढो)

अजिअस्स य संतिजिणस्स य सप्पणयं नमुंसणयं ।
तुरिअं दुरिअं हरउ छज्जीवणिकायअहिवइणो ॥ १०
(रासालुद्धो)

सावत्थिअपत्थिवाण सत्थ ... त्थयमणिज्जिअसत्तु,
पवित्तगुत्तसयवत्त-पंतिप्पबोहणुत्तमसयवत्तमित्तदित्तय-
मणंतसत्तमजिअं । हत्थिणाउरणयरवइ-विस्ससेणणरवइपुत्तं
संतितित्थयरं । पुण पणिवयामि पणयणयणिम्मिअ-
अमिअविणयपरिअरिओ
मुणिअणगणमणिसमाणमणणं संमाणिअ-
मसमाणणिउणेहिं णिम्मयणिव्वुइ णिव्वुइसाहणयं ॥(वेढो)११

अजिअं विजयातणयं अभिभूअरमातणयं ।
संतिं पुणो वि जिणं मणम्मि समरेमो ॥ (रासानंदिअं) १२
अजिअ-संतीहिं जिणेहिं भणिअवयणगहणमणा
अत्थि जो मणुअगणो सो ण कयावि हु हवइ विमणा ।
जो पुण अनिउणो तव्वयणअणुसरणं ण पकुणेइ पमणा
सो पावइ अइबहुअं बहुसो दुक्खं णिरयगमणा ॥ १३
(चित्तलेहा)

भत्तिजुत्तअत्तसत्तकित्तपत्तवित्तसत्तवित्तसरण
उत्तिमुत्तिमुत्तिजुत्तिपंत्तिसुत्तभंत्तिरत्तसरण ।
अत्तपत्तगुत्तसत्तसत्तिदित्तदित्तिजुत्त अजिअ
सव्वसव्वभव्वनव्वनव्वभव्वपव्व
संति सव्वणाह पुण पइस सिवं मे ॥ १४

सयलसुहाणं विहायगाणं तमतिमिरक्खयपायणायगाणं ।
अजिअ-संति तित्थनायगाणं अइपणयाण य देवणायगाणं ॥१५
(कुसुमलया)

विहणउ जिणाण वयणं मह दुरिआणि अमिअवयणं ।
मह गव्वकयव्वयणं कुण य गणविरइआवयणं ॥ १६
(भुअगपरिरिंगिअं)

तेअमईहिं भाविअरई जय अजिअवई
वेअमईहिं भाविअरई जय अजिअवई ।
भेअमईहि भाविअरई जय अजिअवई
गेअमईहिं भाविअरई जय अजिअवई ॥ (खिज्जिअयं) १७

तित्थवइणिसावई जय जयइवई
संती विव सहगई हणिअरइवई ।
संजइणिम्मिअरई विरइअविरई
संति रसां रसावई अइवरपयई ॥ (ललिअयं) १८

सुमुहप्पह सलिलरुहपहाविहसणसाहणप्पहिअं
पणयाणयमणुअमणुअवइणिम्माविअअणप्पहिअं ।
चउतीसणिरतिसा(सया)इसयअइसयविसररमासहिअं
अजिणं पुण संतिजिणं पणिवइमो सुर(र)मणीमहिअं ॥ १९
(किसलयमाला)

णयणजुअविजिअखंजणं मोहजोहकयभंजणं ।
माणवाण मणरंजणं विहिअसिद्धिअहिसंजणं ॥ (सुमुहं) २०

अहयं अहयं अहयं अहयं ।
सुहयं उहयं पि जिणाण णया ॥ (जुअलं )(विज्जुविलसिअं) २१

सावया साविआय सुद्धभावभाविआ,
अजिअ-संतिजिणचलणजुअल-पूअणमणुदिणं
पकुव्वंता पणया ण वडंति अवारभवकूवमज्झे ॥ (वेढो) २२

जलरुहगेहा सोहणपेहा निहिलअगेहा मयकयवेहा
बहुविहमेहा हणिअसिणेहा बहुदुहलेहा विहिअसिणेहा ।
मयदवमेहा मोहणपेहा गुणिअणरेहा जणिअजणेहा
णयणरलेहा महिअअदेहा णिरुवमदेहा हयसंदेहा ॥ २३
(रयणमाला)

अजिअसंति परिमिट्ठिणायगा हुंतु ते मह सुहस्स दायगा ।
वयणणिज्जिअरयणिणायगा दाणसीलतवभाववायगा ॥ २४
(खित्तयं) (जुअलं)

मंगलावलिलयाबलाहगा सव्वुदग्गउवसग्गसाहगा ।
संजमाण ण मणा विराहगा सग्गमुत्तिवरमग्गवाहगा ॥ २५
(खित्तयं)

माणवाण मयभेअविहाणा रोगसोगहिंसगअभिहाणा ।
मोहजोहमुहरोहपिहाणा सोहमाण वरनाणपहाणा ॥ (दीवयं) २६

अमिअअमिअसमवाया विहणिअणिरयअवाया
जाण अमाणव-माणव-दाणवपणमिअपाया ।
मुणिअणगणगयणंगणि गयणमणीसमकाया
संतु अजिअसंति जिणवरराया विरइअसाया ॥ २७
(चित्तक्खरा) (त्रिभिः कुलकम्)

पाव पाव भाव आव आव वाव आव गाव नाव नाम जावए
सव्वदेव सारसेव णेगहेव णेगदेव देवदेव पुहविदेव
पावबहुललेवखवए ।
तिलोगलोगरोगसोगविप्पओगभोग-
जोगसोवओग जोग संगदायए
अजिअसंतिणायए ॥ (नाराओ) २८

निमिमो निरवाए, महिमासमवाए ।
मम यारयवाए अमिओवमवाए ॥ (नंदिअयं) (यु.) २९

समवीसवाया .... आवणा
सिअ परमेसरया णीसरिअअसाया ।
सुविहिअवीसा वीसु असिसा, सारयससिसमभासिअआसा ।
अजिअमुणीसर-संतुमुणीसा, दिंतु सुहं मह पूरिअआसा ॥३०
(भासुरयं)

रोसदोसपोसमोसघोसकोसजोसजोसमोसतोसपोसया,
असमसदेसदेसआसिअ सुविसेसलेसभासिअ
सुवसेस सुसमदेसईसतोसया ।
अभंगमंगुलंगसागरंगजंगजम्मरंगआगरंग-
नंगवग्गुवंगसंगसारवंगचंगभंग-
भंगलिंगमंगअंतरंगरंगरंगरंजिआ,
लसंतु वंतु वेत जंतु मंतु प(पं)तिसंति पसिअ अजिअ -
संतितित्थवा
अनंतसत्तिकित्तिजुत्तिराजिआ ॥ (नाराओ) ३१

तुम्ह नामेहिं मह अब्भहिअसंपया,
तुम्ह नामेहिं मह आमनिवहा हया ।
तुम्ह नामेहिं चिंता महमभिहया,
तुम्ह नामेहिं मह अंतहिअ आवया ॥ललिअयं (जुअलं) ३२

अजिअसुसंती असिवुवसंती संचिअसंती अवहयसंती ।
सेवे संतीकयभयपंती गइहयदंती स(सु)रवरकंती ॥ ३३
(वाणवासिआ)

जेहिं मोहनिवहा समाहया जे अ सिद्धिपहसत्थवाहया ।
संतु ते अजिअसंतिनाहया अम्ह कम्ममहणप्पसाहया ॥ ३४
(अपरांतिका)

नाणाणं आवरणं आवरणं दंसणाणमिह बीअं ।
वेअणिअं अह तइअं तुरिअं तह होइ मोहणिअं ॥(गाहा) ३५

आउं पुण पंचमयं नामं कम्मम्मि कम्ममह छट्ठं ।
तह गुत्तं सत्तमयं विग्घं तह होइ अट्ठमयं ॥ (गाहा) ३६

पण-नव-दु-अट्ठवीसा चउरो तह तिगहिअं सयं दो अ ।
पंच य इअ भेएहिं कमसो अडवन्नसयमेसिं ॥ (गाहा) ३७

एआणं कम्माणं पहावओ अजिअ-संतिजिणनाहा ।
भमिओ भवम्मि संपइ तुम्हं सरणं पवन्नो हं (च.क.)॥ ३८
(गाहा)

मेहाविहिमपहाणं विबुहाणं मेरुविजयअभिहाणं ।
संथुअमिअ सीसेणं जुअलं सिरिअजिअ-संतीणं ॥ ३९

एअं अयलावण्णं मंगलमालं सयाउलावण्णं ।
कुणउण्णयलावण्णं विहिअमहाणंदलावण्णं ॥ ४०

महामन्त्रगर्भितः

## ३२. ॥ श्रीअजितशान्तिस्तवः ॥

सिरिरिसह-अजिअ-संभव-अभिनंदण-सुमइ-सयप्पह-सुपासा ।
चंदपह-सुविहि-सीअल-सिजंस-वसुपुज्ज-विमल-णंता ॥१

धम-संति-कुंथु-अर-मल्लि-सुवय-नमि-पास-वीर-तेवीसं ।
जिणपुंडरिआ पुंडरिअपव्वए जत्थ समुसरिआ ॥ २

वासासु विहिअवासा सुविहिअसित्तुंजए अ सित्तुंजे ।
तहिं रिट्ठनेमिणो रिट्ठनेमिणो वयणओ जे उ ॥ ३

देविंदथुआ थुणिआ वरविज्जा णंदिसेणगणिवइणा ।
समयं वरमंतसधमकीत्तिणा अजियसंतिजिणा ॥ ४

तेहिं पि अजिअसंती थुणामि रागाइरिउअजिअसंती ।
विउलतउज्जियसंती संपाइअतिजयजिअसंती ॥ ५

असुरिंदसुरिंदनरिंदचंदनागिंदबंदिवंदेहिं ।
वंदिअपयारविंदे वंदे जिअसंतिजिणचंदे ॥ ६

अजिअजिओ दुज्जयनिज्जिअतिजयंतरारिजाएण ।
तिजईसो तिजईससोहिओ जयउ जिणनाहो ॥ ७

सत्ताणं सत्ताणं संताणं कुणइ संतसंताणं ।
संति य संतिकय उवसंती संतिकयउवसंती ॥ ८

पणवउत्ति नमो भगवओ अरिहओ जिअस्स सिज्जउ मे ।
संतिस्स य स भयवई जं महइ सया महाविज्जा ॥ ९

अजिअ सरइं अजिए रिऊहि अपराजिए जयम्मि सया ।
माहप्पराजिए अ णिहए असंवाहाबलेहिंपि ॥ १०

जो कुणइ लोगसारे भत्तिपट्टिठिई पसाहेइ ।
लहुसव्वकामिअत्थे पुण्णसया सोहइ सया सो ॥ ११

जे संति संतिभत्ता कयासिवपसंति समुवसंतिपरा ।
सव्वं पावं असुहं उवसाहिंति अ दुहं ते ॥ १२

इट्ठट्ठं साहंति अ संतिं संतिण्णदुप्पयाइभया ।
अविरोहजुआ रोहंति निरुवसग्गं निरुवसग्गं ॥ १३

इअ अजिअसंतिजुअलं विमलं विमलगिरिसंठिअं सययं ।
खुद्दोवद्दवविंदं विद्दावइ दुअं नमंतस्स ॥ १४

जइ मग्गइ उग्गसमग्गदुग्गउवसग्गसंगदुक्खलयं ।
ता सरह सयलमंगलकल्लाणावलिनिलअमेअं ॥ १५

डाइणि-जोइणि-वेआल-जक्ख-रक्खस-पिसायभूआणं ।
न हु भवइ तस्स भयं जो सरइ थयं भयहरं एअं ॥ १६

इअ अजिअसंतिथुत्तं पक्खिअचउमासवच्छरपउत्तं ।
जो पढइ सुणइ सम्मं सो पावइ सिवसुहं रम्मं ॥ १७

पू. आ. श्री जिनवल्लभसूरिविरचितम्

## ३३. ॥ श्रीलघुअजितशान्तिस्तवनम् ॥

उल्लासिक्कमणक्खनिग्गयपहादंडच्छलेणंऽगिणं,
वंदारूण दिसंत इव्व पयडं निव्वाणमग्गावलिं ।
कुंदिंदुज्जलदंतकंतिमिसओ नीहंत नाणं कुरु-
क्केरे दोवि दुइज्जसोलसजिणे थोसामि खेमंकरे ॥ १
(शार्दूलविक्रीडित)

चरमजलहिनीरं जो मिणिज्जंऽजलीहिं,
खयसमयसमीरं जो जिणिज्जा गईए ।
सयलनहयलं वा लंघए जो पएहिं,
अजियमहव संतिं सो समत्थो थुणेउं ॥ २

तहवि हु बहुमाणुल्लासिभत्तिब्भरेण,
गुणकणमवि कित्तेहामि चिंतामणिव्व ।
अलमहव अचिंताणंतसामत्थओ सिं,
फलिहइ लहु सव्वं वंछियं णिच्छियं मे ॥ ३

सयलजयहियाणं नाममित्तेणं जाणं,
विहडइ लहु दुट्ठाणिट्ठदोघट्टथट्टं ।
नमिरसुरकिरीडुग्घिट्ठपायारविंदे,
सययमजियसंती ते जिणिंदेऽभिवंदे ॥ ४

पसरइ वरकित्ती वड्ढए देहदित्ती,
विलसइ भुवि मित्ती जायए सुप्पवित्ती ।
फुरइ परमतित्ती होइ संसारछित्ती,
जिणजुयपयभत्ती ही अचिंतोरुसत्ती ॥ ५

ललियपयपयारं भूरिदिव्वंगहारं,
फुडघणरसभावोदारसिंगारसारं ।
अणिमिसरमणीजद्दंसणच्छेयभीया,
इव पणमणमंदा कासि नट्टोवहारं ॥ ६

थुणह अजियसंती ते कयासेससंती,
कणयरयपिसंगा छज्जए जाण मुत्ती ।
सरभसपरिरंभारंभिनिव्वाणलच्छी-
घणथणघुसिणंकुप्पंकपिंगीकयव्व ॥ ७

बहुविहणयभंगं वत्थु णिच्चं अणिच्चं,
सदसदणभिलप्पालप्पमेगं अणेगं ।
इय कुनयविरुद्धं सुप्पसिद्धं च जेसिं,
वयणमवयणिज्जं ते जिणे संभरामि ॥ ८

पसरइ तियलोए ताव मोहंऽधयारं,
भमइ जयमसन्नं ताव मिच्छत्तछन्नं ।
फुरइ फुडफलंताणंतणाणंसुपूरो,
पयडमजियसंती झाणसूरो न जाव ॥ ९

अरिकरिहरितिण्हुण्हंबुचोराहिवाही-
समरडमरमारीरुद्दखुद्दोवसग्गा ।
पलयमजियसंतीकित्तणे झत्ति जंती,
निबिडतरतमोहा भक्खरालुंखियव्व ॥ १०

निचियदुरियदारुद्दित्तझाणग्गिजाला-
परिगयमिव गोरं चिंतियं जाण रूवं ।
कणयनिहसरेहाकंतिचोरं करिज्जा,
चिरथिरमिह लच्छिं गाढसंथंभियव्व ॥ ११

अडविनिवडियाणं पत्थिवुत्तासियाणं,
जलहिलहरिहीरंताण गुत्तिट्ठियाणं ।
जलियजलणजालालिंगियाणं च झाणं,
जणयइ लह संतिं संतिनाहाजियाणं ॥ १२

हरिकरिपरिकिन्नं पक्कपाइक्कपुन्नं,
सयलपुहविरज्जं छड्डिउं आणसज्जं ।
तणमिव पडिलग्गं जे जिणा मुत्तिमग्गं,
चरणमणुपवन्ना हुंतु ते मे पसन्ना ॥ १३

छणससिवयणाहिं फुल्लनीलुप्पलाहिं,
थणभरनमिरीहिं मुट्ठिगिज्झोदरीहिं ।
ललियभुयलयाहिं पीणसोणित्थलीहिं,
सय सुररमणीहिं वंदिया जेसि पाया ॥ १४

अरिसकिडिभकुट्ठग्गंठिकासाइसार-
क्खयजरवणलूआसाससोसोदराणि ।
नहमुहदसणच्छीकुच्छिकन्नाइरोगे,
मह जिणजुयपाया सुप्पसाया हरंतु ॥ १५

इय गुरुदुहतासे पक्खिए चाउमासे,
जिणवरदुगथुत्तं वच्छरे वा पवित्तं ।
पढह सुणह सज्झाएह झाएह चित्ते,
कुणह मुणह विग्घं जेण घाएह सिग्घं ॥(२-१६ मालिनी) १६

इय विजयाजियसत्तुपुत्त ! सिरिअजियजिणेसर !,
तह अइराविससेणतणय ! पंचमचक्कीसर ! ।
तित्थंकर ! सोलसम संतिजिण ! वल्लह ! संथुअ,
कुरु मंगलमवहरसु दुरियमखिलं पि थुणंतह ॥ (द्विपदी) १७

पू.मु.श्री वीरगणिकृतम्

## ३४. ॥ श्रीलघुअजितशांतिस्तवनम् ॥

गब्भअवयार सोहम्मसुरसामिओ,
जणणि जेय संथुणइ भत्तिभरभाविओ ।
ति जिण इक्खागकुरुवंसभूषणधरा,
अजियसंती य नंदंतु मंगलकरा ॥ १

जम्मकालंमि जे असुरसुरभासुरे,
न्हविय बत्तीस इंदेहि सुरगिरिसिरे ।
खयरनरअमरआणंदवद्धारया,
जयउ जगि अजियसंती य भट्टारया ॥ २

खविय-रिउवग्ग-वररज्जसुह-माणिउं,
पवरदाणेण जगसयल-संमाणिउ ।
जेहिं मुक्खंकरी दीक्ख-कंखीकया,
ताहि थुणि अजियसंती य पयपंकया ॥ ३

घोरतवचरणउवसग्गु अहियासिउं,
दुज्जए घाइकम्माइं निन्नासिउं ।
जेहिं नाणं समुप्पाडियं विमलयं,
दुइयसोलसमजिण ति जण मह सुविणयं ॥ ४

पवरदेसणय-तिहुयणवि पडिबोहियं,
भवोवग्गाहि-कम्माइं मसमूरियं ।
पवरसुहपरमनिव्वाणपुरि जे गया,
हठ्ठ ते नमह जिण अजिअसंती सया ॥ ५

कुविअ-रिउवग्ग हरि सरह गय जोयणी,
भूय वेयाल अहि रक्खसी डायणी ।
तासु उवसग्ग कीरेइ नासेसयं,
हियइ जो एहु समरेइ जिणजुअलयं ॥ ६

जइ न अहिलसह दालिद्दोहग्गयं,
तुम्ह अहिलसह जइ लच्छिसोहग्गयं ।
भवह जइ भीअ जइ सिवसुहासत्तया,
हवह एयस्स जिणदुगइ तो भत्तया ॥ ७

एय संवच्छरिय पक्खिय चउमासिए,
अजियसंतित्थयं भणइ जो निसुणइ ।
कहइ कविवीरगणि भविअजणअग्गए,
असुह तसु जाइ सुहसयल संपज्जए ॥ ८

पू. सकलचन्द्रवाचक-बालकमुनिश्रीशान्तिचन्द्रविरचितः

अजितशान्तिस्तवनसमम्

## ३५. ॥ श्रीऋषभवीरस्तवनम् ॥

सकलार्थसिद्धिसाधन-हरिचन्दनचारुचरणपरिचरणौ ।
काञ्चनकजसञ्चरणौ निरुपाधिज्ञानवरचरणौ ॥ १

परमपुरुषार्थगतये पुरुषोत्तमधर्मदेशिनौ वन्दे ।
पुरुषवरपुण्डरीकौ पुरुषोत्तमऋषभवीरजिनौ ॥ २

(आर्यायुग्मम्)

स्तवनं कमलाकेलिभवनं विश्वपावनम् ।
मूलं मङ्गलमालायाः स्तवनं जिनचन्द्रयोः ॥ ३

(अनुष्टुप्-मागधिका)

अणुरपि जिन ! योऽभवद् गुणो निखिलतया खलु केन वर्ण्यते।
तदपि गुणवतां गुणग्रहो भवति विशालफलाय केवलम् ॥ ४

(आलिङ्गनकम्)

चिकुरावलिकान्तिकदम्बकरम्बितकायरुचं
दरवातहताम्बुदसुन्दरमेरुमिवोल्लसितम् ।
तदये ! हृदये हृदयालुजनस्मरवीरशुचं
जिननाभिभवं जननाभिभवं यदि नेच्छसि तम् ॥ (मागधिका)५

सुतरां सुतरो भवो भव, जननजराजटिलोपि साम्प्रतम् ।
मम पश्यत एव तावकं दर्शनमन्तिमं देवपावकम् ॥ ६

(सङ्गतकम्)

विनमदमरनरनिकरमुकुटतटघटित
मणीशुचितररुचिरुचिरमुपचिततिमिरहरम् ।

अभिनवनवकनक-कमलपरिकलितमृदुतलं
प्रथमजिनपदयुगलमपगलितमलमनिशमवतु माम् ॥ ७
(सोपानकम्)

ऊजसि तेजसि राजासिताभ्रसिते
यशसि व्यातमसूत सुतं मरुदेवि सुदेवि तथा ।
पुण्यवती भवती भुवि दीपशिखेव
महो विश्वजनेषु तमोहरणेन तथोपकृतम् ॥ (वेष्टकम्) ८

नरहस्तिगन्धहस्तिनं स्तुतसमस्तवस्तुविदमस्तविस्तारिपातकं
निःसपत्नरत्नं प्रमुदितवन्दारुवृन्दमिम-
मिन्दुकुन्दमन्दारसुन्दरं यशो बिभ्रतं ।
चरमदेवदेवं देवदनुजसुमुनिजन-
पूजितातिशयराजितं विजितमत्तमोहमल्लं जातजयपताकिकं च
चतुरचतुरन्तवरधर्मचक्रवर्त्तिनमनुपमशमदमदम् ॥ ९
(रासकलुब्धकम्)

तव वीर वीर यशो, जगतीत्रितयं चमत्कुरुते ।
त्रिशलासुतशिशुतार्जितमन्दोलितमंदराद्रिभवम् ॥ १०
(वेष्टकम्)

मधुकरकुलकालिमाचिकुरचारिमाशरदष्टमीशशाङ्कानुकारिशोभं
विशालभालं भ्रूयुगमपवारितत्रिदशपति-
धनुरनुपमलवणिमरसवती ।
उन्मीलन्नीलनलिनजयिनी पवित्रनेत्रे विकसिततिलकुसुमसमा
च नासिकाऽधर युगलं सुभगं सुकुमालबालदलरुक्
श्रवणयुगं रतिपतिरतिलीलापाशायमानमान-
नमादिदेवोज्ज्वलदशनमिवाम्बुजं सकुसुमम् ॥ ११
(रासकनन्दितकम्)

धाराधरधीरगुरुध्वनितं जनितप्रमदम् ।
ग्रीवापि रमापतेः कम्बोर्विडम्बिनी ॥ चित्रलेखा १२

श्रीवत्सलाञ्छितमुरो गुरुघनकनकदण्डरुचिरौ
भुजौ कमलकोमलाङ्गुलिकरौ नखशोणमणिधरौ ।
कुसुमाशनकूपकेसरिकिशोरकरिकरकनककमठसमं
रोमालिनाभि कटिजङ्घाचरणं अयि रूपमपि ते ॥ १३
त्रिभिर्विशेषकम् ॥ नाराचकः ॥

ध्येयगेय-नामधेय-भागधेयसन्निधेय-हेयरहित-हस्तिराजमानयान वर्द्धमानदानवारिमहित साधुगन्धसिन्धुराय शुद्धबुद्धिबन्धुराय जिनप मग्नभिक्षुसङ्गमाय मुक्तमाय निःसमाय निस्सहाय मम नमोऽस्तु तुभ्यम् ॥ कुसुमलता ॥ १४

विषयविषविखादनाद्विषणं, निजनिकटैकनिषेवणे निषणं ।
चरमजिनप ! मामवेहि भृत्यं,
रचय चिकित्सक राजसौवकृत्यम् ॥भुजङ्गपरिरिङ्गितकम् ।१५

मर्दितमदनाभिभवं, जगद्व्यवस्थितिनाभिभवं ।
को हि भजति नाभिभवं, प्रयियासुर्जिननाभिभवम् ॥ १६
क्षिज्जितकम् ।

कपिकलापि कौतुककरी तव कितवकला,
मोहमहारिचञ्चलचमूर्विचरति सबला ।
या भटकोटिबन्धनकरी त्रिजगति भवता,
ज्ञातसुजातसाऽऽहतकथं समरसमवता ॥ (ललितकम्) १७

सर्वभुवनसार्वभौम निजशिरसिकैर्नागनरनभोगमैःप्रसादरसिकैः।
पुण्यरचनकर्मणि प्रथममणुगणा,
दधिरे च नर्षभ तव चरणरेणुकणाः ॥ (किसलयमाला) १८

भगवन्निदमपि कृतकं वचो ननु तेन तवानिहितः
पद पांशुरपांसुलेन शिरसि द्विजेन निजे निहितः ।
कमलाविलासिनीवश कर्मचतुर चूर्णमुष्टिनिभो,
निरवासयदचिरादपि चिरपरिचितरोरमेक विभो ! ॥ १९
(सुमुखम्)

जयति जय तिलकधारिणी, परिकल्पितमदहारिणी ।
मारु देव तव भारती विदधती यतिसभा रतीः ॥ २०
(विद्युद्विलसितम्)

जगदुद्धरिणी, त्रिपदी धरणी ।
तमसां हरणी, यशसां करणी ॥ (युग्मम्-वेष्टकम्) २१

बिभ्रती समदमन्दहासमसुरसुरसुरकिन्नरनरमुनिमृग
वागुराजङ्गम-पापभरसङ्गमसुराधमवनिता
जनितानन्लोचनवचनविकारा ॥ (रत्नमाला) २२

रतिकररूपा प्रीतिरूपा गतिजित दम्भारातिसकुम्भा,
विपुलनितम्बा काञ्चनकम्बा बिम्बाधरपीवरकुचकुम्भा ।
कोकिलकण्ठी कम्बुककण्ठी कण्ठीरवकटिरसनारावा,
मदनमहाभटभूभवनायितनाभिनिभालनभाषितभावा ॥ २३
(क्षिप्तकम्)

मुखरमञ्जुमञ्जीरराजिनी, कनककुण्डलललामभाजिनी ।
मुद्रिकावलयहारमण्डिता वेणिबन्धपरिकर्मपण्डिता ॥ २४
(द्वितीयं क्षिप्तकम्)

स्मेरकुन्ददशना सुलोचना पात्रभङ्गिसुभगा शुभानना ।
रुन्धती श्वसितलालसालिनो लोलकेलिकमलेन पाणिना ॥२५

(दीपकम्)

पारिजाततरुपुष्पवतंसा ललितविवेककलाजितहंसा ।
चतुरवेषविधिनटितसदंसा प्रकटीकृतनिजदम्भरिरंसा ॥ २६

(चित्राक्षरा)

जिनमालिङ्गति काचन कदलीदलसुकुमाला-
निजभुजलतया किल काचन पाशं रचयति बाला ।
पटु चाटु वचनमपि घटयति काचन मोहनशाला
कापि सलीलं मुञ्चति कुटिलविलोकितमालाः ॥ २७

(अपरनाराचक्रम्)

ग्रामरागतारमन्द्रमध्यतार थेइकारशब्दसारमूर्छना मधुरसप्त-
वर्गमानतानमानशोभमान गीतगानमेकतानमेव कापि सृजति ।
नटति कापि करणबन्धचारुचारिकाङ्गहारताल-
मेलनादिचतुरमेकधीरवीर सापि न तव ध्यानभिदाकरी ॥२८

(सप्तभिः कुलकम् नन्दितकम्)

प्रथमं गुणवन्तं, चरमं भगवन्तम् ।
प्रभुताविभवं तं, भज भोः शुभवन्तम् ॥ (भासुरकम्) २९

जिन मारुदेवो जयति युगादिदेवो युगादितमोभरभरित
भरते सविता । नाभिनृपतिकुलगगनविलासी, भविककमलवन-
खण्डविकासी मोहगहनमतिरजनिविनाशी
तेजोधनजनतापरिहासी ॥ (अपरनाराचकम्) ३०

देवसालशालिपुष्पकर्णपूरलालसालिजाल-
गुमगुमायमाननादकुपितगगनगामिकामिनीभिरादिदेव
तावकीनपीनयशसि सप्रमोदनोदिताभिराजसुन्दरातिसुन्दरेषु

मेरुकाननान्तरेषु सुप्रवीणवेणुवादिवाद्यवादना-
सादराभिरेकरीतिगीतिमार्गघोलनावतारिते
कामधेनुदुग्धपानपारिजात-फलवितानलेहनातिशायि
सातमनुभवैकगम्यमजनि वासवेषु ॥ (अपरललितकम्) ३१

वीर या जगति तुङ्गवीरमदवाहिनी,
जगदजगरगुरुकर्मरिपुविपुलवाहिनी ।
त्रिभुवनैकसुभट ! मे विधेहि सहायतां,
येन जिनेश ! जयामि सुखेन शिवाय ताम्(वानवासिका) ॥३२

अकर्मसिद्धौ मलैर्निषिद्धौ स्वभावशुद्धौ स्वयम्प्रबुद्धौ ।
जिनेषु वृद्धौ गुणैः समृद्धौ मया निरुद्धौ हृदि प्रबुद्धौ ॥ ३३
(अपरान्तिका)

आदिमान्तिमजिनौ नमामि तौ नेमुषां सपदि दत्तकामितौ ।
यद्बलेन सहसैव नामितौ द्वेषरागसुभटौ बलामितौ ॥(आर्या)३४

इति मतिमूढे न मया नीतं नुतिगोचरं जिनपयमलम् ।
सुरलालितपदकमलं नाशयतु सतामनादिमलम् ॥ ३५

खण्डितपरपाखण्डं करिराजकरप्रचण्डभुजदण्डम् ।
कीर्तिलतावनखण्डं ज्ञानादिकगुणमतिकरण्डम् ॥ ३६

शान्तरससुधाकुण्डं जिनपुङ्गवयुगलकं गलितदण्डम् ।
पावितभारतखण्डं ददातु मम शिवसुखमखण्डम् ॥ ३७

सम्प्रति सुविहित-यतिपति, सूरिश्रीहीरविजयगुरुराज्ये ।
श्रीसकलचन्द्रवाचक, बालकमुनिशान्तिचन्द्रेण ॥ ३८

कवितामदपरिहारान्नुवता विमलाशयेन जिनराजौ ।
यदवापि सुकृतमतुलं संघे शान्तिर्भवतु तेन ॥ ३९

पू.आ.श्री मानतुङ्गसूरिविरचितम्

# ३६. ॥ श्रीभक्तामरस्तोत्रम् ॥

(वसन्ततिलका)

भक्तामर-प्रणत-मौलि-मणि-प्रभाणा-
मुद्द्योतकं दलित-पाप-तमो-वितानम्;
सम्यक् प्रणम्य जिन-पाद-युगं युगादा-
वालम्बनं भवजले पततां जनानाम् ॥ १

यः संस्तुतः सकल-वाङ्मय-तत्त्व-बोधा-
दुद्भूत-बुद्धि-पटुभिः सुर-लोक-नाथैः
स्तोत्रै र्जगत्त्रितय-चित्तहरै-रुदारैः
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ (यु.) २

बुद्ध्या विनाऽपि विबुधा-र्चित-पादपीठ !,
स्तोतुं समुद्यत-मति र्विगत-त्रपोऽहम्;
बालं विहाय जल-संस्थितमिन्दुबिम्ब-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ॥ ३

वक्तुं गुणान् गुण-समुद्र ! शशाङ्क-कान्तान्,
कस्ते क्षमः सुरगुरु-प्रतिमोऽपि बुद्ध्या ? ।
कल्पान्त-काल-पवनोद्धत-नक्रचक्रं,
को वा तरीतुमलमम्बु-निधिं भुजाभ्याम् ? ॥ ४

सोऽहं तथापि तव भक्ति-वशान्मुनीश !,
कर्तुं स्तवं विगतशक्तिरपि प्रवृत्त;
प्रीत्याऽऽत्मवीर्य-मविचार्य मृगो मृगेन्द्रं,
नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥ ५

अल्पश्रुतं श्रुतवतां परिहास-धाम,
त्वद्भक्तिरेव मुखरीकुरुते बलान् माम् ।
यत्कोकिलः किल मधौ मधुरं विरौति,
तच्चारु-चूत-कलिका-निकरैकहेतुः ॥ ६

त्वत्संस्तवेन भव-सन्तति-सन्निबद्धं,
पापं क्षणात्क्षयमुपैति शरीर-भाजाम् ।
आक्रान्त-लोक-मलि-नील-मशेष-माशु,
सूर्यांशु-भिन्नमिव शार्वर-मन्धकारम् ॥ ७

मत्वेति नाथ ! तव संस्तवनं मयेद-
मारभ्यते तनु-धियाऽपि तव प्रभावात् ।
चेतो हरिष्यति सतां नलिनी-दलेषु,
मुक्ता-फल-द्युति-मुपैति ननूद-बिन्दुः ॥ ८

आस्तां तव स्तवन-मस्त-समस्त-दोषं,
त्वत्संकथापि जगतां दुरितानि हन्ति ।
दूरे सहस्रकिरणः कुरुते प्रभैव,
पद्माकरेषु जलजानि विकास-भाञ्जि ॥ ९

नात्यद्भुतं भुवन-भूषण ! भूतनाथ !
भूतै र्गुणै र्भुवि-भवन्तमभिष्टुवन्तः ।
तुल्या भवन्ति भवतो ननु तेन किं वा,
भूत्याश्रितं य इह नात्म-समं करोति ॥ १०

दृष्ट्वा भवन्त-मनिमेष-विलोकनीयं,
नाऽन्यत्र तोष-मुपयाति जनस्य चक्षुः ।
पीत्वा पयः शशिकर-द्युति-दुग्ध-सिन्धोः,
क्षारं जलं जलनिधे-रशितुं क इच्छेत् ? ॥ ११

यैः शान्त-राग-रुचिभिः परमाणुभिस्त्वं,
निर्मापित-स्त्रिभुवनैक-ललाम-भूत ! ।
तावन्त एव खलु तेऽप्यणवः पृथिव्यां,
यत्ते समान-मपरं न हि रूपमस्ति ॥ १२

वक्त्रं क्व ते सुर-नरोरग-नेत्रहारि ?
निःशेष-निर्जित-जगत्त्रितयोपमानम् ।
बिम्बं कलङ्क-मलिनं क्व निशाकरस्य ?
यद्वासरे भवति पाण्डु-पलाश-कल्पम् ॥ १३

सम्पूर्ण-मण्डल-शशाङ्क-कला-कलाप-,
शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।
ये संश्रितास्त्रिजगदीश्वर ! नाथमेकं,
कस्तान्निवारयति सञ्चरतो यथेष्टम् ? ॥ १४

चित्रं किमत्र यदि ते त्रिदशाङ्गनाभि-,
र्नीतं मनागपि मनो न विकार-मार्गम् ।
कल्पान्तकाल-मरुता चलिता-चलेन,
किं मन्दराद्रि-शिखरं चलितं कदाचित् ? ॥ १५

निर्धूम-वर्तिरपवर्जित-तैल-पूरः
कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।
गम्यो न जातु मरुतां चलिताचलानां,
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६

नास्तं कदाचिदुपयासि न राहुगम्यः,
स्पष्टीकरोषि सहसा युगपज्जगन्ति ।
नाम्भोधरोदर-निरुद्ध-महाप्रभावः,
सूर्यातिशायि-महिमाऽसि मुनीन्द्र ! लोके ॥ १७

नित्योदयं दलितमोह-महान्धकारं,
गम्यं न राहु-वदनस्य न वारिदानाम् ।
विभ्राजते तव मुखाब्ज-मनल्प-कान्ति,
विद्योतय-ज्जगद-पूर्वशशाङ्कबिम्बम् ॥ १८

किं शर्वरीषु शशिनाऽह्नि विवस्वता वा ?
युष्मन्मुखेन्दु-दलितेषु तमस्सु नाथ ! ।
निष्पन्न-शालिवन-शालिनि जीवलोके,
कार्यं कियज्जलधरै-र्जलभारनम्रैः ? ॥ १९

ज्ञानं यथा त्वयि विभाति कृतावकाशं,
नैवं तथा हरि-हरादिषु नायकेषु ।
तेजः स्फुरन्मणिषु याति यथा महत्त्वं,
नैवं तु काच-शकले किरणा-कुलेऽपि ॥ २०

मन्ये वरं हरि-हरादय एव दृष्टा,
दृष्टेषु येषु हृदयं त्वयि तोषमेति ।
किं वीक्षितेन भवता भुवि येन नान्यः,
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१

स्त्रीणां शतानि शतशो जनयन्ति पुत्रान्,
नान्या सुतं त्वदुपमं जननी प्रसूता ।
सर्वा दिशो दधति भानि सहस्ररश्मिं,
प्राच्येव दिग्जनयति स्फुरदंशुजालम् ॥ २२

त्वामामनन्ति मुनयः परमं पुमांस-
मादित्यवर्ण-ममलं तमसः परस्तात् ।
त्वामेव सम्यगुपलभ्य जयन्ति मृत्युं,
नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥ २३

त्वामव्ययं विभु-मचिन्त्य-मसंख्यमाद्यं,
ब्रह्माण-मीश्वर-मनन्त-मनङ्ग-केतुम् ।
योगीश्वरं विदित-योग-मनेक-मेकं,
ज्ञान-स्वरूप-ममलं भवदन्ति सन्तः ॥ २४

बुद्धस्त्वमेव विबुधार्चितबुद्धि-बोधात्,
त्वं शंकरोऽसि भुवन-त्रय-शङ्करत्वात् ।
धाताऽसि धीर ! शिव-मार्ग-विधे विधानात्,
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥ २५

तुभ्यं नमस्त्रिभुवनार्तिहराय नाथ !
तुभ्यं नमः क्षिति-तला-मल-भूषणाय ।
तुभ्यं नमस्त्रिजगतः परमेश्वराय,
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥ २६

को विस्मयोऽत्र ? यदि नाम गुणैरशेषै-,
स्त्वं संश्रितो निरवकाशतया मुनीश ! ।
दोषैरुपात्त-विविधाश्रय-जात-गर्वैः !,
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७

उच्चै-रशोक-तरु-संश्रित-मुन्मयूख,-
माभाति रूप-ममलं भवतो नितान्तम् ।
स्पष्टोल्लसत्किरण-मस्त-तमोवितानं,
बिम्बं रवेरिव पयोधर-पार्श्व-वर्ति ॥ २८

सिंहासने मणि-मयूख-शिखा-विचित्रे,
विभ्राजते तव वपुः कनकावदातम् ।
बिम्बं वियद्विलसदंशु-लता-वितानं,
तुङ्गोदयाद्रि-शिरसीव सहस्त्ररश्मेः ॥ २९

कुन्दावदात-चल-चामर-चारुशोभं,
विभ्राजते तव वपुः कल-धौतकान्तम् ।
उद्यच्छशाङ्क-शुचि-निर्झर-वारिधार-
मुच्चैस्तटं सुर-गिरेरिव शातकौम्भम् ॥ ३०

छत्रत्रयं तव विभाति शशाङ्ककान्त-
मुच्चैः स्थितं स्थगित-भानु-कर-प्रतापम् ।
मुक्ता-फल-प्रकर-जाल-विवृद्ध-शोभं,
प्रख्यापयत्त्रिजगतः परमेश्वरत्वम् ॥ ३१

उन्निद्र-हेम-नव-पङ्कज-पुञ्ज-कान्ति,-
पर्युल्लसन्नख-मयूख-शिखाभिरामौ ।
पादौ पदानि तव यत्र जिनेन्द्र ! धत्तः,
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२

इत्थं यथा तव विभूतिरभूज्जिनेन्द्र !,
धर्मोपदेशनविधौ न तथा परस्य ।
यादृक् प्रभा दिनकृतः प्रहतान्धकारा,
तादृक् कुतो ग्रह-गणस्य विकाशिनोऽपि ? ॥ ३३

श्च्योतन्मदाविल-विलोल-कपोल-मूल,-
मत्त-भ्रमद्-भ्रमर-नाद-विवृद्ध-कोपम् ।
ऐरावताभमिभ-मुद्धत-मापतन्तं,
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३४

भिन्नेभ-कुम्भ-गल-दुज्ज्वल-शोणिताक्त,-
मुक्ता-फल-प्रकर-भूषित-भूमि-भागः ।
बद्ध-क्रमः क्रम-गतं हरिणाधिपोऽपि,
नाक्रामति क्रम-युगा-चल-संश्रितं ते ॥ ३५

कल्पान्त-काल-पवनोद्धत-वह्निकल्पं,
दावानलं ज्वलित-मुज्ज्वल-मुत्फुलिङ्गम् ।
विश्वं जिघत्सुमिव संमुखमापतन्तं,
त्वन्नाम-कीर्त्तन-जलं शमयत्यशेषम् ॥ ३६

रक्तेक्षणं समद-कोकिल-कण्ठनीलं,
क्रोधोद्धतं फणिन-मुत्फण-मापतन्तम् ।
आक्रामति क्रमयुगेन निरस्तशङ्क,-
स्त्वन्नाम-नागदमनी हृदि यस्य पुंसः ॥ ३७

वल्गत्तुरङ्ग-गज-गर्जित-भीम-नाद-
माजौ बलं बलवतामपि भूपतीनाम् ।
उद्यद्दिवाकर-मयूख-शिखा-पविद्धं,
त्वत्कीर्त्तनात्तम इवाशु भिदामुपैति ॥ ३८

कुन्ताग्र-भिन्न-गज-शोणित-वारिवाह-
वेगावतार-तरणा-तुर-योधभीमे ।
युद्धे जयं विजित-दुर्जय-जेय-पक्षा-
स्त्वत्पाद-पङ्कज-वनाश्रयिणो लभन्ते ॥ ३९

अम्भो-निधौ क्षुभित-भीषण-नक्रचक्र-
पाठीन-पीठ-भय-दोल्बण-वाडवाग्नै ।
रङ्गत्तरङ्ग-शिखर-स्थित-यान-पात्रा-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४०

उद्भूत-भीषण-जलोदर-भार-भुग्नाः,
शोच्यां दशा-मुपगताश्च्युत-जीविताशाः ।
त्वत्पाद-पङ्कज-रजोऽमृत-दिग्ध-देहा,
मर्त्या भवन्ति मकर-ध्वज-तुल्यरूपाः ॥ ४१

आपाद-कण्ठ-मुरु-शृंखल-वेष्टिताङ्गा,
गाढं बृहन्निगड-कोटि-निघृष्ट-जङ्घाः ।
त्वन्नाम-मन्त्र-मनिशं मनुजाः स्मरन्तः,
सद्यः स्वयं विगत-बन्ध-भया भवन्ति ॥ ४२

मत्त-द्विपेन्द्र-मृगराज-दवानलाऽहि-
-सङ्ग्राम-वारिधि-महोदर-बन्धनोत्थम् ।
तस्याशु नाश-मुपयाति भयं भियेव,
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४३

स्तोत्रस्रजं तव जिनेन्द्र ! गुणै र्निबद्धां,
भक्त्या मया रुचिर-वर्ण-विचित्र-पुष्पाम् ।
धत्ते जनो य इह कण्ठ-गता-मजस्त्रं,
तं मानतुङ्ग-मवशा समुपैति लक्ष्मीः ॥ ४४

पू.मु.श्री समयसुन्दरविजयविरचितम्
चतुर्थ-चरण-पादपूर्तिरूपम्

## ३७. ॥ श्रीऋषभदेव-भक्तामर ॥

(वसन्ततिलका)

नम्रेन्द्रचन्द्र ! कृतभद्र ! जिनेन्द्र ! चन्द्र !
ज्ञानात्मदर्श-परिहृष्ट-विशिष्ट-विश्व ! ।
त्वन्मूर्तिरर्त्तिहरणी तरणी मनोज्ञे -
वालम्बनं भवजले पततां जनानाम् ॥ १

गृह्णाति यज्जगति गारुडिको हि रत्नं,
तन्मन्त्र-तन्त्र-महिमैव बुधोप्यशक्तः ।

स्तोतुं हि यं यदबुधोप्यदशीयशक्तिः,
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २

त्वां संस्मरन्नहमरं करमीप्सितस्य,
दूरं चिरं परिहरामि हरादिदेवान् ।
हित्वा मणिं करगतामुपलं हि विज्ञं-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ॥ ३

ध्यानानुकूलपवनं गुण-पुण्यपात्रं,
त्वामद्भुतं भुवि विना जिन ! यानपात्रम् ।
मिथ्यात्वमत्स्य-भवनं भवरूपमेनं,
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ॥ ४

क्षुत्क्षाम-कुक्षि-तृषिताऽऽतप-शीत-वात-,
दुःखीकृताद्भुत-ततोर्मरुदेविमाता ।
अद्याप्युवाच भरतेति भवान् जिनस्य,
नाभ्येति किं निजशिशोः परिपालनार्थम् ॥ ५

मुक्तिप्रदा भवति देव ! तवैव भक्ति-
र्नान्यस्य देवनिकरस्य कदाचनापि ।
युक्तं यतः सुरभिरेव न रौद्रमास-
स्तच्चारु-चूत-कलिकानिकरैकहेतुः ॥ ६

गाङ्गेयगात्र ! नृतमस्तृणसत्रदात्र,
त्वन्नाम मन्त्रवशतो गुणरत्नपात्र ! ।
मिथ्यात्वमेति विलयं मम हृन्निलीनं,
सूर्यांशुभिन्नमिव शार्व्वरमन्धकारम् ॥ ७

नेत्रामृते भवति भाग्यबलेन दृष्टे,
हर्षप्रकर्षवशतस्तव भक्तिभाजाम् ।
वक्षस्थल-स्थित तु ते क्षणतश्च्युतोऽसौ,
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ८

श्रीनाभिनन्दन ! तवाननलोकनेन,
नित्यं भवन्ति नयनानि विकस्वराणि ।
भव्यात्मनामिव दिवाकरदर्शनेन
पद्माकरेषु जलजानि विकासभाञ्जि ॥ ९

त्वत्पादपद्मशरणानुगतान्नरांस्त्वं,
संसारसिन्धुपतिपारगतान्करोषि ।
निष्पाप ! पारगत ! यच्च स एव धन्यो,
भूत्याश्रितं य इह नात्मसमं करोति ॥ १०

युक्तं त्वदुक्तवचनानि निशम्य सम्यक्,
नो रोचते किमपि देव ! कुदेववाक्यम् ।
पीयूषपानमसमानमहो विधाय,
क्षारं जलं जलनिधेरसितुं क इच्छेत् ॥ ११

शम्भुस्वकीयललनाकलिताङ्गभोगो,
विष्णुर्गदासहितपाणिरितीव देव ! ।
प्रद्वेषरागरहितोऽसि जिन ! त्वमेव,
यत्ते समानमपरं न हि रूपमस्ति ॥ १२

तेजस्विनं जिन ! सदेह भवन्तमेव,
मन्येऽस्तमेति सविता दिवसावसाने ।
दीपोऽपि वर्तिविरहे विधुमण्डलं च,
यद्वासरे भवति पाण्डुपलासकल्पम् ॥ १३

ये व्याप्नुवन्ति जगदीश्वर ! विश्व-विश्व,
मेऽद्यान् जनानपि सृजतितरां ? त्रिलोक्याम् ।
त्वां भास्करं जिन ! विना तमसः समूहान्,
कस्तान्निवारयति सञ्चरतो यथेष्टम् ॥ १४

सिंहासनं विमलहेममयं विरेजे,
मध्यस्थितत्रिजगदीश्वरमूर्त्तिरम्यम् ।
नोद्योतनार्थमुपरिस्थितसूर्यबिम्बं,
किं मन्दराद्रिशिखरं चलितं कदाचित् ॥ १५

दोषाकरो न सकरो न कलङ्कयुक्तो,
नास्तङ्गतो न सतमानसविग्रहो न ।
स्वामिन् विधुर्जगति नाभिनरेन्द्रवंश-
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६

नित्योदयस्त्रिजगतीस्थतमोपहारी,
भव्यात्मनां वदनकैरवबोधकारी ।
मिथ्यात्वमेघपटलैर्न समावृतो यत्,
सूर्यातिशायिमहिमासि मुनीन्द्र लोके ॥ १७

लावण्यपुण्यसुवरेण्यसुधानिधानं,
प्रह्लादकं जनविलोचनकैरवाणाम् ।
वक्त्रं विभो ! तव विभाति विभातिरेकं,
विद्योतयज्जगदपूर्व्वशशाङ्कबिम्बम् ॥ १८

ध्यातस्त्वमेव यदि देव ! जनाभिलाष-
पूर्णीकरः किमपरैर्विविधैरुपायैः ।
निष्पद्यते यदि च भौमजलेन धान्यं,
कार्यं कियज्जलधरैर्जलभारनम्रैः ॥ १९

माहात्म्यमस्ति यदनन्तगुणाभिराम,
सर्व्वज्ञ ते हरिहरादिषु तल्लवो न ।
चिन्तामणौ हि भवतीह यथा प्रभावो,
नैवं तु काचशकले किरणाकुलेपि ॥ २०

तद्देव ! देहि मम दर्शननात्मनस्त्व-
मत्यद्भुतं नृनयनामृत यत्र दृष्टे ।
स्वामिन्निहापि परमेश्वर मेऽन्यदेवं,
कश्चिन्मनो हरति नाऽथ भवान्तरेपि ॥ २१

ज्ञानस्य शिष्टतरदृष्टसमस्तलोका-
लोकस्य शीघ्रहतसन्तमसस्य शश्वत् ।
दाता त्वमेव भुवि देव ! हि भानुमन्तं,
प्राच्येव दिग्जनयति स्फुरदंशुजालम् ॥ २२

सिंहासनस्थभवदुक्तचतुर्विधात्मा,
धर्म्मावृते त्रिजगदीश ! युगादिदेव ! ।
सद्दानशीलतपनिर्मलभावनाख्या,
नान्यःशिवः शिवपदस्य मुनीन्द्र पन्थाः ॥ २३

स्वामिन्ननन्तगुणयुक्तकषायमुक्तः,
साक्षात्कृत त्रिजगदेव भवत्सदृक्षाः ।
नान्ये विभङ्गमतयो रुचिरं च पञ्च-
ज्ञानस्वरूपममलं प्रविदन्ति सन्तः ॥ २४

चिन्तामणिर्मणिषु धेनुषु कामधेनु-
र्गङ्गानदीषु नलिनेषु च पुण्डरीके ।
कल्पद्रुमस्तरुषु देव ! यथा तथात्र,
व्यक्तं त्वमेव भगवन्पुरुषोत्तमोसि ॥ २५

भास्वद्गुणाय करणाय मुदोरणाय,
विद्याचणाय कमलप्रतिमेक्षणाय ।
सल्लक्षणाय जनताकृतरक्षणाय
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥ २६

पुंसां छलेन पतितं पुरतो हि रत्नं,
दृश्येत किं नियतमन्तरतत्त्वदृष्ट्या ।
मोहादृतेन मयि का त्वयि संस्थितेऽग्रे
स्वप्नान्तरेपि न कदाचिदपीक्षितोसि ॥ २७

मन्मानसान्तरगतं भवदीयनाम,
पापं प्रणाशयति पारगत प्रभूतम् ।
श्रीमद्युगादिजिनराज ! हिमं समन्ता-
द्बिम्बं रवेरिव पयोधरपार्श्ववर्त्ति ॥ २८

जन्माभिषेकसमये गिरिराजशृङ्गे,
प्रस्थापितं तव वपुर्विधिना सुरेन्द्रैः ।
प्रद्योतते प्रबलकान्तियुतं च बिम्बं,
तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९

केशच्छटां स्फुटतरां दधदङ्गदेशे,
श्रीतीर्थराज ! विबुधावलिसंश्रितस्त्वम् ।
मूर्धस्थकृष्णलतिका सहितं च शृङ्ग-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३०

स श्रीयुगादिजिन ! मेऽभिमतं प्रदेहि,
धर्म्मोपदेशसमये दिवि गच्छदूर्ध्वम् ।
ज्योतिर्दतां जयति यस्य शिवस्य मार्गं,
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥ ३१

सोपानपङ्क्तिमरजांसि भवद्वचांसि,
स्वर्गाधिरोह-णकृते यदि नो कथं तत् ।
तत्राश्रितास्त्रिजगदीश्वर ! यान्ति जीवाः,
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२

भाति त्वया भुवि यथा न तथा विना त्वां,
श्रीसंघनायकगुणैस्सहितोपि सङ्घः ।
शोभा हि यादृगमृतद्युतिना विना तं,
तादृक्कुतो ग्रहगणस्य विकाशिनोपि ॥ ३३

त्वत्स्कन्धसंस्थचिकुरावलिकृष्णवल्लिं,
वक्त्रस्फुरद्विषनिजाक्षिविनिर्यदग्निम् ।
सर्प्पोपि न प्रभवति प्रबलप्रकोपो,
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३४

सम्प्राप्तसंयमदरी वसनं प्रलम्ब-
पुण्यौषधं परमशर्म्मफलोपपेतम् ।
मर्त्त्यं महोदयपते ! भववैरिवृन्दो,
नाऽक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३५

धर्म्मे धनानि विविधानि सनादहन्तं,
मानुष्यमानसवने नियतं वसन्तम् ।
प्रोद्यत्तरस्मरसमीपसखं वृषाङ्क !
त्वन्नामकीर्त्तनजलं शमयत्यशेषम् ॥ ३६

यत्रोद्गता शितिलता हि गिरेर्गुहायां,
किं तत्र तिष्ठति फणी गुणगेह तस्मात् ।
मिथ्यात्वमेतदगमन्नितरामुवष्ट,
त्वन्नाम नागदमनी हृदि यस्य पुसः ॥ ३७

पीडां करोति न कदापि सतां जनानां,
सूर्योदयादमृतसूं सरसीरुहाणाम् ।
दुःखीकृतत्रिभुवनो विपदां च यश्च,
त्वत्कीर्तनात्तम इवाशु भिदामुपैति ॥ ३८

त्वद्घ्राणिमञ्जुलमरन्दरसं पिबन्त-
स्तापोष्मितां परमनिर्वृतिमादिदेव ! ।
पुण्याढ्यपञ्चजनचञ्चुरचञ्चरीका-
स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ३९

कन्दर्प्पदेवरिपुसैन्यमपि प्रजित्य,
त्वल्लोहकारकृतमार्ग्गसु वर्म्मिताङ्गाः ।
देव ! प्रभो जय जयारवमगिधीरा-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४०

त्वत्पादपद्मनखदीधितिकुङ्कुमेन,
चित्रीकृतः प्रणमतां स्वललाटपट्टः ।
येषां तयेव सुतरां शिवसौख्यभाजो,
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४१

भग्ने च कर्मनिगडे जिन ! लोहकार-
वाङ्मुद्गरेण भवगुप्तिगृहाप्तवासाः ।
कर्मावली-निगडितारपिभक्त-सत्त्वाः,
सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४२

रोषादिवेलिसहगामपहाय माम-
सौ सम्पदाभिरमते सह ... पत्न्या ।
द्राक्चक्रवालमगमद्विपदेव तस्य,
यस्तावकस्तवमिमं मतिमानधीते ॥ ४३

तस्याङ्गणे सुरतरुःसुरधेनुरंह्रौ
चिन्तामणिः करतले निजमन्दिरे च ।
यः श्रीयुगादिजिनदेवमलं स्तवीति,
तं मानतुङ्गमवसा समुपैति लक्ष्मीः ॥ ४४

श्रीमन्मुनीन्द्रजिनचन्द्रयतीन्द्रशिष्य-,
पूर्णेन्दुशिष्यसमयादिमसुन्दरेण ।
भक्तामरस्तवनतुर्यपदं समस्या-,
काव्यैः स्तुतः प्रथमतीर्थपतिर्गृहीत्वा ॥ ४५

पू.श्री लक्ष्मीविमलमुनिवर्यविरचितम्
चतुर्थ-चरण-पादपूर्तिरूपम्

## ३८. ॥ श्रीशान्तिनाथ-भक्तामरम् ॥

(वसन्ततिलका)

श्री'शान्ति'मङ्घ्रिसमवायहितं सुरेन्द्रा
लोकान्तिका इति गिराऽभिदधुर्यमाशु ।
तीर्थं विधेहि परिहाय नृराज्यभोगा-
वालम्बनं भवजले पततां जनानाम् ॥ १

'शक्रा'र्च्यपादकमलं विमलप्रतापं
व्यापादिताखिलखलारिनृपेन्द्रवर्गम् ।
क्षीणाष्टकर्मवरचक्रभृतां त्रयाणां
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २

श्रुत्वेति वार्षिकमदाः प्रतिपादनं त्वं
भव्याय पापवनवह्न्यमृतायमानम् ।

सारं स्वभावसुखदं जिन ! तत्र दान-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥ ३

आत्तं व्रतं युगरस(६४) प्रमितं सहस्रं
स्त्रीणां त्वया निहितमुक्तिहृदा विहाय ।
त्वामन्तरेण वनितोदभृतं किलान्यः
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ? ॥ ४

आदाय नाथ ! चरणं त्रिजगत्पिता त्वं
मोहाधिमत्तनुमतोऽपि चिकित्ससि स्म ।
चित्रं न तत्र गदिनोऽपि हि नैव वैद्यं
नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥ ५

सर्वव्रतं क्षितिभृतो जगृहुस्तवानु
तत्कारणं करणनागहरे ! त्वमेव ।
आह्लादयत्यपि वनं सुरभिर्जनान् यत्
तच्चारुचूतकलिकानिकरैकहेतुः ॥ ६

अज्ञानमाशु कठिनं दलितं त्वया तद्
ध्यानज्वलज्ज्वलनज्योत्स्नमयेन विश्वम् ।
ज्ञानेन सोज्ज्वलगुणेन हि पञ्चमेन
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ७

मान्यानि तानि विबुधैः कमलानि कान्त्यं
गच्छन्ति त्वत्पदमितानि च यानि योग्यम् ।
उच्चं विषक्तसुरनाथशिरः परं न
पद्माकरेषु जलजानि विकाशभाञ्जि ॥ ८

मर्त्योऽन्तिके व्रजति तेऽमृततां मुनीन्द्र-
स्योत्पन्नसारगुणकेवलदर्शनस्य ।
मुक्त्यङ्गनारमणवारिधरस्य शुक्तौ
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ९

त्वत्पादपद्ममभिपूज्य भजन्ति पाद्म्यं
पद्मानि किं तदुचितं न वितीर्णवित्त ! ।
ब्रह्मस्वरूपमय ! तस्य हि सेवया किं
भूत्याऽऽश्रितं य इह नात्मसमं करोति ? ॥ १०

पीत्वा वचस्तव नृभिर्न पिपास्यतेऽन्यद्
ध्वस्तासमानरसमाप्तनयं गताघ ! ।
मिथ्यादृगुक्तमृभुसिन्धुपयःपिबानां
क्षारं जलं जलनिधेरशितुं क इच्छेत् ? ॥ ११

चन्द्रः कलङ्कभृदहर्पतिरेव ताप-
युक्तः किलाद्र्धतनुतन्विरुमापतिश्च ।
विश्वेष्वशेषगुणभाक् शमभावपूर्णं
यत् ते समानमपरं नहि रूपमस्ति ॥ १२

ख्यातं क्षितौ तव मतं यदबुद्धिना तद्
ज्ञातं न दोष इह तेऽपि न पश्यतीदम् ।
घूको रवेर्द्युतिमदेव हि मण्डलं च
यद् वासरे भवति पाण्डुपलाशकल्पम् ॥ १३

शान्त्यन्यदेवमव(वि ?)बोधयुतं गुरुं च
धर्मं श्रयन्त्यवमतोन्नतशासना ये ।
पुंसो विधौतपरवाद ! विना भवन्तं
कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥ १४

अभ्रारवेण न जितं भवतः स्वरं तत्
किं भूतवह्नि(३५)मितगिर्गुणभारपूर्णम् ।
प्रास्तोपतापविषदाहमनेन वाग्भिः
किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥ १५

एकत्र जन्मनि पदे च गते त्वया द्वे
या चक्रवर्तिपदवी खलु सा च मुक्ता ।
'इक्ष्वाकु'भूपतिषु तीर्थकरोऽत एव
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६

क्षित्याः पदैर्हततमः ! स्मरणेन शश्वत्
सद्हृत्पयोजमवबोधमुपैत्यरं ते ।
गोपाशनाशकरदर्शन एष चात्र
सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥ १७

आस्यार्णवाद् रदनदीधितिपूतवर्त्मा-
सङ्ख्येयसारगुणरत्नचयाद् वचस्ते ।
उच्छिन्ननाशममृताच्छिशिरं स्वभावै-
र्विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥ १८

वाङ्नीरदैः प्रशमिताः सदशेषजीवाः
प्रक्षालितार्तिमलराशिभिरेव सन्ति ।
नाथ ! प्रफुल्लवृषकल्पनगैस्तु ते तत्
कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥ १९

प्रीतिर्यथा त्वदुदिते समये मुनीनां
कस्मिंस्तथा न गतराग ! विरोधवाचि ।
ज्योत्स्नाप्रियस्य विधुरोचिषि मुद् यथाऽस्ति
नैवं तु काचशकले किरणाकुलेऽपि ॥ २०

आरोपितं समयपर्वतसानुदर्यां
हृद्यैस्तवोच्चलितचित्तजचित्रकायाम् ।
सम्भाव्य तद्विषयतस्करकान् न तेषां
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१

चैतन्यमाप्त ! विदुषां निजकं व्यनक्ति
त्वद्वाग् वृषाञ्चितपदी चिरकालनष्टम् ।
मीनाकरस्य निशि नन्दधिया सुधांशुं
प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥ २२

सिद्धान्तवर्त्मनि पलायितदुर्मनीष-
दस्यौ तवागुरमृतं ननु यान्ति भूत्वा ।
एष्यन्ति ये स्वगुणभारभृता हि नाथ !
नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥ २३

आराध्य शासनमपास्तकुशासनं ते-
ऽन्ये ज्ञानिनः स्युरपि विस्मय एष नार्हन् ! ।
अन्येभ्य एकमिदमेव पृथग्विधं यं (यद् ?)
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २४

त्वां सेवते दिननिशं निजकेवलश्रीः
प्रक्षीणमोहदनुजं ससुदर्शनं सा ।
अध्यासितोपशमसागरमध्यमस्माद्
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥ २५

देवाः परे स्वमपि तारयितुं न हीशा
आत्माश्रितान् कथमिमे प्रभवेयुरत्र ? ।
नत्यादि तेषु च वृथाऽऽश्रितवैभवाय
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥ २६

ये त्वां विमुच्य परकीयविभून् भजन्त्य-
विज्ञाततत्त्वमधुरैर्वरतत्त्वकीर्णः ।
नाम्ना प्रशान्तभविपापजसाध्वसस्तैः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७

दुर्भव्यविग्रहिवपुर्ज्वलतीह नाथा-
भ्यासे कथं तव चितामृतसारशीते ? ।
ज्ञातो मयाऽस्य सहजो न भवेत् किमुष्णं
बिम्बं रवेरिव पयोधरपार्श्ववर्ति ? ॥ २८

त्वत्तोऽन्यवादिनिचयो हि दवीयसोऽपि
भीत्वा प्रणश्यति निरीह ! विदर्पसिंहात् ।
अश्वेतितावनितलाग्रतमोभरः किं
तुङ्गोदयाद्रिशिरसीव सहस्त्ररश्मेः ॥ २९

अंह्रिद्वयं सुरवरा अवमन्य नाकं
संसारकृच्छ्रभिदुरं निवसन्ति नित्यम् ।
नानांह्रिपीठसुमनोरचिताग्रभाग-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३०

आप्त्वाऽपचेतनमहो ! प्रसवीयवृन्दं
त्वां स्मेरतां लभत एव कथं विहस्य ? ।
पत्रैः परश्रियमतो दिवि भो ! त्वदीयं
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥ ३१

सम्भाव्य भद्र ! भवदीयगुणाञ् श्रितास्त्वा-
मर्च्या भवेयुरपि नैतदसत्यमत्र ।
यत् ते क्रमौ श्रयति पीठमतिप्रणिम्नं
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२

सालोकलोकमणिहारसुनायकस्य
यादृक् प्रताप इह दीव्यति ते सखेऽलम् ।
ध्मातान्यशास्त्रमद ! सोष्णकरस्य ताप-
स्तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥ ३३

साटोपकोपशितिरोपनिरोधकारं
मोहप्रवेशपिहितारारिसन्निभं ते ।
दिव्यं कुतश्चन यथार्थतया स्वरूपं
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३४

कन्दर्पसर्पपतिदाहसुपर्णरूप !
नष्टज्वलत्स्मयहुताशन ! लोलुपाऽपि ।
तृण्निम्नगा स्वयमतीर्थमिषाम्बुपङ्का
नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३५

दिश्येत मुक्तिरिति वा नहि सेवयाऽस्य
मिथ्या विमर्शनमदोऽस्ति मदोज्झितस्य ।
संसारदुःखनिचितं यदि पापवह्निं
त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥ ३६

फूत्कारनिर्गतगरप्रसरद्दवाग्नि-
धूम्रीकृतत्रिजगतीजनसद्गुणौघः ।
दन्दश्यते जिन ! न तं स्मयदन्दशूक-
स्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥ ३७

निर्दस्युमित्रतर ! यद्यसि वीतराग-
स्त्वद्रागिणां कथमनन्तभवोद्भवात्तम् ।
आदित्यतः किमु न तु त्वदवाङ्मुखानां
त्वत्कीर्तनात् तम इवाशु भिदामुपैति ? ॥ ३८

सन्तप्तदीप्ततपनीयमनोज्ञमूर्त्ते !
उद्गच्छदूर्मिचलभावविनाशरूपम् ।
सद्ध्यानगन्धमिह कोविदचञ्चरीका-
स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ३९

माहात्म्यमद्भुततरं जिन ! तावकीनं
कैश्चित् कुशाग्रमतिशालिभिरप्यगम्यम् ।
निःसङ्गतां त्वयि सरागदृशोऽपि मर्त्या-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४०

यैरापि ते विशदधर्मतटाकतीर-
मुत्फुल्लबोधकमलं शुचि हंसतुल्यैः ।
तेऽसारभोगपरिखां न तु भोक्तुमीशा
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४१

स्वर्नर्मशर्मपरिभोगविपाकरूपो
धर्मोऽस्ति योऽमितसुखाकर आपदस्तः ।
तं प्राप्य कर्मनृपबद्धनिजस्वरूपाः
सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४२

स्वर्गस्य भोग इह हस्त इवास्ति तस्य
भूयिष्ठपुण्यकणकीलितजीवितस्य ।
कैवल्यनिर्वृतिवदान्यसमं प्रशस्तं
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४३

उद्यन्ति चित्तसरसि स्तवतोयजानि
'शान्ते'र्जिनस्य करुणाच्छजलौघभाजि ।
नुर्यस्य सच्छतदलप्रमुखासनस्था
तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥ ४४

श्रीकीर्तिनिर्मलगुरोश्चरणप्रसादाद्
भक्तामरस्तवनपादतुरीयमाप्त्वा ।
पादत्रयेण रचितं स्तवनं नवीनं
लक्ष्मीसितेन मुनिना विमलस्य शान्तेः ॥ ४५

पू.आ. श्री भावप्रभसूरिविरचितम्
चतुर्थ-चरण-पादपूर्तिरूपम्

## ३९. ॥ श्रीनेमिनाथभक्तामरम् ॥

(वसन्ततिलका)

भक्तामर ! त्वदुपसेवन एव 'राजी-
मत्या' ममोत्कमनसो दृढतापनुत् त्वम् ।
पद्माकरो वसुकलो वसुखोऽसुखार्ता-
वालम्बनं भव जले पततां जनानाम् ॥ १

पित्रोर्मुदे सह मयोपयमं यदीन्द्र !
नोरीकरिष्यसि तदा तव काऽत्र कीर्तिः ? ।
जग्राह यो हि गृहिकर्म विधाय वृत्तं
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २

रम्यं गृहं च रमणी रमणीयराढां
भोगान् समं प्रवरबन्धुजनैरपास्य ।
तारुण्ययुग् यदुपते ! त्वदृतेऽङ्ग दीक्षा-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥ ३

रोद्धुं क्षमो जिन ! करोऽपि ममाबलाया-
स्त्वामुद्बलं हि भवदागमजातवीर्यः ।

न स्यान्मुनीश ! लवणेशगृहीतशक्तिः
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ? ॥ ४

भद्रं चकर्थ पशवेऽपि यथा तथा त्वं
तूर्णं कृपापर ! ममैह्यसुरक्षणार्थम् ।
रिष्टाश्रितां खलु धवो महिलां समन्तुं
नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥ ५

तीक्ष्णं वचोऽप्यभिहितं मयका हितं यत्
तत् ते भविष्यतितरां फलवृद्धिसिद्ध्यै ।
यद्धेलिधाम तपतीश ! भृशं निदाघे
तच्चारुचूतकलिकानिकरैकहेतुः ॥ ६

आगच्छ कृच्छ्रहर ! हृच्छयचित्रपुङ्ख-
लक्षीकृतां कृशतनुं क्षम ! रक्ष मां त्वम् ।
त्वत्सङ्गमे क्षयमुपैष्यति मेऽतिदुःखं
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ७

उद्यत्तडिद्घनघनाघनगर्जितेऽहि-
भुग्भाविते नभसि नौ नभसीन ! देहे ।
घर्मोत्कटादिरिव दन्तुरतां विषण्णो
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ८

पश्येदृशीति सखिता मदनादरः किं ?
नृत्यन् मयूरनिकरोऽब्दघटां समीक्ष्य ।
मैत्र्या भवन्ति भगवन् ! प्रभया प्रकर्षं
पद्माकरेषु जलजानि विकाशभाञ्जि ॥ ९

किं त्वं स नैव चल ! काऽऽगतिका तवैषा
जन्याः प्रसूर्जनयिता सहजाश्च जामिः ।
श्यामाऽप्यहं च इति वर्गमिमं विवाह-
भूत्याऽऽश्रितं य इह नात्मसमं करोति ॥ १०

दृष्ट्वा भवं तमनिमेषविलोकनीयं
नान्यत्र तोषमुपयाति मदीयचक्षुः ।
पीत्वा पयः शशिकरद्युतिदुग्धसिन्धोः
क्षारं जलं जलनिधेरशितुं क इच्छेत् ? ॥ ११

राज्ञो महामृगमदाकुलमण्डलस्य
दैत्यारिमार्गगमनस्य तमोऽदितस्य ।
चक्षुष्य ! चारुचतुराक्षिगतस्य किञ्च
यत् ते समानमपरं न हि रूपमस्ति ॥ १२

त्वत्सद्वियोगवनमेव गता तथापि
तीव्रातपोद्धतपराभवभाविताऽहम् ।
'शैवेय' ! देव ! जलजाङ्कित ! जातमेतद्
यद् वासरे भवति पाण्डुपलाशकल्पम् ॥ १३

व्याहारमेड इव मे यदि नो शृणोषि
शब्दादिकं सुखमिदं व्रज हारि हित्वा ।
नेतर्नरा भुवि भवन्ति गताङ्कुशा ये
कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥ १४

ध्यानं विधेहि कुरु रैवतके तपांसि
विद्धीति मां हरिसुतोऽस्थिरमाशु कर्ता ।
यज्जन्ममात्रलघुगात्रजिनांह्रितो नो
किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥ १५

तत्रोषितं निधुवनाय समागतास्त्वां
देव्यः समं सहचरैः सुतनुं समीक्ष्य ।
वक्ष्यन्ति मोहिततरा इति कामरूपो
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६

त्वद्ध्यानभाज्यपि पुनर्मयि नो गताया-
मिष्टार्थबाधकबृहद्विरहान्धकारम् ।
सद्धर्मधाम्नि सहजोद्यमधौतदोषः
सूर्यातिशायिमहिमाऽसि मुनीन्द्रलोके ॥ १७

वक्त्रं जिनात्र वसतः प्रणिधानभाजो
विश्वासतो मृगशिशुव्रजचुम्बितं सत् ।
सन्दृश्यते बहुललक्षणभावितं ते
विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥ १८

उद्योग एष भवता क्रियतां किमर्थं ?
किं वाऽथ ते नु वरवस्तुन ऊनमस्ति ? ।
त्वामेव वीक्ष्य शितिभं समुदो मयूर्यः
कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥ १९

इच्छावरं वरमिति स्वजनेन नुन्ना
वच्मीत्यहं द्रुतकराब्जनिरुद्धकर्णा ।
रत्ने यथा जनतया क्रियतेऽभिलाषो
नैवं तु काचशकले किरणाकुलेऽपि ॥ २०

भव्ये ! मनोहरवरो भविता भवत्याः
किं 'नेमिना'ऽसहशुचा च किमित्थमाल्या ? ।
वाच्यं किमत्र यदि मे न भवानिवान्यः
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१

अस्या न दूषणमतो हि भवानसह्यो
ऽबाधः कृतान्तजनको भवतीश ! सोऽपि ।
साताय सर्वजगतां च 'शिवा' यमर्कं
प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥ २२

चेतश्चमच्चरिकरीषि दरीश्रितानां
तीव्रैर्व्रतैर्विषमरैवतशृङ्गसङ्गी ।
आदर्शधाम्नि धृतकेवलचक्रिवत् किं
नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ? ॥ २३

पूर्णं व्रतेन भवतु क्रियया गतैः किं ?
कष्टैः कृतं च तपसाऽस्त्वलमन्यकृत्यैः ।
चेत् केवलं शिवसुखाब्जविकाशहेतुं
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २४

बालश्चिखेलिथ सुरैः कृतनर्मकर्मै-
र्धीरो भवंश्च समितौ भुवनेषु जिष्णुः ।
सत्त्वात् पुनः स च गृहीति किमत्र गण्यो
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥ २५

पूर्वं प्रभो ! प्रबलपूरितपाञ्चजन्यः
के प्रेङ्खिताच्युतभुजो हसितोऽस्य दारैः ।
मौनं श्रितः परिणये विमुखोऽधुनैवं
तुभ्यं नमो जनभवोदधिशोषणाय ! ॥ २६

त्वं चेच्छिवात्मज इतीश ! शिवाय मे किं ?
नारिष्टनेमिरिति चेदशुभच्छिदेऽपि ।
स्वैर्वा निरुक्तवशतो मयि सानुकूलः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७

वेत्थेति नाद्रिवसते ! विशदं ध्रुवं त्वां
सौवं मतं प्रतिविभातमिदं ब्रवीति ।
रागीभवद् विकचकोकनदश्रियाऽरं
बिम्बं रवेरिव पयो धरपार्श्ववर्ति ॥ २८

स्वामिन् ! 'समुद्रविजया'वनिपालसूनो !
स्तादीश्वरोऽत्र यदहार्यगतिं तवेमाम् ।
कान्तिं निवारयति विष्णुपदोदितां क-
स्तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९

सारेच्छुदुर्लभमतोऽफलमेव मन्ये
मुख्यं महेश ! महतोऽप्यपरोपकृत् ते ।
सिद्धागमार्थवरमुच्चदशं स्वरूप-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३०

उच्चोपलासनमशीतकरातपत्रं
वातोच्चलद्वितततनिर्झरचामरं च ।
देवार्चित ! त्रिकमिहास्तु तवैवमेव
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥ ३१

उक्तेष्वमीषु वचनेषु मयाऽमृतानि
जानीध्वमादृतरुषाऽप्यनुरागयुक्त्या ।
नेत्रादिषु प्रथितसाम्यगुणेन मे हि
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२

मत्स्वाम्यहं च मुखनेत्रजितावमुष्या
नीतोष्णतामिति मदेन मृगेण मन्ये ।
दाहाय मे प्रकृतिरीश ! विधोर्यथाऽस्ति
तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥ ३३

अत्रैव पश्य परमां पर ! कैरविण्यां
ज्योत्स्नाप्रिये च वितनोति रतिं शशाङ्कः ।
स्नेहान्वितः परिवृढो विमुखोऽयनं हि
दृष्ट्वाऽभयं भवति नोभवदाश्रितानाम् ॥ ३४

माकन्दवृन्दवनराजिपदे निरेनो-
ऽसह्योऽप्यहो ! सकलकेवलसम्पदाप्तेः ।
सालत्रयं भविभृतं भुवि मोहभूपो
नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३५

इत्युत्सुका गतिविनिर्जितराजहंसी
'राजीमती' दृढमतिः सुसती यतीशम् ।
इन्द्रैः स्तुतं ह्युपययाविति नोऽसुखाग्निं
त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥ ३६

मत्तालिपाटलमलीमसकामभोगी
योगीश ! दुर्धरकषायफटोत्कटाक्षः ।
जय्यो जवेन जठराप्तजनोऽपि तेन
त्वन्नामनागदमनी हृदि यस्य पुंसः ॥ ३७

कालोपमं विशददर्शनकृत्यशून्यं
पक्षद्वयात् सदसतो धृततर्कजालम् ।
मिथ्यात्विशासनमिदं मिहिरांशुविद्धं
त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥ ३८

रत्नत्रयं निरुपमं नरराजहंसाः
संवित्तिदर्शनचरित्रमयप्रकाशम् ।
क्षित्याप्तसंसृतिपरिश्रमदुःखदाहं
त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ३९

वित्तेन साधकतमेन सुनद्धभावात्
कैवल्यनार्युरसिजैकरसाभिलाषाः ।
सम्यक्प्रमादसुभृतोऽव्ययतां त्वदीयात्
त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४०

पीत्वा वचो जिनपतेरधिगम्य दीक्षां
साऽथार केवलमनन्तसुखं च मोक्षम् ।
आश्रित्य सिद्धवरवस्त्वगदा हि के नो
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ? ॥ ४१

काँस्कान् नवानि हसिताब्जशुचीन् गुणांस्ते
येऽनादितो विषमबाणभटेन नद्धाः ।
राज्ञि त्वयीश ! मनुजाः सति सार्वभौमे
सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४२

सद्ब्रह्मचार ! जिन ! 'यादव'वंशरत्न !
'राजीमती'नयनकोकविरोकितुल्य ! ।
जुष्टः श्रिया सकलयैकपदे भवेत् स
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४३

हारावलीं नुतिमिमां द्युतिसन्ततीद्धां
कण्ठे दधाति 'महिमाप्रभ' सूरिराजः ।
यस्ते सदैव रुचिराश्रित'भावरत्नां'
तं 'मानतुङ्गम'वशा समुपैति लक्ष्मीः ॥ ४४

पू.पं.श्री विनयलाभगणिविरचितम्
चतुर्थ-चरण-पादपूर्तिरूपम्

## ४०. ॥ श्रीपार्श्वनाथभक्तामरम् ॥

(वसन्ततिलका)

पादारविन्दमकरन्दरसैकलुब्ध-
मुग्धेन्दिरप्रवरनिर्जरवृन्दवन्द्यम् ।
'पार्श्वे'श्वरं प्रविततश्रियमद्वितीय-
मालम्बनं भवजले पततां जनानाम् ॥ १

सत्कायसुन्दरमनोवचनप्रयोग-
सम्पूर्णसाधनविधानगुणैकदक्षैः ।
यः सेवितः परमधार्मिकसिद्धसङ्घैः
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २

नाथ ! त्वदीयगुणसंस्तवनं चिकीर्षु-
र्लप्स्ये विदग्धजनहास्यपदं विमोहात् ।
मूढादृते मुकुरमध्यगतास्य बिम्ब-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥ ३

कश्चिद् विपश्चिदिह नो जगति प्रभूष्णु-
र्यस्त्वद्गुणौघगणनां प्रकटीकरोति ।
को लङ्घयेद् गगनमाशु पदैः प्रसह्य ?
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ? ॥ ४

मन्दोऽप्यहं गुणनिधे ! निजबुद्धिशक्त्या
त्वद्वर्णनं रचयितुं परमं यतिष्ये ।
धीरा द्रु(द्र?)वन्ति समरे हि तथाऽबलोऽपि
नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥ ५

त्वत्कीर्तिकीर्तनविधौ हि मनो मदीयं
हृल्लेखतां व्रजति तत्र तवानुभावः ।
गुञ्जन्ति षट्पदगणाः सुरभौ मदान्धा-
स्तच्चारुचूतकलिकानिकरैकहेतुः ॥ ६

भास्वत्प्रभानिचयचिन्मय-सत्प्रकाशाद्
ध्यानात् तव प्रबलसन्तमसं हृदिस्थम् ।
दूरे प्रयाति विलयं खलु मोहजातं
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ७

ज्ञानं तथाविधमधीश ! न निर्मलं मे
प्रद्योतयिष्यति गुणस्तुतिशुद्धसङ्गः ? ।
प्रातर्यथा हरिमरीचियुतं(तः) कुशाग्रे
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ८

दोषानुषङ्गिपरदेवगणानपास्य
लीनानि योगिहृदयानि त्वयि प्रकामम् ।
हित्वैव दुष्टजलभूमिमतो भवन्ति
पद्माकरेषु जलजानि विकाशभाञ्जि ॥ ९

मिथ्यावशेन किल पूर्वभवे कुदेव-
सेवा कृता जिन ! मया न हिताय जाता ।
किं तेन विश्वजनवन्द्य ! निषेवितेन
भूत्याऽऽश्रितं य इह नात्मसमं करोति ? ॥ १०

त्वद्भारतीं मरणजन्मजदोषहन्त्रीं
श्रुत्वा सुधीः प्रकुरुतेऽन्यगिरः क इच्छाम् ? ।
आकण्ठमद्भुतसुधारसपानतृप्तः
क्षारं जलं जलनिधेरसितुं क इच्छेत् ? ॥ ११

अत्यद्भुतं सुभगरूपधरं नरं सन्-
दृष्ट्वाऽनुरज्यति वशा वचनं न मिथ्या ।
त्वय्याश्रिता त्रिजगतः कमला हि तस्मात्
यत् ते समानमपरं न हि रूपमस्ति ॥ १२

त्वत्कीर्तिशुभ्रगुणसन्तुलितुं(लने ?) प्रवृत्त-
श्चन्द्रो निजांशुभिरहर्निशमल्पतेजाः ।
दोषाकरस्य न च सिद्धिमुपैति बिम्बं
यद् वासरे भवति पाण्डुपलाशकल्पम् ॥ १३

स्वर्गापवर्गसुखदानविधैकदक्षात्
त्राणच्युतान् चतुरशीतिकलक्षयोनौ ।
धर्मादृते तव पृथग्भवदुःस्थजन्तून्
कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥ १४

'रुद्रा'दिदैवतगणः क्षुभितः 'स्मरे'ण
रोमोद्गमोऽपि न कृतस्तव तेन कश्चित् ।
सर्वेऽचलाः प्रदलिताः प्रलयार्कतापात्
किं 'मन्दरा'द्रिशिखरं चलितं कदाचित् ? ॥ १५

श्रेयोदशोल्लसितशान्तरसप्रपूर्णः
प्लुष्टान्तरारिशलभोऽप्यतिनिष्कलङ्कः ।
ज्ञानार्चिरस्तमितमोहतमप्रपञ्चो
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६

जाग्रद्दिवारजनिसाम्यविधिप्रकाशः
सङ्ख्यातिरिक्तभुवनाद(व)धिकप्रचारः ।
कुर्वन् विवेकिहृदयाम्बुजसत्प्रबोधं
सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥ १७

पक्षद्वयाधिककलं निशि वासरेषु
तुल्यप्रभावमकलङ्कमनन्तमान्यम् ।
मार्तण्डराहुघनभीतिभिदं तवास्यं
विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥ १८

कोऽर्थः सुरद्रु–मणि–कामगवीभिरीश !
प्राप्तो मया स यदि ते परमप्रसादः ? ।
नित्योल्लसत्सुरसरिज्जलपूर्णदेशे
कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥ १९

मुक्त्यैषकस्त्वयि निवेशयति स्वचित्तं
नैवान्यदैवतगणे घनदोषयुक्ते ।
यादृग् रमेत हृदयं चतुरस्य रत्ने
नैवं तु काचशकले किरणाकुलेऽपि ॥ २०

निर्णीततत्त्वपदनिश्चलमानसानां
त्वत्पादपद्मपरिचारणतत्पराणाम् ।
पुंसामिहत्यकतिचित्सुखदो न देवः
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१

प्रज्ञा तवैव परमोच्चगुणाश्रया या
प्रादुश्चकार विमलद्युति केवलाख्यम् ।
सन्तीन्दुतारकभृतोऽन्यदिशोऽर्कबिम्बं
प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥ २२

प्राग्भूतसातिशययोगिजनप्रगीताद्
दुष्टाष्टकर्मचयचङ्क्रमणैकलक्षात् ।
युष्मत्प्रवर्तितपथः परितोऽनवद्या-
न्नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥ २३

भावावभासनपराद्भुतशुद्धबुद्ध्या
निर्णीय तत्त्वमखिलं सकलागमस्य ।
त्वां विश्वनायकमनन्तसुखानुषक्तं
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २४

केचित् सुराः परुषभावपरीतचित्ता
बाढं परे स्फुरदनङ्गनिषङ्गवश्याः ।
मुक्तः सदैव भवभूरूहबीजसङ्गाद्
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥ २५

धौताष्टकर्मदलकश्मल ! निर्मलाय
ध्यानानलोद्ग्रथितदुर्ममतालताय ।
विश्वत्रय(यी)कृतगुणस्तुतिमङ्गलाय
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥ २६

सूक्ष्मेतरेषु च भवेषु निगोदजेषु
तिष्ठन्त्यनन्ततरकालमतीव दुःस्थाः ।
तैर्जन्तुभिर्बहुलकर्मवशाज्जिन ! त्वं
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७

चञ्चत्तमालदलकज्जलनीलभासि
नीरन्ध्रसन्तमसि दुष्क्रमवप्रकल्प्ये ।
तस्मिन् विभाति वदनं परमं त्वदीयं
बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥ २८

धर्मध्वजोपरि लसत्कनकस्य कुम्भं
त्वत्प्रातिहार्यजनितं सुजनाः समीक्ष्य ।
तुल्योपमां विदधतीति किमुग्रबिम्बं
तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९

यस्मिन् गृहे सुकृतिनः कुरुषे निरीहः
सत्पारणां भवमहोदधितारणं त्वम् ।
कुर्वन्ति दैवतगणाः कनकस्य वृष्टि-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३०

अत्युज्ज्वलं तव यशः प्रथितं त्रिलोक्यां
शेषार्णवेन्दुमिषतः कृतरूपभेदम् ।
पातालमर्त्यदिवि सञ्चरते यथेष्टं
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥ ३१

त्वज्जन्ममज्जनविधिं सविधिं सुमेरौ
कुर्वन्त एव वरतीर्थसमुद्भवानि ।
मृत्स्नादिमङ्गलमहौषधिजीवनानि
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२

त्वत्केवलानुभवतेजतुलां लभेत
ज्ञानं न चेतरसुरस्य कषायवश्यात् ।
यादृग् मरीचिरचना हि सरस्वरश्मे-
स्तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥ ३३

गर्भाशयादनुसमुद्गतयोनियन्त्र-
पीडाकदम्बककदर्थितजन्तुराशिम् ।
भीमं चतुष्टयगतिप्रभवोग्रनागं
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३४

येन प्रचण्डतरमूर्त्तिधरावनीश-
मुख्याऽप्यनन्तजनता सकला प्रजग्धा ।
हिंस्रोग्रकालकुलसाध्वसदुर्मृगारि-
र्नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३५

यस्मिन्नभिज्वलति द(दे)ह्यतिसारभूत-
मिष्टार्थनाशकमनर्थकरं परं च (तम्) ।
क्रोधानलं विमलशान्तरसप्रमोषं
त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥ ३६

वैषम्यदोषविषदूषितजीववर्गो
विद्विष्टदुष्टमदनाख्यमहोरगेन्द्रः ।
विश्वत्रयप्रभविता विलुठेन्न तस्य
त्वन्नामनागदमनी हृदि यस्य पुंसः ॥ ३७

अन्तर्गतप्रबलदुर्जयमोहसैन्यं
कामादिकोटिभटलुण्ठितधर्मधैर्यम् ।
चैतन्यविप्लुतिकरं च यथाऽर्कतापात्
त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥ ३८

प्रागुग्रयोगधरयोगिविधूतधैर्ये
प्रौढाष्टकर्मभटभञ्जनघोरयुद्धे ।
तस्मिन्नभूतविजयं गुणसङ्घमुख्या-
स्त्वत्पादपङ्कजवनाश्रणियो लभन्ते ॥ ३९

भूयिष्ठजन्मनिधनोरुगभीरनीर-
योगापयोगलहरीगदमीनभर्तुः ।
पारं त्वदीप्सितजना भवसागरस्य
त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४०

श्वित्रोपचित्रितविरूपनिरूपिताङ्गाः
स्वोपात्तदुर्ललितकर्मविपाकविद्धाः ।
तेऽपि त्वदीयपदपद्मपरीष्टिपुण्या-
न्मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४१

ये त्वामनन्यमनसः परमार्थरक्ता-
श्चित्ते चिदेकनिलयं परिचिन्तयन्ति ।
घोरानुभावघनकर्मजपाशबन्धात्
सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४२

दन्ती(?)मृगारिदववह्निभुजङ्गयुद्ध-
वारीशदुष्टगदबन्धनजं भयौघम् ।
तस्यान्तरङ्गमपि नश्यति दुःखजालं
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४३

इत्थं जिनेन्द्रगुणसंस्तुतिमद्भुतार्थां
श्रुत्वा नरः श्रवणभूषणतां करोति ।
इष्टार्थसाधनपरा परिवर्धमाना
तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥ ४४

एवं श्री'मानतुङ्गी' कृतिरतिरुचिरा सत्समस्यापदैस्तैः
सन्दृब्धा 'पार्श्व'नाथस्तुतिरसमिलिताऽऽनन्दसन्दोहसारा ।
श्रीमच्छ्रीपाठकानां गुरुतर'विनया'द्य'प्रमोदा'भिधानां
शिष्येण प्राप्य सेवां 'विनय'पदयुजा 'लाभ'नाम्ना सुखेन ॥४५
(शा.वि.)

पू. उपाध्यायश्री धर्मवर्धनगणिविरचितम्

चतुर्थ-चरण-पादपूर्तिरूपम्

# ४१. ॥ श्रीवीरजिनभक्तामरम् ॥

(वसन्ततिलका)

राज्यर्द्धिवृद्धिभवनाद् भवने पितृभ्यां
श्री'वर्धमान' इति नाम कृतं कृतिभ्याम् ।
यस्याद्य शासनमिदं वरिवर्ति भूमा-
वालम्बनं भवजले पततां जनानाम् ॥ १

श्री'आर्षभिः' प्रणमति स्म भवे तृतीये
गर्भस्थितं तु मघवाऽस्तुत सप्तविंशे ।
यं 'श्रेणिका'दिकनृपा अपि तुष्टुवुश्च
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ २

'वीर !' त्वया विदधताऽऽमलिकीं सुलीलां
बालाकृतिश्छलकृदारुरुहे सुरो यः ।
तालायमानवपुषं त्वदृते तमुच्च-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ॥ ३

शक्रेण पृष्टमखिलं त्वमुवक्थ यत् तद्
जैनेन्द्रसञ्ज्ञकमिहाजनि शब्दशास्त्रम् ।
तस्यापि पारमुपयाति न कोऽपि बुद्ध्या
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ? ॥ ४

धर्मस्य वृद्धिकरणाय जिन ! त्वदीया
प्रादुर्भवत्यमलसद्गुणदायिनी गौः ।
पीयूषपोषणपरा वरकामधेनु-
र्नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥ ५

छिद्येत कर्मनिचयो भविनां यदाशु
त्वन्नामधाम किल कारणमीश ! तत्र ।
कण्ठे पिकस्य कफजालमुपैति नाशं
तच्चारुचूतकलिकानिकरैकहेतुः ॥ ६

देवार्यदेव ! भवता कुमतं हतं तन्-
मिथ्यात्ववत्सु सततं शतशः सुरेषु ।
सन्तिष्ठतेऽतिमलिनं गिरिगह्वरेषु
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ७

त्वन्नाम ' वीर ' इति देव ! सुरे परस्मिन्
केनापि यद्यपि धृतं न तथापि शोभाम् ।
प्राप्नोत्यमुत्र मलिने किमृजीषपृष्ठे
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ? ॥ ८

ज्ञाने जिनेन्द्र ! तव केवलनाम्नि जाते
लोकेषु कोमलमनांसि भृशं जहर्षुः ।
प्रद्योतने समुदिते हि भवन्ति किं नो
पद्माकरेषु जलजानि विकाशभाञ्जि ? ॥ ९

वादाय देव ! समियाय य 'इन्द्रभूति-'
स्तस्मै प्रधानपदवीं प्रददे स्वकीयाम् ।
धन्यः स एव भुवि तस्य यशोऽपि लोके
भूत्याऽऽश्रितं य इह नाऽऽत्मसमं करोति ॥ १०

गोक्षीरसत्सितसिताधिकमृ(मि)ष्टमिष्ट-
माकर्ण्य ते वच इहेप्सति (को)नो परस्य ।
पीयूषकं शशिमयूखविभं विहाय
क्षारं जलं जलनिधेरसितुं क इच्छेत् ? ॥ ११

अङ्गुष्ठमेकमणुभिर्मणिजैः सुरेन्द्रा
निर्माय चेत् तव पदस्य पुरो धरेयुः ।
पूष्णोऽग्र उल्मुकमिवेश ! स दृश्यते वै
यत् ते समानमपरं न हि रूपमस्ति ॥ १२

उज्जाघटीति तमसि प्रचुरप्रचारं
मिथ्यात्विनां मतमहो न तु दर्शने ते ।
काकारिचक्षुरिव वा न हि चित्रमत्र
यद् वासरे भवति पाण्डुपलाशकल्पम् ॥ १३

वन्या द्विपा इव सदैव कषायवर्गा
भञ्जन्ति नूतनतरूनिव सर्वजन्तून् ।
सिंहातिरेकतरसं हि विना भवन्तं
कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥ १४

द्विट् 'सङ्गमे'न महतामुपसर्गकाणां
या विंशतिस्तु ससृजे जिन ! नक्तमेकम् ।
चित्तं चचाल न तया तव झञ्झया तु
किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥ १५

निःस्नेह ! निर्दश ! निरञ्जन ! निःस्वभाव !
निष्कृष्णवर्त्म ! निरमत्र ! निरङ्कुशेश ! ।
नित्यद्युते ! गतसमीरसमीरणात्र
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६

विस्तारको निजगवां तमसः प्रहर्ता
मार्गस्य दर्शक इहासि च सूर्य एव ।
स्थाने च दुर्दिनहतेः करणाद् विजाने
सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥ १७

प्रह्लादकृत् कुवलयस्य कलानिधानं
पूर्णश्रियं च विदधच्च यशस्त्वदीयम् ।
वर्वर्ति लोकबहुकोकसुखङ्करत्वाद्
विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥ १८

यद् देहिनां जिनवराब्दिकभूरिदानै-
दौःस्थ्यं हतं हि भवता किमु तत्र चित्रम् ? ।
दुर्भिक्षकष्टदलनात् क्रियते सदौप-
कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥ १९

यादृक् सुखं भवति ते चरणेऽत्र दृष्टे
तादृक् परर्भुवदनेऽपि न देहभाजाम् ।
प्राप्ते यथा सुरमणौ भवति प्रमोदो
नैवं तु काचशकले किरणाकुलेऽपि ॥ २०

एवं प्रसीद जिन ! येन सदा भवेऽत्र
त्वच्छासनं लगति मे सुमनोहरं च ।
त्वत्सेवको भवति यः स जनो मदीयं
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१

भामण्डलं जिन ! चतुर्मुख ! दिक्चतुष्के
तुल्यं चकासदवलोक्य सभा व्यमृक्षत् ।
सूर्यं समा अपि दिशो जनयन्ति किं वा
प्राच्येव दिग् जनयति स्फुरदंशुजालम् ? ॥ २२

शम्भुर्गिरीश इह दिग्वसनः स्वयम्भू-
मृत्युञ्जयस्त्वमसि नाथ ! महादिदेवः ।
तेनाम्बिका निजकलत्रमकारि तत् त्वन्-
नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥ २३

जानन्ति यद्यपि चतुर्दश चारुविद्या
देशोनपूर्वदशकं च पठन्ति सार्थम् ।
सम्यक्त्वमीश ! न धृतं तव नैव तेषां
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २४

नृणां गणा गुणचणाः पतयोऽपि तेषां
ये ये सुराः सुरवराः सुखदास्तकेऽपि ।
कृत्वाऽञ्जलिं जिन ! चरिक्रति ते स्तुतिं तद्
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥ २५

रोगा झषा बहुमहामकराः कषाया-
श्चिन्तैव यत्र वडवाग्निरसातमम्भः ।
वार्धिर्भवः सर इव त्वयका कृतस्तत्
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥ २६

यद् यस्य तस्य च जनस्य हि पारवश्य-
मावश्यकं जिन ! मया वरिवस्ययाऽऽप्तम् ।
तत् तर्कयामि बहुमोहतया मया त्वं
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७

रम्येन्द्रनीलरुचिवेषभृतो जनन्याः
पार्श्वं श्रितस्य धयतश्च पयोधरं ते ।
रूपं रराज नवकाञ्चनरुक् तमोघ्नं
बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥ २८

'इक्ष्वाकु'नामनि कुले विमले विशाले
सद्रत्नराजिनि विराजत उद्भवस्ते ।
दोषापहारकरणः प्रकटप्रकाश-
स्तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९

स्नानोदकैर्जिन(र्जनि)महे सुरराजिमुक्तै-
र्गात्रे पतद्भिरपि नूनमनेजमानम् ।
दृष्ट्वा भवन्तममराः प्रशशंसुरीश-
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३०

ये त्रिप्रदक्षिणतया प्रभजन्ति 'वीरं'
ते स्युर्नरा अहमिवाद्भुतकान्तिभाजः ।
वप्रत्रयं वददिति प्रविभाति तेऽत्र
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥ ३१

कान्तारवर्त्मनि नराः पतिताः कदाचिद्
दैवात् क्षुधा च तृषया परिपीडिताङ्गाः ।
ये त्वां स्मरन्ति च गृहाणि सरांसि भूरि-
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२

सन्निश्चला जिन ! यथा तव चित्तवृत्तिः
कस्यापि नैवमपरस्य तपस्विनोऽपि ।
यादृक् सदा जिनपते ! स्थिरता ध्रुवस्य
तादृक् कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥ ३३

ओत्वाखवोऽहिगरुडाः पुनरेणसिंहा
अन्येऽङ्गिनोऽपि च मिथो जनिवैरबन्धाः ।
तिष्ठन्ति ते समवसृत्यविरोधिनं त्वां
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३४

यस्ते प्रणश्य चमरोंऽह्रितले प्रविष्ट-
स्तं हन्तुमीश ! न शशाक भिदुश्च शक्रः ।
तद् युक्तमेव विबुधाः प्रवदन्ति कोऽपि
नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३५

पूर्वं त्वया सदुपकारपरेण तेजो-
लेश्या हता जिन ! विधाय सुशीतलेश्याम् ।
अद्यापि युक्तमिदमीश ! तथा भयाग्निं
त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥ ३६

ऊर्ध्वस्य ते बिलमुखे वचनं निशम्य
य'च्चण्डकौशिक'फणी शमतामवाप ।
तत् साम्प्रतं तमपि नो स्पृशतीह नाग-
स्त्वन्नामनागदमनी हृदि यस्य पुंसः ॥ ३७

तुर्यारके विचरसि स्म हि यत्र देशे
तत्र त्वदागमत ईतिकुलं ननाश ।
अद्यापि तद्भयमहर्मणिधामरूपात्
त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥ ३८

निर्विग्रहाः सुगतयः शुभमानसाशाः
सच्छुक्लपक्षविभवाश्चरणेषु रक्ताः ।
रम्याणि मौक्तिकफलानि च साधुहंसा-
स्त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ३९

संसारकाननपरिभ्रमणश्रमेण
क्लान्ताः कदापि दधते वचनं कृतं ते ।
ते नाम कामितपदे जिन ! देहभाज-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४०

सर्वेन्द्रियैः पटुतरं चतुरस्रशोभं
त्वां सत्प्रशस्यमिह दृश्यतरं प्रदृश्य ।
तेऽपि त्यजन्ति निजरूपमदं विभो ! ये
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४१

छित्त्वा दृढानि जिन ! कर्मनिबन्धनानि
सिद्धस्त्वमापिथ च सिद्धपदं प्रसिद्धम् ।
एवं तवानुकरणं दधते तकेऽपि
सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४२

न व्याधिराधिरतुलोऽपि न मारिरारं
नो विड्वरोऽशुभतरो न दरो ज्वरोऽपि ।
व्यालोऽनलोऽपि न हि तस्य करोति कष्टं
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४४

त्वत्स्तोत्रमौक्तिकलतां सुगुणां सुवर्णां
त्वन्नामधामसहितां रहितां च दोषैः ।
कण्ठे य ईश ! कुरुते धृत'धर्मवृद्धि'-
स्तं 'मानतुङ्गम'वशा समुपैति लक्ष्मीः ॥ ४४

अथ प्रशस्तिः-

रसगुणमुनिभूमेऽब्दे (१७३६)ऽत्र भक्तामरस्थैः
चरमचरमपादैः पूरयन् सत्समस्याः ।
सुगुरु'विजयहर्षा' वाचकास्तद्विनेय-
श्चरमजिननुतिं ज्ञो 'धर्मसिंहो' व्यधत्त ॥ (मालिनी) १

पू. आ. श्री धर्मसिंहसूरिविरचितम्
चतुर्थ-चरण-पादपूर्तिरूपम्

# ४२. ॥ श्रीसरस्वती-भक्तामरम् ॥

(वसन्ततिलका)

भक्तामरभ्रमरविभ्रमवैभवेन,
लीलायते क्रमसरोजयुगो यदीयः ।
निघ्नन्नरिष्टभयभित्तिमभीष्टभूमा-
वालम्बनं भवजले पततां जनानाम् ॥ १

मत्वैव यं जनयितारमरंस्त हस्ते,
या संश्रितां विशदवर्णलिपिप्रसूत्या ।
'ब्राह्मी' मजिह्मगुणगौरवगौरवर्णां,
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ (युग्मम्) २

मातर् ! मतिं सति ! सहस्रमुखीं प्रसीद,
नालं मनीषिणि ! मयीश्वरि ! भक्तिवृत्तौ ।
वक्तुं स्तवं सकलशास्त्रनयं भवत्या-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ? ॥ ३

त्वां स्तोतुमत्र सति ! चारुचरित्रपात्रं,
कर्तुं स्वयं गुणदरीजलदुर्विगाह्यम् ।
एतत् त्रयं विडुपगूहयितुं सुराद्रिं,
को वा तरीतुलमम्बुनिधिं भुजाभ्याम् ? ॥ ४

त्वद्वर्णनावचनमौक्तिकपूर्णमीक्ष्य,
मातर् ! न भक्तिवरटा तव मानसं मे ।
प्रीतेर्जगत्त्रयजन-ध्वनिसत्यताया,
नाभ्येति किं निजशिशोः परिपालनार्थम् ? ॥ ५

वीणास्वनं स्वसहजं यदवाप मूर्च्छां,
श्रोतुर्न किं त्वयि सुवाक् ! प्रियजल्पितायाम् ।
जातं न कोकिलरवं प्रतिकूलभावं,
तच्चारुचूतकलिका निकरैकहेतुः ॥ ६

त्वन्नाममन्त्रमिह भारतसम्भवानां,
भक्त्यैति भारति ! विशां जपतामघौघम् ।
सद्यः क्षयं स्थगितभूवलयान्तरिक्षं,
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ७

श्रीहर्ष-माघ-वरभारवि-कालिदास-
वाल्मीकि-पाणिनि-मम्मटमहाकवीनाम् ।
साम्यं त्वदीयचरणाब्जसमाश्रितोऽयं,
मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ८

विद्यावशा-रसिकमानस-लालसानां,
चेतांसि यान्ति सुदृशां धृतिमिष्टमूर्ते ! ।
त्वय्यर्यमत्विषि तथैव नवोदयिन्यां,
पद्माकरेषु जलजानि विकाशभाञ्जि ॥ ९

त्वं किं करोषि न शिवे ! न समानमानान्,
त्वत्संस्तवं पिपठिषो विदुषो गुरूहः ।
किं सेवयन्नुपकृते सुकृतैकहेतुं,
भूत्याश्रितं य इह नात्मसमं करोति ? ॥ १०

यत् त्वत्कथामृतरसं सरसं निपीय,
मेधाविनो नवसुधामपि नाद्रियन्ते ।
क्षीरार्णवार्ण उचितं मनसाऽप्यवाप्य,
क्षारं जलं जलनिधेरशितुं क इच्छेत् ? ॥ ११

जैना वदन्ति वरदे ! सति ! साधुरूपां,
त्वामामनन्ति नितरामितरे 'भवानीम्' ।
सारस्वतं मतविभिन्नमनेकमेकं,
यत्ते समानमपरं न हि रूपमस्ति ॥ १२

मन्ये प्रभूतकिरणौ श्रुतदेवि ! दिव्यौ,
त्वत्कुण्डलौ किल विडम्बयतस्तमायाम् ।
मूर्तं दृशामविषयं भविभोश्च पूष्णो,
यद् वासरे भवति पाण्डुपलाशकल्पम् ॥ १३

ये व्योमवातजलवह्निमृदां चयेन,
कायं प्रहर्षविमुखांस्त्वदृते श्रयन्ति ।
जातानवाम्ब ! जडताद्यगुणानणून् मां,
कस्तान् निवारयति सञ्चरतो यथेष्टम् ? ॥ १४

अस्मादृशां वरमवाप्तमिदं भवत्याः,
सत्याव्रतोरु विकृतेः सरणिं न यातम् ।
किं चोद्यमैन्द्रमनघे ! सति ! 'शारदे'ऽत्र,
किं मन्दराद्रिशिखरं चलितं कदाचित् ? ॥ १५

निर्माय शास्त्रसदनं यतिभिर्ययैकं,
प्रादुष्कृतः प्रकृतितीव्रतपोमयेन ।
उच्छेदितांह-उलपैः सति ! गीयसे चिद्-,
दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १६

यस्या अतीन्द्रगिरिराङ्गिरसप्रशस्य-,
स्त्वं शाश्वती स्वमतसिद्धिमही महीयः ।
ज्योतिष्मयी च वचसां तनुतेज आस्ते,
सूर्यातिशायि महिमाऽसि मुनीन्द्रलोके ॥ १७

स्पष्टाक्षरं सुरभिसुभ्रु ! समृद्धशोभं,
जेगीयमानरसिकाप्रियपञ्चमेष्टम् ।
देदीप्यते सुमुखि ! ते वदनारविन्दं,
विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥ १८

प्राप्नोत्यमुत्र सकलावयवप्रसङ्गि !
निष्पत्तिमिन्दुवदने ! शिशिरात्मकत्वम् ।
सिक्तं जगत् त्वदधरामृतवर्षणेन,
कार्यं कियज्जलधरैर्जलभारनम्रैः ? ॥ १९

मातस्त्वयि मम मनो रमते मनीषि-
मुग्धागणे न हि तथा नियमाद् भवत्याः ।
त्वस्मिन्नमेयपणरोचिषि रत्नजातौ,
नैवं तु काचशकले किरणाकुलेऽपि ॥ २०

चेतस्त्वयि श्रमणि ! पातयते मनस्वी,
स्याद्वादिनिम्ननयतः प्रयते यतोऽहम् ।
योगं समेत्य नियमव्यवपूर्वकेन,
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २१

ज्ञानं तु सम्यगुदयस्यनिशं त्वमेव,
व्यत्यासंसंशयधियो मुखरा अनेके ।
गौराङ्गि ! सन्ति बहुभाः ककुभोऽर्कमन्याः,
प्राच्येव दिग् जनयति स्फुरदंशुजालम् ॥ २२

यो रोदसी मृतिजनी गमयत्युपास्य,
जाने स एव सुतनु ! प्रथितः पृथिव्याम् ।
पूर्वं त्वयाऽऽदिपुरुषं सदयोऽस्ति साध्वि !,
नान्यः शिवः शिवपदस्य मुनीन्द्रपन्थाः ॥ २३

दीव्यद्दयानिलयमुन्मिषदक्षिपद्मं,
पुण्यं प्रपूर्णहृदयं वरदे ! वरेण्यम् ।
त्वद्भूघनं सघनरश्मि महाप्रभावं,
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २४

कैवल्यमात्मतपसाऽखिलविश्वदर्शि,
चक्रे ययाऽऽदिपुरुषः प्रणयां प्रमायाम् ।
जानामि विश्वजननीति च देवते ! सा,
व्यक्तं त्वमेव भगवन् पुरुषोत्तमोऽसि ॥ २५

सिद्धान्त एधि फलदो बहुराज्यलाभो,
न्यस्तो यया जगति विश्वजनीनपन्थाः ।
विच्छित्तये भवततेरिव देवि ! मन्थाः
तुभ्यं नमो जिनभवोदधिशोषणाय ॥ २६

मध्याह्नकालविहृतौ सवितुः प्रभायां,
सैवेन्दिरे ! गुणवती त्वमतो भवत्याम् ।
दोषांश इष्टचरणैरपरैरभिज्ञैः,
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २७

हारान्तरस्थमयि ! कौस्तुभमत्र गात्र-
शोभां सहस्रगुणयत्युदयास्तगिर्योः ।
वन्द्याऽस्यतस्तव सतीमुपचारिरत्नं,
बिम्बं रवेरिव पयोधरपार्श्ववर्ति ॥ २८

अज्ञानमात्रतिमिरं तव वाग्विलासा
विद्याविनोदिविदुषां महतां मुखाग्रे ।
निघ्नन्ति तिग्मकिरणा निहिता निरीहे,
तुङ्गोदयाद्रिशिरसीव सहस्ररश्मेः ॥ २९

पृथ्वीतलं द्वयमपायि पवित्रयित्वा,
शुभ्रं यशो धवलयत्यधुनोर्ध्वलोकम् ।
प्राग् लङ्घयत् सुमुखि ! ते यदिदं महिम्ना-,
मुच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३०

रोमोर्मिभिर्भुवनमातरिव त्रिवेणी-
सङ्गं पवित्रयति लोकमदोऽङ्गवर्ति ।
विभ्राजते भगवति ! त्रिवलीपथं ते,
प्रख्यापयत् त्रिजगतः परमेश्वरत्वम् ॥ ३१

भाष्योक्तियुक्तिगहनानि च निर्मिमीषे,
यत्र त्वमेव सति ! शास्त्रसरोवराणि ।
जानीमहे खलु सुवर्णमयानि वाक्य-,
पद्मानि तत्र विबुधाः परिकल्पयन्ति ॥ ३२

वाग्वैभवं विजयते न यथेतरस्या,
'ब्राह्मि !' प्रकामरचनारुचिरं तथा ते ।
ताडङ्कयोस्तव गभस्तिरतीन्दुभान्वो-
स्तादृक्कुतो ग्रहगणस्य विकाशिनोऽपि ? ॥ ३३

कल्याणि ! सोपनिषदः प्रसभं प्रगृह्य,
वेदानतीन्द्रजदरो जलधौ जुगोप ।
भीष्मं विधेरसुरमुग्ररुषाऽपि यस्तं,
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३४

गर्जद्घनाघनसमानतनूगजेन्द्र-,
विष्कम्भकुम्भपरिरम्भजयाधिरुढः ।
द्वेष्योऽपि भूप्रसरदश्वपदातिसैन्यो,
नाक्रामति क्रमयुगाचलसंश्रितं ते ॥ ३५

मांसासृगस्थि-रस-शुक्र-सलज्जमज्जा,
स्नायूदिते वपुषि पित्तमरुत्कफाद्यैः ।
रोगानलं चपलितावयवं विकारै-,
स्त्वन्नामकीर्तनजलं शमयत्यशेषम् ॥ ३६

मिथ्याप्रवादनिरतं व्यधिकृत्यसूय-
मेकान्तपक्षकृतकक्षविलक्षितास्यम् ।
चेतोऽस्तभीः स परिमर्दयते द्विजिह्वं,
त्वन्नामनागदमनी हृदि यस्य पुंसः ॥ ३७

प्राचीनकर्मजनितावरणं जगत्सु,
मौढ्यं मदाढ्यदृठमुद्रितसान्द्रतन्द्रम् ।
दीपांशुपिष्टमयि ! सद्मसु देवि ! पुंसां,
त्वत्कीर्तनात् तम इवाशु भिदामुपैति ॥ ३८

साहित्यशाब्दिकरसामृतपूरितायां,
सत्तर्ककर्कशमहोर्मिमनोरमायाम् ।
पारं निरन्तरमशेषकलन्दिकायां,
त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ३९

संस्थैरुपर्युपरि लोकमिलौकसो ज्ञा,
व्योम्नो गुरुज्ञकविभिः सह सख्यमुच्चैः ।
अन्योऽन्यमान्यमिति ते यदवैमि मात-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४०

देवा इयन्त्यजनिमम्ब ! तव प्रसादात्,
प्राप्नोत्यहो प्रकृतिमात्मनि मानवीयाम् ।
व्यक्तं त्वचिन्त्यमहिमा प्रतिभाति तिर्यङ्,
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४१

ये चानवद्यपदवीं प्रतिपद्य पद्मे !
त्वाच्छिक्षिता वपुषि वासरतिं लभन्ते ।
नोऽनुग्रहात् तव शिवास्पदमाप्य ते यत्,
सद्यः स्वयं विगतबन्धभया भवन्ति ॥ ४२

इन्दोः कलेव विमलाऽपि कलङ्कमुक्ता,
गङ्गेव पावनकरी न जलाशयाऽपि ।
स्यात् तस्य भारति ! सहस्रमुखी मनीषा,
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४३

योऽहञ्जयेऽकृत जयोऽगुरुषेऽमकर्ण-
पादप्रसादमुदि तो गुरुधर्मसिंहः ।
वाग्देवि ! भूम्नि भवतीभिरभिज्ञसङ्के,
तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥ ४४

महोपाध्यायश्री हेमहंसगणिवरविरचितः
भक्तामरस्य द्वादशतः विंशतिपर्यन्त-पद्यानां प्रत्येकचरणानां पादपूर्तिमयः

## ४३. ॥ श्रीसाधारणजिनस्तवः ॥

(वसन्ततिलका)

भक्तामरस्तवनमध्यगतानि यानि,
वृत्तानि सन्ति नव सातिशयान्यतीव ।
एकैकतच्चरणरूपसमस्ययाऽहं,
स्वस्वाश्रयस्थितिजुषैव जिनं नुवामि ॥ १

**यैः शान्तरागरुचिभिः परमाणुभिस्त्व-**
मप्यानतो नृभिरिमेऽप्यनघाः स्युरेव ।

स्यादेव नूनमजरामरता कथञ्चित्,
पीता सुधा यदि रुचेरिह को विचारः ? ॥ २

त्रैलोक्यपूर्त्यधिकतावककीर्तिराशि-
**निर्मापितस्त्रिभुवनैकललामभूतः ।**
सम्पिण्ड्य सैष विधिना निधिना मतीनां,
मन्ये महोदयशीलेति विदो विदुस्तम् ॥ ३

यान् व्याडिराह नियतान् प्रतिमासमेका-
द्यङ्का (६) न्तसङ्ख्यशतयुक्तमथो सहस्रम् ।
**तावन्त एव खलु तेऽप्यणवः पृथिव्यां,**
रव्यंशवः किमु समास्त्वदनन्तभासाम् ॥ ४

यैरागृहीतमुपमैकमलङ्कृतीनां,
काव्येषु बीजमिति हा ! कुधियो हतास्ते ।
यत्त्वां कथं कवयितार इमे वराका
**यत्ते समानमपरं नहि रूपमस्ति ॥** ५

**वक्त्रं क्व ते सुरनरोरगनेत्रहारि ?**
कुण्डं क्व चामृतरसस्य भुजङ्गभीष्मम् ? ।
यत्तुल्यतामपि तयोः प्रतिपादयन्ति,
तेभ्यो नमः शुचिविचारचतुर्मुखेभ्यः ? ॥ ६

देव ! त्वदीयचरितं हृदुपैति याव-
**न्निश्शेषनिर्जितजगत्त्रितयोपमानम् ।**
तावन्मतिर्मम सतीरसतीव्रतेव,
स्तुत्याऽन्तरस्य नहि सम्मुखमीक्षतेऽपि ॥ ७

क्षीराब्धिगर्भसलिलैर्घटितानि नूनं,
वाक्यानि ते विमलतातिशयाञ्चितानि ।

**बिम्बं कलङ्कमलिनं क्व निशाकरस्य ?,**
तेषां तु यातु परिणामि-निदानतायाम् ॥ ८

नित्यं निशासु शशिबिम्बमुदीय दीपं,
दीपं यथेष्टमधिकाधिकदीप्तिरूपैः ।
चेन्नैति ते मुखतुलां त्रपयोचितं तद्,
**यद्वासरे भवति पाण्डुपलाशकल्पम्** ॥ ९

**सम्पूर्णमण्डलशशाङ्ककलाकलाप-**
मुन्मुद्य किञ्चिदपसार्य च पङ्कमाङ्कम् ।
चेत्तं पृथक् क्वचन सञ्चिनुते विरञ्चि-
स्तत् त्वद्गिरो निरुपमत्वमदं पिदध्यात् ॥ १०

त्वं देशमेतमधुना प्रपुनासि पादैः
**शुभ्रा गुणास्त्रिभुवनं तव लङ्घयन्ति ।**
तन्नूनमेतदनृतं गुणिनं विहाय,
यन्नो गुणाः क्वचन केवलतां भजन्ति ॥ ११

क्षान्तिर्दृढा तव गिरो मृदुलाश्च कीर्त्ति-
र्लोकम्पृणाऽथ परतापकरः प्रतापः ।
**ये संश्रितास्त्रिजगदीश्वरनाथमेकं,**
त्वामेव तेष्वपि किमेवमहो ! विरोधः ॥ १२

लुम्पन्ति गा द्विजपतेस्तमपीरयन्ति,
कण्ठे लगन्ति सुमनः सुदृशामशङ्कम् ।
मुक्तार्गलास्तव गुणा यदि वा प्रभुत्वात्
**कस्तान्निवारयति सञ्चरतो यथेष्टम्** ॥ १३

**चित्रं किमत्र यदि ते त्रिदशाङ्गनाभिः,**
कण्ठेकृतः सपदि सद्गुणरत्नहारः ।

सद्वृत्तनिर्मलमहार्घतमेन जज्ञे,
यन्नायकेन भवता भुवनप्रियोऽयम् ॥ १४

अक्षैः कषायविषयैश्च न कौतुकं ते,
**नीतं मनागपि मनो न विकारमार्गम् ।**
वर्षाऽऽतपोत्थमथवा किमु चर्मरीत्या,
व्योम्नोऽपि मार्दवकठोरिमवैकृतं स्यात् ॥ १५

क्षान्तोऽसि नाथ ! परमात्मसभाजिनां नः,
पीडासु किं किमपि नो तनुषे स्वतेजः ।
**कल्पान्तकालमरुता चलिताचलेन,**
यस्मात्पयोधिरपि लङ्घयति स्वसीमाम् ॥ १६

विद्योन्मदैरपि न कौतुकमन्यतीर्थ्यै-
र्नो शक्यते चलयितुं तव शासनश्रीः ।
दृष्टं श्रुतं क्वचन वा घनवातवृन्दैः,
**किं मन्दराद्रिशिखरं चलितं कदाचित् ॥** १७

**निर्धूमवर्त्तिरपवर्जिततैलपूरः,**
खे दीप्रदीप इयता ननु कोऽर्थ उल्का ।
कुक्षिम्भरिस्त्रिजगतां यमुनाऽमुनापि,
स्यादेतदेव विदुषां तव देव ! कीर्त्तिः ॥ १८

यत्त्वं गिरा मधुकिरा किल केदलीन्द्रः,
**कृत्स्नं जगत्त्रयमिदं प्रकटीकरोषि ।**
तत्तावकीनकरणिं कियदेतिकां ये,
कर्त्तुं स्पृशन्ति विलिखन्ति नखैर्गिरिं ते ॥ १९

स्पर्द्धां विधाय भवतोन्तिषदापि कश्चिद्
यातः स्वमानमविहाय भवेदिदं चेत् ।

**गम्यो न जातु मरुतां चलिताचलाना-**
मेरण्डकोद्रिशिरसीत्यपि सूनृतं तत् ॥ २०

दुःखेऽत्र दुष्षमतमासमये तमोभि-
र्व्यालुप्तचक्षुषि जने सुपथप्रवृत्त्यै ।
निष्कम्पनिर्मलनिरञ्जननित्यदीप्ति-
**र्दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥** २१

**नास्तं कदाचिदुपयासि न राहुगम्यः,**
पूर्णः सदाप्यनवमः सुदशाधिकश्च ।
धत्ते कलङ्ककणिकामपि नो बुधेष्टः,
स्पष्टं तथाप्यमृतसूरसि चित्रमेतत् ॥ २२

न स्नेहमुद्वहसि नाञ्जन-तीव्रते वा,
**स्पष्टीकरोषि सहसा युगपज्जगन्ति ।**
दीपः क्व तत् क्व च भवाँस्तदपीह विज्ञं-
मन्योऽपि किं बत ! पतङ्गति दोषिवर्गः ॥ २३

भौमं न तन्न च खजन्मजडैरनाशा-
स्थैर्याच्च न ग्रहगणप्रभवं यतस्त्वम् ।
**नाम्भोधरोदरनिरुद्धमहाप्रभाव-**
स्तज्ज्योतिरीश ! कतमन्ननु यन्मयोऽसि ॥ २४

रात्रिन्दिवाऽभ्युदयिता रुचिसञ्चयाना-
मह्नासिता च मिहिरे न महोमयेऽपि ।
ते तु त्वयीश ! सततं वसतस्ततस्त्वं,
**सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥** २५

**नित्योदयं दलितमोहमहान्धकारं,**
त्वां दीप्यमानमभितः स्वतनुप्रभाभिः ।
मन्येऽनुकर्त्तुमिह दीपशिखाभिधानाः
स्वःशाखिनस्तदनुरूपमहो ! यतन्ते ॥ २६

ज्योत्स्नेन्दुमाह नु विधो ! भवतेश ! पार्श्वे,
**गम्यं न राहुवदनस्य न वारिदानाम् ।**
तद्योगकश्मलतयाऽस्य न जातु यातु,
त्वत्कीर्त्तिसाम्यपदवीति विदग्धबुद्ध्या ॥ २७

सन्नेत्रपत्रलममत्रममात्रलक्ष्म्याः,
सद्यः प्रसादजननं जनलोचनानाम् ।
**विभ्राजते तव मुखाब्जमनल्पकान्ति,**
प्रेङ्खत्यरागपरिषङ्गपिशङ्गिताशम् ॥ २८

निस्तेजसी भवति कर्ह्यपि नान्धकारं,
नो मन्दयेत् कषति किन्तु समूलकाषम् ।
तृप्नोति कस्य नयनानि न ते मुखाब्जं,
**विद्योतयज्जगदपूर्वशशाङ्कबिम्बम् ॥** २९

**किं शर्वरीषु शशिनाऽह्नि विवस्वता वा,**
शक्येत कोऽपि तमसां प्रसरो निरोद्धुम् ।
अव्याहतैस्तव महोभिरिमानि पूर्व-
मुद्योतिभिर्यदि हि जर्जरितानि न स्युः ॥ ३०

बाह्येषु चान्तरगतेषु च विष्टपस्य,
**युष्मन्मुखेन्दुदलितेषु तमस्सु नाथ ! ।**
एतौ जगत्युदयतो यदि पुष्पदन्तौ
तन्नूनमान्तरतमःक्षयशिक्षणार्थम् ॥ ३१

स्वामिन् ! प्रभावविभवैर्भुवने भृते ते,
सर्वेऽप्यमी जनपदाः सुखदा भृशं नः ।
**निष्पन्नशालिवनशालिनि जीवलोके,**
यद्वा शुकः क्वचन तिष्ठति किं क्षुधार्त्तः ? ॥ ३२

मुक्त्यर्थिनां किमपरैरभियोगयोगै-
स्त्वत्पादभक्तिकरणे यदि शक्तिरस्ति ।
चेत् शालयः समूदपत्सत पङ्क्तिलैस्तत्,
**कार्यं कियज्जलधरैर्जलभारनम्रैः ॥** ३३

**ज्ञानं यथा त्वयि विभाति कृतावकाशं,**
साऽऽलोकलोककलनास्वनिभं नभस्वत् ।
क्वाऽन्येषु तस्य कणिकाऽप्यथवाऽऽप्यते किं,
कल्पद्रुमः क्वचन मारवमेदनीषु ॥ ३४

दैवी कला त्वयि यथाऽर्हति सम्यगास्ते,
**नैवं तथा हरिहरादिषु नायकेषु ।**
यत्सौरभं मलयचन्दनपादपानां,
भाव्यं क्व तेन मरुमण्डलशाल्मलीषु ? ॥ ३५

श्रीसर्ववेदिनि जिन ! त्वयि यादृशी श्रीः,
क्वैषा कियन्मतिधरेषु सुरान्तरेषु ।
**तेजःस्फुरन्मणिषु याति यथा महत्त्वं,**
किं दुष्टलोष्टशकलेऽपि तथैव तत् स्यात् ? ॥ ३६

साऽऽडम्बरेष्वपि सुरेष्वपरेषु नेत्रे,
नो रंरतस्त्वयि यथा गतडम्बरेऽपि ।
ज्ञानां रतिर्भवति धूसरितेऽपि रत्ने,
**नैवं तु काचशकले किरणाकुलेऽपि ॥** ३७

भक्तामरस्थनवपद्यपदप्रसूनैः,
षट्त्रिंशतेति खचितां नवकाव्यमालाम् ।
भक्त्या विधाय महितः परमेश्वरो मे,
श्रीसोमसुन्दरशिवालयवासदः स्तात् ॥ ३८

पू. मु. श्री रत्नमुनिप्रणीतम्

# ४४. ॥ श्रीभक्तामरच्छायास्तोत्रम् ॥

(अनुष्टुप्)

नम्रदेवशिरोरत्न–भासकं जिनपत्कजम् ।
प्रणम्याखिलपापघ्नं, संसारजलतारणम् ॥ १

सर्वशास्त्रपरिज्ञानात्, संस्तुतो यः सुरेश्वरैः ।
उदाररुचिरस्तोत्रैः, स्तोष्ये तं प्रथमं प्रभुम् ॥ २

प्रभो ! बुद्ध्या विनाऽपि त्वां, स्तुवानोऽस्मि गतत्रपः ।
वारिकुण्डस्थितं चन्द्रं, बालः किं न हि लिप्सति ? ॥ ३

धिषणोऽपि गुणाम्भोधे ! गुणास्ते ख्यातुमक्षमः ।
दुर्वायूद्धूतयादस्कः, सागरः केन तीर्यते ? ॥ ४

तथापि सोऽहं त्वद्भक्ते–स्तवास्मि स्तवनोद्यमः ।
निर्विवेकोऽर्भकान् पातुं, मृगो नाभ्येति किं हरिम् ? ॥ ५

समुखत्वं भवत्पाद–प्रसादादेव भाति मे ।
प्राप्ताम्रकलिकास्वादः, कलं कूजति कोकिलः ॥ ६

त्वत्स्तुत्याऽनादिजं पापं, प्राणिनां क्षीयते क्षणात् ।
मार्तण्डकिरणस्पृष्टं, नाशं याति निशातमः ॥ ७

इति मत्वाऽऽरभे स्तोत्रं, तव विद्वन्मनोहरम् ।
अरविन्देषूदबिन्दु–मौक्तिकद्युतिमश्नुते ॥ ८

आस्तां स्तवस्ते निर्दोष–स्त्वद्वार्ताऽपि शिवङ्करी ।
प्रभाऽपि कुरुते भानो–र्विकचान्यम्बुजानि यत् ॥ ९

दुर्घटं किमु जायन्ते, यदि त्वमिव तावकाः ।
भृत्यं वा स्वसमं भूत्या, यो न निर्माति तेन किम् ? ॥ १०

त्वां परं दृश्यमालोक्य, चक्षुर्नान्यत्र रज्यते ।
क्षीरसिन्धुपयः पीत्वा, क्षाराब्ध्यम्बु क ईहते ? ॥ ११

कारितोऽसि ललामात्मा, जगतां येन कर्मणा ।
तावन्त एव तस्यांशा-स्त्वत्तुलाऽन्यत्र नास्ति यत् ॥ १२

क्व ते वक्त्रं निरुपमं, नाकिनागेन्द्रकामितम् ।
कलङ्किमण्डलं क्वेन्दो-र्यद् बताहनि निष्प्रभम् ॥ १३

विशुद्धविभवाः स्वामिन् ! भुवनं लङ्घयन्ति ते ।
संश्रिता ये त्रिलोकीशं, तेषां विघ्नाय को भवेत् ? ॥ १४

विकारमार्गं नीतोऽसि, नामरीभिरपि प्रभुः ।
जिताद्रिः शक्यते जेतुं, न मेरुं प्रलयानिलः ॥ १५

निर्धूमवर्तिर्निस्तैलः सर्वभावावभासकः ।
अगम्यो मरुतां त्रात-र्दीपोऽसि त्वमिहापरः ॥ १६

नास्तमेषि न वश्योऽसि, तमसोऽभ्रैर्न रुध्यसे ।
सूर्यादित्यतिशेषे त्वं, लोकालोकप्रकाशकः ॥ १७

मोहान्धकारसंहर्ता-ऽनन्तोद्द्योतकलोदय ! ।
गोचरो नागु मेघानां, त्वमपूर्वोऽसि चन्द्रमाः ॥ १८

त्वयाऽवतमसे ध्वस्ते, किं कार्यं पुष्पदन्तयोः ? ।
निष्पत्तिर्यदि शालीनां, स्वयं वारिधरैरलम् ॥ १९

त्वयि ज्ञानं यथा व्याप्तं, नैवं हरि-हरादिषु ।
यथा तेजोऽस्ति रत्नेषु, नो काचशकले तथा ॥ २०

मन्ये शिवादयः श्रेष्ठा यैर्दृष्टैस्त्वं विनिश्चितः ।
त्वयेक्षितेन किं येन, नान्यो हरति मे मनः ॥ २१

त्वां सुतं मरुदेवैव, माता प्रसुषुवे प्रभो ! ।
प्राच्येव जनयत्यर्कं, तारास्तु सकला दिशः ॥ २२

आदित्यवर्णं वितमः-पुमांसं त्वां विदुः परम् ।
त्वामेव लब्ध्वा सिध्यन्ति, न सिद्धिर्निगमान्तरे ॥ २३

समस्तवस्तुस्तोमज्ञ-मसङ्ख्यांशमकर्तृकम् ।
तद्भावाव्ययितं सन्तं, त्वामाहुर्मुनयो जिनम् ॥ २४

बुद्धोऽसि बोधतोऽशेष-शङ्करत्वाच्च शङ्करः ।
ध्याता तीर्थकरत्वात् त्वं, व्यक्तेस्त्वं पुरुषोत्तमः ॥ २५

नमस्ते दुःखकक्षाग्ने ! नमस्ते भूमिभूषण ! ।
नमस्ते परमेष्ठ्यात्मन् ! नमस्ते पापमोचन ! ॥ २६

स्थानान्तरमविन्दन्तो विश्वे त्वामागता गुणाः ।
आश्रयानन्त्यदृप्तैस्त्वं, दोषैः स्वप्नेऽपि नादृतः ॥ २७

अशोकं समया रूप-मुद्दीप्ति तव भासते ।
घनाघनघटापार्श्वे, यथा बिम्बं विवस्वतः ॥ २८

मणिसिंहासने देहः, स्वर्णवर्णो विभाति ते ।
उदयाचलमूर्ध्नीव, विमानं भासुरं रवेः ॥ २९

वपुर्विभ्राजते गौरं, चलच्चामरचारु ते ।
प्रोद्गच्छज्झरधारेव, तटी काञ्चनभूभृतः ॥ ३०

मुक्ताजालततश्रीकं, तापघ्नं शशिसुन्दरम् ।
छत्रत्रयं ध्वनयति, त्रैलोक्येश्वरतां तव ॥ ३१

स्मेराभिनवहेमाब्ज-कान्त्यच्छनखरोचिषोः ।
न्यासे त्वत्पदयोर्देवा, न्यस्यन्ति नलिनीवनम् ॥ ३२

इत्थं यथोपकारात्मा, त्वं श्रीमान् न तथाऽपरः ।
तरणेर्यादृशं भाग्यं, ग्रहाणां नैव तादृशम् ॥ ३३

दानसौरभमत्तालि-झङ्कारवकोपितम् ।
आयान्तमपि वीक्ष्येभं, त्वदीयो न हि शङ्कते ॥ ३४

करजैर्भिन्नमातङ्ग-कुम्भमुक्ता वहन्नपि ।
नाक्रामति भवद्दासं, केशरी कीलितक्रमः ॥ ३५

क्षयोषर्बुधसङ्कासः प्रोत्स्फुलिङ्गो दवानलः ।
निजिघानिव विश्वस्य, भवन्नाम्ना प्रशाम्यति ॥ ३६

लोहिताक्षोऽसितः क्रोधी आपतन्नुत्फणोऽप्यहिः ।
नोपद्रवाय घटते, त्वद्ध्यानामृतचेतसाम् ॥ ३७

अनीकं बलिनां राज्ञां, हस्त्य-ऽश्व-रथदारुणम् ।
ब्रुध्नरश्मेरिव ध्वान्तं, याति त्वद्भजनाद् भिदम् ॥ ३८

कुन्तदारितनागासृग्-वर्षाव्याकुलसैनिके ।
जयन्त्यरिगणं युद्धे त्वत्सेवासुखिनो जनाः ॥ ३९

अब्धौ क्षुभितयादस्के, ज्वलदुल्बणवाडवे ।
रङ्गत्तरङ्गशृङ्गस्था, तरति त्वज्जुषां तरीः ॥ ४०

रोगाभारभुजः शोच्या-स्त्यजन्तोऽपि जिजीविषाम् ।
भवत्प्रभावाज्जायन्ते, नराः कन्दर्परूपिणः ॥ ४१

आपादकण्ठमानद्धाः शृङ्खलानिगडादिभिः ।
त्वन्मन्त्रं सुजपन्तः स्यु-र्भव्यास्त्रुटितबन्धनाः ॥ ४२

करि-सिंहाऽ-ग्नि-सर्पाऽऽजि-वारिधि-व्याधि-बन्धजम् ।
न भयं तस्य यस्तेऽमु-मधीते स्तवमुच्चकैः ॥ ४३

सद्वर्णकुसुमां स्तोत्र-स्रजं ते गुणगुम्फिताम् ।
कण्ठपीठे निधत्ते य-स्त्रिरत्नश्रीरुपैति तम् ॥ ४४

इति 'भक्तामर'च्छाया-मादाय हृदयप्रियाम् ।
नाभिराजाङ्गजः स्वीय-धर्माय मयका स्तुतः ॥ ४५

पू.आ. श्री सिद्धसेनदिवाकरविरचितम्

## ४५. ॥ श्रीकल्याणमन्दिरस्तोत्रम् ॥

(वसन्ततिलका)

कल्याण-मन्दिर-मुदार-मवद्य-भेदि,
भीता-भय-प्रद-मनिन्दित-मङ्घ्रि-पद्मम्;
संसार-सागर-निमज्ज-दशेष-जन्तु-
पोतायमान-मभिनम्य जिनेश्वरस्य ॥ १

यस्य स्वयं सुर-गुरु-र्गरिमाम्बु-राशेः;
स्तोत्रं सुविस्तृत-मतिर्न विभुर्विधातुम् ।
तीर्थेश्वरस्य कमठ-स्मय-धूम-केतो-
स्तस्याहमेष किल संस्तवनं-करिष्ये ॥ २

सामान्यतोऽपि तव वर्णयितुं-स्वरूप-
मस्मादृशाः कथमधीश ! भवन्त्यधीशाः ?
धृष्टोऽपि कौशिकशिशुर्यदिवा दिवान्धो,
रूपं प्ररूपयति किं किल घर्मरश्मेः ? ॥ ३

मोह-क्षया-दनुभवन्नपि नाथ ! मर्त्यो,
नूनं गुणान् गणयितुं न तव क्षमेत ।
कल्पान्त-वान्त-पयसः प्रकटोऽपि यस्मान्,
मीयेत केन जलधे-र्ननु रत्नराशिः ? ॥ ४

अभ्युद्यतोऽस्मि तव नाथ ! जडाशयोऽपि,
कर्तुं स्तवं लसदसङ्ख्य-गुणाकरस्य
बालोऽपि किं न निज-बाहु-युगं वितत्य,
विस्तीर्णतां कथयति स्वधियाम्बुराशेः ? ॥ ५

ये योगनामपि न यान्ति गुणास्तवेश !,
वक्तुं कथं भवति तेषु ममावकाशः ? ।
जाता तदेव-मसमीक्षित-कारितेयं,
जल्पन्ति वा निज-गिरा ननु पक्षिणोऽपि ॥ ६

आस्ता-मचिन्त्य-महिमाजिन ! संस्तवस्ते,
नामाऽपि पाति भवतो भवतो जगन्ति ।
तीव्रा-तपो-पहत-पान्थजनान् निदाघे,
प्रीणाति पद्म-सरसः सरसोऽनिलोऽपि ॥ ७

हृद्वर्त्तिनि त्वयि विभो ! शिथिलीभवन्ति,
जन्तोः क्षणेन निबिडा अपि कर्मबन्धाः ।
सद्यो भुजङ्गम-मया इव मध्यभाग-
मभ्यागते वन-शिखण्डिनि चन्दनस्य ॥ ८

मुच्यन्त एव मनुजाः सहसा जिनेन्द्र !
रौद्रै-रुपद्रव-शतैस्त्वयि वीक्षितेऽपि ।
गोस्वामिनि स्फुरित-तेजसि दृष्टमात्रे,
चौरै-रिवाशु पशवः प्रपलायमानैः ॥ ९

त्वं तारको जिन ! कथं ? भविनां त एव,
त्वामुद्वहन्ति हृदयेन यदुत्तरन्तः ।
यद्वा दृतिस्तरति यज्जल-मेष नून-
मन्तर्गतस्य मरुतः स किलानुभावः ॥ १०

यस्मिन् हर-प्रभृतयोऽपि हत-प्रभावाः,
सोऽपि त्वया रतिपतिः क्षपितः क्षणेन ।
विध्यापिता हुत-भुजः पयसाऽथ येन,
पीतं न किं तदऽपि दुर्धर-वाडवेन ? ॥ ११

स्वामिन्ननल्प-गरिमाण-मपि प्रपन्ना-
स्त्वां जन्तवः कथमहो हृदये दधानाः ।
जन्मोदधिं लघु तरन्त्यति-लाघवेन ?
चिन्त्यो न हन्त महतां यदि वा प्रभावः ॥ १२

क्रोधस्त्वया यदि विभो ! प्रथमं निरस्तो,
ध्वस्तास्तदा बत कथं किल कर्मचौराः ? ।
प्लोषत्यमुत्र यदि वा शिशिराऽपि लोके,
नीलद्रुमाणि विपिनानि न किं हिमानी ? ॥ १३

त्वां योगिनो जिन ! सदा परमात्मरूप-
मन्वेषयन्ति हृदयाम्बुज-कोश-देशे ।
पूतस्य निर्मलरुचे-र्यदि वा किमन्य-
दक्षस्य संभवि पदं ननु कर्णिकायाः ? ॥ १४

ध्यानाज्जिनेश ! भवतो भविनः क्षणेन,
देहं विहाय परमात्म-दशां व्रजन्ति ।
तीव्रानला-दुपल-भाव-मपास्य लोके,
चामी-करत्व-मचिरादिव धातुभेदाः ॥ १५

अन्तः सदैव जिन ! यस्य विभाव्यसे त्वं,
भव्यैः कथं तदपि नाशयसे शरीरम् ? ।
एतत्स्वरूपमथ मध्य-विवर्त्तिनो हि,
यद्विग्रहं प्रशमयन्ति महानुभावाः ॥ १६

आत्मा मनीषिभि-रयं त्वदभेद-बुद्ध्या
ध्यातो जिनेन्द्र ! भवतीह भवत्प्रभावः ।
पानीय-मप्य-मृत-मित्यनुचिन्त्यमानं,
किं नाम नो विष-विकार-मपाकरोति ? ॥ १७

त्वामेव वीत-तमसं पर-वादिनोऽपि,
नूनं विभो ! हरि-हरादि-धिया प्रपन्नाः ।
किं काच-कामलिभिरीश ! सितोऽपि शङ्खो,
नो गृह्यते विविध-वर्ण-विपर्ययेण ? ॥ १८

धर्मोपदेश-समये स-विधानुभावा-
-दास्तां जनो भवति ते तरु-रप्यशोकः ।
अभ्युद्गते दिनपतौ समहीरुहोऽपि,
किं वा विबोध-मुपयाति न जीवलोकः ? ॥ १९

चित्रं विभो ! कथ-मवाङ्मुख-वृन्तमेव,
विष्वक् पतत्य-विरला सुर-पुष्प-वृष्टिः ।
त्वद्गोचरे सुमनसां यदि वा मुनीश !,
गच्छन्ति नूनमध एव हि बन्धनानि ॥ २०

स्थाने गभीर-हृदयो-दधि-संभवायाः,
पीयूषतां तव गिरः समुदीरयन्ति ।
पीत्वा यतः परम-सम्मद-सङ्गभाजो,
भव्या व्रजन्ति तरसाप्य-जरामरत्वम् ॥ २१

स्वामिन् ! सुदूर-मवनम्य समुत्पतन्तो,
मन्ये वदन्ति शुचयः सुर-चामरौघाः ।
येऽस्मै नतिं विदधते मुनिपुङ्गवाय,
ते नूनमूर्ध्वगतयः खलु शुद्ध-भावाः ॥ २२

श्यामं गभीर-गिर-मुज्ज्वल-हेमरत्न-
सिंहासन-स्थमिह भव्य-शिखण्डिनस्त्वाम् ।
आलोकयन्ति रभसेन नदन्त-मुच्चै-
श्चामीकराद्रि-शिरसीव नवाम्बुवाहम् ॥ २३

उद्गच्छता तव शितिद्युति-मण्डलेन,
लुप्त-च्छद-च्छवि-रशोकतरु-र्बभूव ।
सान्निध्यतोऽपि यदि वा तव वीतराग !,
नीरागतां व्रजति को न सचेतनोऽपि ? ॥ २४

भो भोः प्रमाद-मवधूय भजध्व-मेन-
मागत्य निर्वृति-पुरीं प्रति सार्थवाहम् ।
एतन्निवेदयति देव ! जगत्त्रयाय,
मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते ॥ २५

उद्द्योतितेषु भवता भुवनेषु नाथ !,
तारान्वितो विधुरयं विहताधिकारः ।
मुक्ता-कलाप-कलितोच्छ्वसितातपत्र-
व्याजात्त्रिधा धृततनु-र्ध्रुव-मभ्युपेतः ॥ २६

स्वेन प्रपूरित-जगत्त्रय-पिण्डितेन,
कान्ति-प्रताप-यशसामिव सञ्चयेन ।
माणिक्य-हेम-रजत-प्रविनिर्मितेन,
साल-त्रयेण भगवन्नभितो विभासि ॥ २७

दिव्यस्रजो जिन ! नमस्त्रिदशाधिपाना-
मुत्सृज्य रत्नरचितानपि मौलिबन्धान् ।
पादौ श्रयन्ति भवतो यदि वा परत्र,
त्वत्सङ्गमे सुमनसो न रमन्त एव ॥ २८

त्वं नाथ ! जन्म-जलधे-विपराङ्मुखोऽपि,
यत्तारयस्य-सुमतो निज-पृष्ठ-लग्नान् ।
युक्तं हि पार्थिव-निपस्य सतस्तवैव,
चित्रं विभो ! यदसि कर्म-विपाक-शून्यः ॥ २९

विश्वेश्वरोऽपि जन-पालक ! दुर्गतस्त्वं,
किं वाऽक्षर-प्रकृति-रप्य-लिपिस्त्वमीश ! ।
अज्ञानवत्यपि सदैव कथञ्चिदेव;
ज्ञानं त्वयि स्फुरति विश्व-विकास-हेतुः ॥ ३०

प्राग्भार-संभृत-नभांसि रजांसि रोषा-
दुत्थापितानि कमठेन शठेन यानि ।
छायापि तैस्तव न नाथ ! हता हताशो,
ग्रस्तस्त्वमीभि-रयमेव परं दुरात्मा ॥ ३१

यद् गर्जदूर्जित-घनौघ-मदभ्र-भीमं,
भ्रश्यत्तडिन्मुसल-मांसल-घोर-धारम् ।
दैत्येन मुक्तमथ दुस्तर-वारि दध्रे,
तेनैव तस्य जिन ! दुस्तर-वारि-कृत्यम् ॥ ३२

ध्वस्तोर्ध्व-केश-विकृता-कृति-मर्त्त्य-मुण्ड-
प्रालम्बभृद् भयद-वक्त्र-विनिर्यदग्निः ।

प्रेतव्रजः प्रति भवन्त-मपीरितो यः,
सोऽस्याऽभवत्प्रतिभवं भव-दुःख-हेतुः ॥ ३३

धन्यास्त एव भुवनाधिप ! ये त्रिसन्ध्य-
माराधयन्ति विधिवद् विधुताऽन्यकृत्याः ।
भक्त्योल्लसत्पुलक-पक्ष्मल-देहदेशाः,
पाद-द्वयं तव विभो ! भुवि जन्मभाजः ॥ ३४

अस्मिन्न-पार-भव-वारि-निधौ मुनीश !
मन्ये न मे श्रवण-गोचरतां गतोऽसि ।
आकर्णिते तु तव गोत्र-पवित्र-मन्त्रे,
किं वा विपद्विष-धरी सविधं समेति ? ॥ ३५

जन्मान्तरेऽपि तव पाद-युगं न देव !,
मन्ये मया महित-मीहित-दानदक्षम् ।
तेनेह जन्मनि मुनीश ! परा-भवानां,
जातो निकेतन-महं मथिता-शयानाम् ॥ ३६

नूनं न मोह-तिमिरा-वृत-लोचनेन,
पूर्वं विभो ! सकृदपि प्रविलोकितोऽसि ।
मर्माविधो विधुरयन्ति हि मामनर्थाः,
प्रोद्यत्प्रबन्ध-गतयः कथ-मन्यथैते ? ॥ ३७

आकर्णितोऽपि महितोऽपि निरीक्षितोऽपि,
नूनं न चेतसि मया विधृतोऽसि भक्त्या ।
जातोऽस्मि तेन जनबान्धव ! दुःखपात्रं,
यस्मात् क्रियाः प्रतिफलन्ति न भावशून्याः ॥ ३८

त्वं नाथ ! दुःखिजन-वत्सल ! हे शरण्य !
कारुण्य-पुण्य-वसते ! वशिनां वरेण्य ! ।
भक्त्या नते मयि महेश ! दयां विधाय,
दुःखाङ्कुरोद्दलन-तत्परतां विधेहि ॥ ३९

निःसंख्य-सार-शरणं शरणं शरण्य-
मासाद्य सादित-रिपु-प्रथिता-ऽवदातम् ।
त्वत्पाद-पङ्कजमपि प्रणिधान-वन्ध्यो,
वध्योऽस्मि चेद् भुवन-पावन ! हा हतोऽस्मि ॥ ४०

देवेन्द्र-वन्द्य ! विदिता-ऽखिल-वस्तु-सार !,
संसार-तारक ! विभो ! भुवनाधिनाथ ! ।
त्रायस्व देव ! करुणा-हृद ! मां पुनीहि,
सीदन्त-मद्य भयद-व्यसनाम्बुराशेः ॥ ४१

यद्यस्ति नाथ ! भवदङ्घ्रि-सरोरुहाणां,
भक्तेः फलं किमपि सन्तति-सञ्चितायाः ।
तन्मे त्वदेक-शरणस्य शरण्य ! भूयाः,
स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥ ४२

ईत्थं समाहित-धियो विधिवज्जिनेन्द्र !,
सान्द्रोल्लसत्पुलक-कञ्चुकिताङ्ग-भागाः ।
त्वद्बिम्ब-निर्मल-मुखाम्बुज-बद्धलक्ष्याः,
ये संस्तवं तव विभो ! रचयन्ति भव्याः ॥ ४३

जन-नयन-कुमुद-चन्द्र ! प्रभास्वराः स्वर्ग-सम्पदो भुक्त्वा ।
ते विगलित-मल-निचया, अचिरान्मोक्षं प्रपद्यन्ते ॥४४ युग्मम्

पू.आ. श्री भावप्रभसूरिविरचितम्
कल्याणमन्दिर चतुर्थ-चरणपादपूर्तिरूपम्

## ४६. ॥ श्रीजैनधर्मवरसंस्तवनम् ॥

(वसन्ततिलका)

कल्याणमन्दिरमिमं कुरु दानमुख्यं
धर्मं चतुर्विधमनश्वरसौख्यहेतुम् ।
सम्यक्त्वभूषिततमं भवभृद्भवाब्धौ
पोतायमानमभिनम्य जिनेश्वरस्य ॥ १

हिंसादिदोषरहितं सहितं शमाद्यै-
र्घातिक्षयान्निगदितं महितं महेन्द्रैः ।
स्वर्गापवर्गफलितं कलितं विवेकै-
स्तस्याहमेष किल संस्तवनं करिष्ये ॥ (यु.) २

दानं द्विधाऽभयसुपात्रगतं सुपोष्यं
मुक्त्यै कृपादिपदतस्त्रिविधं तु भुक्त्यै ।
जैनोऽत्र वेत्ति न परो न हि नव्यनेत्रो
रूपं प्ररूपयति किं किल घर्मरश्मेः ॥ ३

पारापतं धृतमते ! बत शान्तिनाथः
श्येनाद्ररक्ष गतजन्मनि ते तदीयाः ।
गण्या गुणा गुरुकृपोज्ज्वलिताः कथं स्यु-
र्मीयेत केन जलधेर्ननु रत्नराशिः ? ॥ ४

संरक्षितो गजभवे शशको हि येन
मेघाभिधेन मगधाधिपदेहजेन ।
माहात्म्यमानमिह तस्य करोतु को वा
विस्तीर्णतां कथयति स्वधियाम्बुराशेः ? ॥ ५

मांसं समर्घमधुनेति वचो निशम्य
तस्याप्त्युपायमभयेन विधाय चोक्ताः ।
कुर्वन्ति तां न हि ययाऽहह राजलोका
जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ॥ ६

सद्दृष्टिपूर्वककृतांहतियुग्ममस्तु
हे भव्य ! भव्यतरमन्यदपि प्रधानम् ।
जन्तून् करोति सुखिनस्तपतापतप्तान्
प्रीणाति पद्मसरसः सरसोऽनिलोऽपि ॥ ७

वीराय विश्वगुरवेऽकृत चन्दनायाः
कुल्माषदानमनुजातसुखाऽथ तस्याः ।
मूर्द्धाऽऽप वेणिरुचिरः श्रियमस्य मौलि-
मभ्यागते वनशिखण्डिनि चन्दनस्य ॥ ८

दारिद्र(द्र्य)दोषतिमिरैर्नियमेन मुक्ताः
सत्पात्रदानसुदिनोदयसङ्गमाद्याः ।
पृष्ठानुगामिकटके निकटे सटङ्के
चोरैरिवाशु पशवः प्रपलायमानैः ॥ ९

दानं ददौ सुमुनये क्षुधितोऽपि योऽतो
निःस्वोऽपि भूपतिरभूदिह मूलदेवः ।
यत् कीचकः श्रयति सार्थकतां नितान्त-
मन्तर्गतस्य मरुतः स किलानुभावः ॥ १०

जैनेन यन्नरकहेतुरपात्रमुक्तं
मुक्तं मुधा तदपरेण कथं श्रितं ही ।
मद्यादि यत्परिहृतं सुधियाथ यज्ञे
पीतं न किं तदपि दुर्धरवाडवेन ? ॥ ११

तीर्थङ्कराः सकलदोषविमुक्तदेहाः
स्नेहान्मिथो गलितसिंहगजादिवैराः ।
सत्पूजिता विदधतीह हितं न किं किं
चिन्त्यो न हन्त ! महतां यदि वा प्रभावः ॥ १२

अर्हन्त एव जगदीश्वरतां श्रयन्तः
सर्वातिशायिसुखदा नितरां निषेव्याः ।
हित्वाऽत्र तान् भजति मुक्तिकृते मुधाऽधी-
र्नीलद्रुमाणि विपिनानि न किं हिमानी ? ॥ १३

हे भव्य ! हेयमहितं कथितं कुदेव-
सम्पूजनं सुमतिनात्र गरोपमानम् ।
दुःखाप्तिहेतुरतुलं किमु तत्सुखाय
दक्षस्य सम्भवि पदं ननु कर्णिकायाः ? ॥ १४

श्रीश्रेणिकादिनृपवद् बहवो भवेयु-
र्जीवा जिना जिनपभक्तिभरेण भव्याः ।
सच्चूर्णपूर्णविभवेन भृता भजन्ते
चामीकरत्वमचिरादिव धातुभेदाः ॥ १५

शय्यम्भवः शमधनोक्तिविचारदक्षः
खड्गेन याज्ञिकजने हनने हठोत्थः ।
तत्त्वस्य रूपकथने द्रुतजातशान्ति-
र्यद्विग्रहं प्रशमयन्ति महानुभावाः ॥ १६

अर्चां समीक्ष्य सुतरामभयेन मुक्तां
मिथ्यात्वमाशु यदनार्य्यजनोऽप्यमुञ्चत् ।
आर्यस्तदादरभरः कुलजस्ततो ना
किं नो मनोविषविकारमपाकरोति ? ॥ १७

सावद्यजोऽपि निरवद्यफलानुबन्धा-
दर्चाविधिः सुमभरेण वरः पुरोगः ।
साध्योऽपि शब्दनिपुणैः किमु सिंहशब्दो
नो गृह्यते विविधवर्णविपर्ययेण ॥ १८

नित्यं प्रसन्नवदनां महितां सुजैर्नी
द्रव्यैः शुभै रुचिल ! कल्पलतोपमानाम् ।
यः सेवते न मलिनो ह्यधनो भवेत्स
किं वा विबोधमुपयाति न जीवलोकः ? ॥ १९

जैनालया निजयशोनिचया इवैते
यैः सम्प्रतिप्रतिमराजगणैः सिताभाः ।
उच्चैः कृताः शुचिरुचेऽद्भुतमत्र तैश्च
गच्छन्ति नूनमध एव हि बन्धनानि ॥ २०

हे ! आस्तिकास्त्यजत नास्तिकतां नितान्तं
चित्तोन्नतिं भजत लुम्पकतां लुनीत ।
चैत्यं विधत्त शृणुत प्रविलोक्य तत्सद्
भव्या व्रजन्ति तरसाप्यजरामरत्वम् ॥ २१

श्राद्धैरकारिषत भागवता विहारा
यैर्दिग्गजैर्द्रविणदानघनैरुदाराः ।
ये चात्र रक्षणपराः पतितं सृजन्ति
ते नूनमूर्द्ध्वगतयः खलु शुद्धभावाः ॥ २२

चैत्यं सुवर्णभरितं भरतेन नव्यं
निर्म्मापितं कलितकेकिकलापशृङ्गम् ।
यद्वीक्ष्य मङ्क्षु दधति स्म मुदं हि मर्त्त्या-
श्चामीकराद्रिशिरसीव नवाम्बुवाहम् ॥ २३

शत्रुञ्जयः शमधनाः शमता च शान्तिः
शत्रुञ्जयाह्वयतपः सकलं दुरापम् ।
एतत् शपञ्चकजुषोऽस्ति नरस्य या भा
नीरागतां व्रजति को न सचेतनोऽपि ? ॥ २४

हस्तं हि हेतिविकलं विकलङ्कमङ्कं
मुद्राप्यमुद्रसुषमा वनितोज्झिताऽङ्कः ।
तं देवमेव वदतीति हिताय नाके
मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते ॥ २५

व्याख्यानसद्मनि वृषो गदितो जिनेन
क्षेत्रे निजेन निहिते निहितोऽभिषिक्तः ।
अन्यत्र मोहचरटो विधि-विष्णु-रुद्र-
व्याजात्त्रिधा धृततनुर्ध्रुवमभ्युपेतः ॥ २६

क्षेत्राणि कानि तव धर्मनृपस्य सप्त
चैत्यादिकानि भरतः पुनराह तातम् ।
सत्यं च तैः परिचितैर्हि पुराऽधुना त्वं
शालत्रयेण भगवन्नभितो विभासि ॥ २७

जैनो यती जिनजनो जिनसद्म जैनं
ज्ञानं जिनो जगति पञ्च शुभा जकाराः ।
नाभेयभूर्भणति तेष्वनघे सना किं
त्वत्सङ्गमे सुमनसो न रमन्त एव ? ॥ २८

तत्त्वानि तीर्थकर-तीर्थ-तपोधनाश्च
तथ्यं च तात्त्विकतपः खलु षट्तकारी ।
तस्यां रतो भवति मङ्क्षु नरो हि हित्वा
चित्रं विभो ! यदसि कर्मविपाकशून्यः ॥ २९

सद्बृंहितं प्रवरपुस्तकमस्तपापं
पुण्योपकारि परमं परमैः प्रपूज्यम् ।
सम्भालनादिकरणाच्छिवदं त्वयोक्तं
ज्ञानं त्वयि स्फुरति विश्वविकाशहेतुः ॥ ३०

दानं दया दमन–दर्शन–देवसेवा
दोषापहार इह षट् प्रवरा दकाराः ।
तैः सेवितैर्दुरितराक्षस आत्तलोको
ग्रस्तस्त्वमीभिरयमेव परं दुरात्मा ॥ ३१

सैनेय–साधुवर–सङ्घक–सार्वसद्म–
सैद्धान्तिका इति सुपञ्चसकारवर्गः ।
येनादृतो भवकृपीटनिधौ निरस्तं
तेनैव तस्य जिन ! दुस्तरवारि कृत्यम् ॥ ३२

अर्हन्त अर्च्य अशरीर अहिंसकश्च
अर्च्चा अकारनिकरोऽकृतसन्धिकर्मा ।
मर्त्योऽश्रयद्यमनिशं परवत् किमेष
सोऽस्याऽभवत्प्रतिभवं भवदुःखहेतुः ? ॥ ३३

सङ्घाधिपत्यतिलकं ननु ये वहन्तः
साधर्मिके सततदत्तवराशना ये ।
मुक्तिं व्रजन्ति लघु ते नितरां भजन्तः
पादद्वयं तव विभो ! भुवि जन्मभाजः ॥ ३४

शीलं कलङ्कतिमिरावलिहेलिकेलि
विस्तीर्णविश्ववलये कृतकीर्त्तिखेलम् ।
मर्त्यो दधाति हृदि यः प्रवरस्य तस्य
किंवा विपद्विषधरी सविधं समेति ? ॥ ३५

ब्राह्म्यादिका विमलशीलविभूषणाढ्याः
सत्या हि सन्ति बहवो भवितार एव ।
तासां तु नामजपनेन जिनेश ! पूतो
जातो निकेतनमहं मथिताशयानाम् ॥ ३६

सीताहृतिर्ज्जलधिलङ्घनमाहवश्च
रक्षोवधः प्रतिहृतिर्ज्वलनप्रवेशः ।
पुण्या यतो विमलशीलतया पदार्थाः
प्रोद्यत्प्रबन्धगतयः कथमन्यथैते ? ॥ ३७

आबालगाङ्गसलिलामलशीललीले !
हे भग्नि ! सुन्दरि ! पुरा चरणे निषिद्धा ।
प्रोद्यत्तपाः प्रकुरु तच्छुचिचित्तवृत्त्या
यस्मात् क्रियाः प्रतिफलन्ति न भावशून्याः ॥ ३८

ब्राह्मी सुसुन्दरिकया सह तं वनस्थं
वल्ल्यावृताङ्गवरबाहुबलिं बभाषे ।
गर्ज्जाश्रयं जहिहि कर्मलयं लभस्व
दुःस्वाङ्कुरोद्दलनतत्परतां विधेहि ॥ ३९

यत्साधवे वितरणं न कृतं च शीलं
व्याघ्रादिभीतिभिदुरं न तपोऽपि तप्तम् ।
यत्क्रूरकर्मभिदतो जिन ! तैर्विभावै-
र्वध्योऽस्मि चेद्भुवनपावन ! हा ! हतोऽस्मि ॥ ४०

रम्येऽत्र दर्प्पणगृहे वृषभाङ्गजन्मा
स्वीयोर्म्मिकापतनतः परपुद्गलेन ।
शोभां विभाव्य वदतीत्यव देव ! रागात्
सीदन्तमद्य भयदव्यसनाम्बुराशेः ॥ ४१

शुद्धात्मदर्शसदनं भरतस्य जज्ञे
शुद्धात्मदर्शनमहो ! शुभभावयोगात् ।
इत्युक्तिलेशकथकस्य ममैधि नाथ !
स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥ ४२

त्रैलोक्यरूपविषये सुपरीक्षणेऽत्र
बिम्बं त्वदीयमतुलं नयनामृताभम् ।
कर्मापहारि हृदयाम्बुरुहे निधाय
ये संस्तवं तव विभो ! रचयन्ति भव्याः ॥ ४३

राकागणेश्वरनिभास्तेजःपुञ्जैरतीव पुण्याढ्याः ।
तेऽनन्तसुखसमेता अचिरान्मोक्षं प्रपद्यन्ते ॥ (यु.) ४४

भावप्रभाख्यवरसूरिगणाधिपेन
श्रीजैनधर्मवरसंस्तवनं सुरम्यम् ।
शिष्यस्य कौतुककृते रचितं सुबोधं
कल्याणमन्दिरसदन्तिमपादलग्नम् ॥ ४५

पू.मु.श्री कनकविलाशविजयविरचितम्
समस्याबद्धनिबद्धम्

## ४७. ॥ श्रीकल्याणमन्दिराख्यं स्तोत्रम् ॥

(वसन्ततिलका)

कल्याणभाजनमघस्य विनाशहेतुं
त्रस्तस्य भीतिशमकं जिनपादयुग्मम् ।
निम्ने भवाब्धिसलिले पततां जनानां
पोतायमानमभिनम्य जिनेश्वरस्य ॥ १

शक्तो न वाक्पतिरपि प्रथितुं गुणानां
यस्यात्मना मुदितनाकिगणेष्वजस्रम् ।
कर्तुः सुखस्य जनताखिलपङ्कहर्तु-
स्तस्याहमेष किल संस्तवनं करिष्ये ॥ २

सामान्यतोऽपि जिनराज ! तव स्वरूपं
मादृक्कथं कथयितुं भवतीह शक्तः ? ।
सम्यग् यथा करटदस्युशिशुर्दिनान्धो
रूपं प्ररुपयति किं किल घर्मरश्मेः ? ॥ ३

अज्ञाननाशनवसादपि देव ! भूस्पृक्
संख्यां गुणस्य न च ते विदधातुमीशः ।
कल्पाद्यथोज्जितजलस्य तथा प्रसिद्धो
मीयेत केन जलधेर्ननु रत्नराशिः ? ४

उत्कण्ठितोऽस्मि तव देव ! नुतिं विधातुं
मन्दोऽप्यहं प्रवरकान्तगुणालयस्य ।
विस्तार्य बाहुयुगलं पृथुकोऽपि किं नो
विस्तीर्णतां कथयति स्वधियाम्बुराशेः ? ॥ ५

सज्ज्ञानिनामपि गुणा भुवि ये न गम्या-
स्तादृग्गुणेषु कथितुं मम काऽत्र शक्तिः ? ।
प्रारम्भ एष न विमृश्य मया कृतो भो !
जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ॥ ६

दूरे स्तुतिर्भवतु देव ! तवाऽभिधा वै
सन्त्रायते भवभयादपि जीवचक्रम् ।
शुक्रार्कदीधितिकदम्बकतप्तमर्त्यान्
प्रीणाति पद्मसरसः सरसोऽनिलोऽपि ॥ ७

स्वान्ते स्थिते भवति नश्यति कर्मजालं
सम्पादितं भवभवेषु च जन्तुनैव ।
तूर्णं भुजङ्गमघटेव सुमध्यदेश-
मभ्यागते वनशिखण्डिनि चन्दनस्य ॥ ८

त्यज्यन्त एव सहसा पुरुषा यतीन्द्र !
घोरैररिष्टनिचयैस्तव दर्शनेऽपि ।
मार्तण्डमण्डलविकाश(शि?)वरप्रभाते
चोरैरिवाशु पशवः प्रपलायमानैः ॥ ९

निस्तारकः कथमधीश ! जने जनानां
त्वां धारयन्ति हृदि यद् भवतस्तरन्तः ।
मुक्ता दृतिर्ब्रुडति नाऽम्भसि यर्हि नित्य-
मन्तर्गतस्य मरुतः स किलानुभावः ॥ १०

सर्वादयोऽमरगणा हतशक्तिसारा-
जाता यतोऽपि मदनो निधनीकृतः स ।
निर्वापितो हुतवहः सलिलेन येन
पीतं न किं तदपि दुर्धरवाडवेन ? ॥ ११

अप्राकृतं प्रचुररम्यगुणैर्गरिष्ठं
त्वां संश्रिता जिनवरेन्द्र ! कथं मनुष्याः ? ।
जन्मोदधिं विकटमत्र तरन्ति तूर्णं
चिन्त्यो न हन्त महतां यदि वा प्रभावः ॥ १२

त्यक्तो मुदा प्रथमतो भवता हि मन्यु-
*र्निर्नाशिताः किल कथं जिन ! कर्मभिल्लाः ? ।*
मथ्नाति वाऽत्र भुवने प्रबला त्वनुष्णा
नीलद्रुमाणि विपिनानि न किं हिमानी ? ॥ १३

योगीश्वरा जिन ! सनाऽप्यवलोकयन्ति
त्वां ब्रह्मरूपमतुलं हृदयाम्बुजेऽत्र ।
मेध्यस्य चोज्ज्वलरुचेरपरं हि किं य -
दक्षस्य सम्भवि पदं ननु कर्णिकायाः ? ॥ १४

स्वामिन् ! त्वदीय भजनाद् भविका लभन्ते
सद्योपहाय करणं वरमुक्तिमार्गम् ।
त्यक्त्वा विरोचनवशाद् दृषदः स्वभावं
चामीकरत्वमचिरादिव धातुभेदाः ॥ १५

मध्ये सनैव भविकाः परिचिन्तयन्ति
त्वां यस्य तस्य विलयं प्रकरोषि कस्मात् ? ।
स्वामिंस्तथोचितमिदं गतपक्षपाता
यद्विग्रहं प्रशमयन्ति महानुभावाः ॥ १६

विद्वद्भिरेष पुरुषः परिचिन्तितो वै
विश्वप्रभो ! तव धिया हि समप्रभावः ।
पाथोऽङ्गिनाऽमृतधिया परिपीयमानं
कि नाम नो विषविकारमपाकरोति ? ॥ १७

अज्ञाननाशनिपुणं हि कुतीर्थिनोऽपि
त्वामाश्रिता जलशयादि विदा जिनेन्द्र ! ।
दृग्दोषवद्भिरपि किं जिन ! पाण्डुकम्बु-
र्नो गृह्यते विविधवर्णविपर्ययेण ? ॥ १८

त्वद्देशनास्ववसरो जिन ! सन्निकर्षा-
दास्तां पुमान् वसुमपि प्रकरोत्यशोकम् ।
प्रत्युद्गते खतिलके सकरालिकोऽपि
किं वा विबोधमुपयाति न जीवलोकः ? ॥ १९

साध्यैः प्रभो ! सुमनसां विहिता सुवृष्टिः
चोद्यं पुरो भवति वृन्तमधः कथं ते ? ।
नित्यं त्वयीश ! शुभभक्तिमतां नृणां वा
गच्छन्ति नूनमध एव हि बन्धनानि ॥ २०

अस्ताघगूढपथसिन्धुसमुद्भवायाः
पीयूषतां प्रकथयन्ति गिरस्तव ज्ञाः ।
अस्या हि पानवशतः प्रमदाश्रिता यद्-
भव्या व्रजन्ति तरसाऽप्यजरामरत्वम् ॥ २१

गीर्वाणचामरचया जिन ! खात् पतन्तो
दूरात् प्रणम्य कथयन्ति जनान् तु जाने ।
कुर्वन्ति ये वरनतिं जिनकुञ्जराय
ते नूनमूर्ध्वगतयः खलु शुद्धभावाः ॥ २२

अस्ताग(घ)भाषितवरं शितरत्नवर्णं
सिंहासने स्थितमहो ! भुवनेश्वर ! त्वाम् ।
प्रीत्या हि भव्यशिखिनः सरवं पिबन्ति
चामीकराद्रिशिरसीव नवाम्बुवाहम् ॥ २३

स्वीयाङ्गसम्भवशितद्युतिमण्डलेन
प्रोद्गच्छताऽदलरुचिर्ह्यभ[वन्] न्वशोकः ।
अभ्यर्णतोऽथ यदि वा तव नाथ ! नूनं
नीरागतां व्रजति को न सचेतनोऽपि ? ॥ २४

सेवस्व भो ! जिनवरं परिमुच्य तन्द्रा-
मेत्याऽऽशु वै शिवपुरीसुखदं सदैव ।
वक्ति न्विदं स्फुटतरं भुवने जनाय
मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते ॥ २५

विश्वेषु पूज्य ! भवता सुविकाशितेषु
नक्षत्रयुक्कुमुदिनीपतिरस्तकान्तिः ।
मुक्ताकदम्बकसमुल्लसितोध्र्वछत्र-
व्याजात्त्रिधा धृततनुर्ध्रुवमभ्युपेतः ॥ २६

आत्मीयकेन सततं भृतविष्टपेन
राढाप्रतापयशसामिव मण्डलेन ।
रत्नार्जुन-द्विजपतिप्रविनिर्मितेन
शालत्रयेण भगवन्नभितो विभासि ॥ २७

माला जिनेन्द्र ! विनमद्विबुधेश्वराणां
त्यक्त्वा सुरत्नखचितान् प्रतरांश्च मौलीन् ।
अंह्रिद्वयं तव भजन्त्यथवा परस्मिन्
त्वत्सङ्गमे सुमनसो न रमन्त एव ॥ २८

जन्मोदधेरपि जिनेन्द्र ! पराङ्गमुखोऽपि
भव्यांस्तटं नयसि यत् खलु पृष्ठसिक्तान् ।
युक्तं रसापघटकस्य स तस्य एत-
च्चित्रं विभो ! यदसि कर्मविपाकशून्यः ॥ २९

लोकेश्वरोऽपि जनतारक ! चासि निःस्वः
किं वा प्रभो ! सकरणोऽकरणोऽपि यत्त्वम् ।
स्वामिन् ! विवर्णविदितेऽपि सनैव मङ्क्षु
ज्ञानं त्वयि स्फुरति विश्वविकाशहेतुः ॥ ३०

सामस्त्यपूरितवियन्ति रजांसि यानि
प्रोदीरितानि कमठेन हठेन कोपात् ।
तैस्ते तनोरपि विभो ! प्रहता न कान्ति-
र्ग्रस्तस्त्वमीभिरयमेव परं दुरात्मा ॥ ३१

पर्य(र्ज)न्यसम्भवविदुस्तरवारि वैरान्
मुक्तं शठेन कमठेन तडित्प्रयुक्तम् ।
बभ्रे च यन्मिलितरौद्रघनान्धकारं
तेनैव तस्य जिन ! दुस्तरवारिकृत्यम् ॥ ३२

विण्मौलिमालिविकृताङ्गविकीर्णकेश-
भीतिप्रदाऽऽननसमुद्भवदुग्रवह्निः ।
भूतोत्करः प्रतिजिनं समुदीरितो यः
सोस्याऽभवत् प्रतिभवं भवदुःखहेतुः ॥ ३३

मर्त्यास्त एव कृतिनो भुवनाधिपेन्द्र !
ये पूजयन्ति विधिना सततं त्रिसन्ध्यम् ।
भक्तिप्रफुल्लहृदया हसिताक्षिपद्माः
पादद्वयं तव विभो ! भुवि जन्मभाजः ॥ ३४

मन्ये जिनेश ! सकले भवसागरेऽस्मिन्
प्राप्तोऽथ कर्णविषयं भ्रमतो न मे त्वम् ।
शीघ्रं श्रुतेऽपि रुचिरे तव नाममन्त्रे
किं वा विपद्विषधरी सविधं समेति ? ॥ ३५

पूर्वे भवेऽपि तव पादयमं न नाथ !
या(जा)नेऽर्चितं जनमनोरथदानविज्ञम् ।
तस्माद् भवेऽत्र शतदुःखपरम्पराणां
जातो निकेतनमहं मथिताशयानाम् ॥ ३६

मोहान्धकारयुतदृष्टिपथेन नूनं
दृष्टो मया नहि विभो ! प्रथमं कदाचित् ।
मा माऽऽधयस्त्वतितरां खलु पीडयन्ति
प्रोद्यत्प्रबन्धगतयः कथमन्यथैते ? ॥ ३७

दृष्टः श्रुतोऽपि च मया ननु पूजितोऽपि
भक्त्या धृतो हृदि कदापि हि नैव मन्ये ।
दुःखास्पदं जनसुमित्र ! च तेन जातो
यस्मात् क्रिया प्रतिफलन्ति न भावशून्याः ॥ ३८

त्वं देव ! दुःखिजनपालक ! हे जिनेश !
सौभाग्यपुण्यविपणे ! सततं मयीश ! ।
सच्छ्रद्धया नततनौ करुणां प्रणीय
दुःखाङ्कुरोद्दलनतत्परतां विधेहि ॥ ३९

भूयिष्ठवीर्यसदनं गतपङ्कवृन्दं
सम्प्राप्य नासितविपक्ष चणावदातम् ।
त्वत्पादपद्ममपि वै प्रणिपात मोघो
वध्योऽस्मि चेद् भुवनपावन ! हा हतोऽस्मि ॥ ४०

गीर्वाणनायकसुपूजित ! विश्ववन्द्य !,
सद्द्रव्यपालक ! विभो ! विजितारिवर्ग ! ।
संरक्ष नाथ ! करुणाकर ! मां प्रसीद
सीदन्तमद्य भयदव्यसनाम्बुराशेः ॥ ४१

स्वामिन् ! त्वदंह्रिनलिनस्य फलं शुभं मे
भक्तेर्विभो ! यदि किलाऽस्ति गुणालयस्य ।
त्वत्किङ्करस्य विगतान्यविभोस्तु तत् स्याः
स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥ ४२

एवं विशिष्टसुधियो विधिना जिनेश !
हर्षोत्करेण हि विकाशितकायदेशाः ।
त्वद्वक्त्रनिर्मलकुशेशयबद्धवेध्या (:)
ये संस्तवं तव विभो ! रचयन्ति भव्याः ॥ ४३

नृनयनकैरवचन्द्र !, स्वर्ण(र्ग) विलाशे(से)न पूर्णशं लात्वा ।
ते मुक्तकल्कनिचया-अचिरान् मोक्षं प्रपद्यन्ते ॥ ४४

श्रीमत्पाठकमुख्यः कनककुमारा जयन्ति भूपीठे ।
तेषां विनयेनेदं, कनकविलाशेन संरचितम् ॥ ४५

कल्याणमन्दिरचरमचरणपूर्त्तिरूपम्

## ४८. ॥ श्रीपार्श्वजिनस्तवनम् ॥

(वसन्ततिलका)

कल्याणकेलिनिलयं विलयं वितन्वद्
विघ्नावलेर्भवति को न कृती कृतार्थः ।
श्री 'पार्श्वदेव' भवतोऽङ्घ्रियुगं भवाब्धौ
पोतायमानमभिनम्य जिनेश्वरस्य ॥ १

प्राञ्चत्प्रभावपटहः पटुहर्षहेतु-
र्दन्ध्वन्यते त्रिजगदङ्गणरङ्गजीवः ।
अद्यापि यस्य भुवनाद्भुतवैभवस्य
तस्याहमेष किल संस्तवनं करिष्ये ॥ २

नीचाः परेऽल्पमतयोऽनुभविष्णवोऽपि
साक्षाद् भवद्गुणगणान् कथमुद्गृणन्तु ? ।
आजन्मवाग्विभववन्ध्यमुखः कदापि
रूपं प्ररूपयति किं किल घर्मरश्मेः ॥ ३

त्वामन्तरेण विमलोज्ज्वलकेवलार्कं
कः प्रत्यलो हरिहरप्रभृतिः प्रमातुम ।
धर्मान् पदार्थनिवहस्य समानहो यत्
मीयेत केन जलधेर्ननु रत्नराशिः ? ॥ ४

वामेय ! गेयगरिमाढ्य ! भवत्प्रणीत-
विश्वप्रतीतवरवाङ्मयपारदृश्वा ।
यूकायवैरथ रथत्रसरेणुभिश्च
विस्तीर्णतां कथयति स्वधियाम्बुराशेः ॥ ५

ते कर्मभारगुरवः परवावदूका
ये तावकीनवचनान्यपि संशयानाः ।
प्रामाण्यतस्तदुपयन्ति यदाचरन्ति
जल्पन्ति वा निजगिरा ननु पक्षिणोऽपि ॥ ६

कल्याणकक्षणनिरीक्षणमस्तु ते तत्-
तत्किंवदन्त्यपि सतां मुदमादधाति ।
यत्पद्मिनीप्रणयिनं भ्रमरं भ्रमन्तं
प्रीणाति पद्मसरसः सरसोऽनिलोऽपि ॥ ७

सन्नह्य सह्यगुरु (गिरि) कुञ्जरवाजिराजि-
प्रेङ्खत्पदाजिरसभाजि भवत्युपेते ।
म्लेच्छैरभाजि भुजगैरिव तैरुपान्त-
मभ्यागते वनशिखण्डिनि चन्दनस्य ॥ ८

स्वामिंस्तव क्षम ! ममापि मनागुपेक्षा-
मर्हन्ति नो गुणगणाः स्वकसेवकस्य ।
कामं कषायविषयैः परिमुष्यमाणा-
श्चौरैरिवाशु पशवः प्रपलायमानैः ॥ ९

मामीदृशं जडमतिं दृढभक्तिरेव
स्वामिंस्तव स्तवविधौ त्वरयत्यवश्यम् ।

यत्तोयमुच्छलति तोयनिधेरगाध-
मन्तर्गतस्य मरुतः स किलानुभावः ॥ १०

लोकत्रयस्मयमयामयनाशवैद्य !
सद्यस्त्वयैव निहतः स हि मोहरोगः ।
आप्लाव्यतेऽपि जगदब्ध्युदकेन येन
पीतं न किं तदपि दुर्धरवाडवेन ? ॥ ११

नीचैर्विनम्य चतुरान् चरणारविन्दं
ये वन्दते विदधते तव कर्म नेतः ! ।
ते दूरतः कथमधोगमनं त्यजन्ति
चिन्त्यो न हन्त महतां यदि वा प्रभावः ॥ १२

युक्तं चिरेण परिलालितपालितानि
कर्माणि देव ! कषसीह समूलजालम् ।
नेतापि कृन्तति नितान्तमपायबुद्ध्या
नीलद्रुमाणि विपिनानि न किं हिमानी ? ॥ १३

देव ! त्वदङ्घ्रिकुसुमार्चनसंशयालोः
सिद्धान्तवारिधिविगाहनलीनबुद्धेः ।
सन्देहदावदहनोपशमे घनाभं
दक्षस्य सम्भवि पदं ननु कर्णिकायाः ॥ १४

पीत्वा गिरस्तव निरस्तरसान्तरास्ते
भव्याङ्गिनो दधति शान्तरसात्मकत्वम् ।
लोहाह्वयाः परिणता रसनायकेन
चामीकरत्वमचिरादिव धातुभेदाः ॥ १५

दुष्टे दशस्वपि भवेषु विसृष्टरोषे
तत्कालमेव कमठेऽतिशठेऽप्यवैरः ।
स्वैरं व्यधाश्च हृदयं सदयं नयोऽयं
यद् विग्रहं प्रशमयन्ति महानुभावाः ॥ १६

लोकत्रयीतनुगतं परमाणुदेशे
शुक्लस्मृतिप्रबलमन्त्रबलान्निरुध्य ।
पापाहिमर्मगरभेदकरं त्वदन्यः
किं नाम नो विषविकारमपाकरोति ? ॥ १७

त्वामेव केवलचिदास्पदमन्यतीर्थ्या-
स्ते स्वस्वतीर्थपतयो हृदयेषु दध्युः ।
आधेयवस्तुमिलितः स्फटिकोऽमलः किं
नो गृह्यते विविधवर्णविपर्ययेण ? ॥ १८

वप्रत्रयोदयगिरीन्द्रशिरोऽधिरोह-
त्युत्रासयत्यसुमतां सुतमां तमांसि ।
मित्रे त्वयि व्रजति लोचनगोचरत्वं
किं वा विबोधमुपयाति न जीवलोकः ? ॥ १९

नाराधयन्ति विधिना जिनशासनं ये
नाभ्यर्चयन्ति च रुचेः क्रमयामलं ते ।
ते दैवदूषितधियः सततं स्मरन्तो
गच्छन्ति नूनमध एव हि बन्धनानि ॥ २०

यस्मै सविस्मयमुपार्चि चिरं विरञ्चि-
रस्मायत स्मयमपास्य च चक्रपाणिः ।
श्रीवीतराग ! भवदागमवेदिनस्तद्
भव्या व्रजन्ति तरसाप्यजरामरत्वम् ॥ २१

त्वज्जन्मनोच्छ्रितवती चतुरङ्गुलानि
भूमिर्निवेदयति देव ! सतामितीव ।
येऽस्मै सहर्षहृदयाः स्पृहन्यति मर्त्या-
स्ते नूनमूर्ध्वगतयः खलु शुद्धभावाः ॥ २२

जन्माभिषेकसमयेऽशनिशोभयाढ्यं
धाराभिवर्षणसहं हरिवाहनं त्वाम् ।
के के विवेकिनिकरा ननृतुर्न दृष्ट्वा
चामीकराद्रिशिरसीव नवाम्बुवाहम् ॥ २३

प्रादुर्भवंस्तव समं सितदन्तकान्ति-
पूरोऽधरस्य विदधाति समग्ररागम् ।
वाचं पुनस्तव मुनीश ! निशम्य सम्यग्
नीरागतां व्रजति को न सचेतनोऽपि ? ॥ २४

गोदण्डकेष्विव बुधाः परदर्शनेषु
मा गुः परं शिवपुरं प्रति वः स्पृहा चेत् ।
एतं समाश्रयत सत्पथमित्थमाह
मन्ये नदन्नभिनभः सुरदुन्दुभिस्ते ॥ २५

स्मृत्वा हितान्यवहितं स हि नागराजः
सद्भक्तिसम्भ्रमविनिर्मितचित्रवर्णः ।
श्रीपार्श्वदेव ! कपिशीर्षफणत्रिवप्र-
व्याजात् त्रिधा धृततनुर्ध्रुवमभ्युपेतः ॥ २६

श्रामण्यकेवलरमासुकृतोपदेशान्
धातक्यशोकफलदेषु यकेष्वलब्धाः ।
ध्यानावधाननिरतेषु नरेषु तेन
सालत्रयेण भगवन्नभितो विभासि ॥ २७

स त्वं चिरं जय जिनेश्वर ! यस्य वाच-
श्चित्ते विचिन्त्य चतुराः कुसुमास्त्रमेव ।
सम्बोधयन्ति दुरितस्य विदुर्विमुक्ताः
त्वत्सङ्गमे सुमनसो न रमन्त एव ॥ २८

सच्चिन्तितार्थरचनावचनातिगाभः
सर्वैः सुपर्वनिवहैः परिषेव्यमाणः ।
त्वं पार्थिवप्रभवकामघटः प्रभासि
चित्रं विभो ! यदसि कर्मविपाकशून्यः ॥ २९

व्याघातवर्जितमनन्तमनन्तरायं
नानाविधावरणवर्गनिसर्गमुक्तम् ।
सद्दर्शनेन सहचारि पुनः प्रपूर्णं
ज्ञानं त्वयि स्फुरति विश्वविकासहेतुः ॥ ३०

व्यर्थीकृते क्षणमहांसि महातमांसि
सष्टानि दुष्टमनसा कमठेन यानि ।
न स्पृष्टमैश्यविभवानुदितोऽनुवेलं
ग्रस्तस्त्वमीभिरयमेव परं दुरात्मा ॥ ३१

स्वामिन्ननार्यविषयेषु सृजन् विहार-
माशातितस्त्वमसि जाड्यमयेन येन ।
संसारवारिनिलयेऽजनि दुःखरूपं
तेनैव तस्य जिन ! दुस्तरवारिकृत्यम् ॥ ३२

वै विमुक्तवति देव ! तदैव वैरं
यत्त्वय्यपि प्रतिपदं दृढमूढबुद्धिः ।
चक्रेऽतिवक्रहृदयः कमठः प्रहारं
सोऽस्याभवत्प्रतिभवं भवदुःखहेतुः ॥ ३३

तत्त्वोदकं त्वमुदितं प्रकटीचिकीर्षुः
सत्वोपकारकरणाय भवोदपाने ।
प्रादुर्बभूव धुरि यत्पुरुषोत्तमस्य
पादद्वयं तव विभो ! भुवि जन्मभाजः ॥ ३४

त्वत्साग्रयोजनशते वसते जनाय
मारीतिभीप्रभृतयः प्रभवः कथं स्युः ? ।
यज्जाग्रतः खगपतेरपि पश्य तस्य
किं वा विपद्विषधरी सविधं समेति ? ॥ ३५

आशातना विदधिरे विविधा बृहत्यो
हत्या इव त्वयि मया विधिदुर्विधेन ।
तन्नारकादिकभवोद्भववेदनानां
जातो निकेतनमहं मथिताशयानाम् ॥ ३६

अभ्यस्तकेवलमनुद्धतपःप्रभाव-
प्राग्भारसारविभवास्तव देव ! मन्ये ।
सर्वत्र भक्तजनविघ्नभिदे व्रजेयुः
प्रोद्यत्प्रबन्धगतयः कथमन्यथैते ॥ ३७

वाहीकबुद्धिशबलेन न भावपूजा
द्रव्यार्हणाऽप्यनुपयुक्ततया च चक्रे ।
उच्चावचासु जिन ! योनिषु तद् भ्रमामि
यस्मात् क्रियाः प्रतिफलन्ति न भावशून्याः ॥ ३८

नेतः ! कृपालुकुलकुञ्जर ! भीमसप्त-
भीवज्रपञ्जर ! जरामरणप्रहीण ! ।
स्वान्तालवालपरिणाममयः प्ररूढ-
दुःखाङ्कूरोद्दलनतत्परतां विधेहि ॥ ३९

मानुष्यकार्यविषयान्वयजातिरूपा-
रोग्यायुरार्हतमतादिकमप्यवाप्य ।
त्वच्छासने निबिडभक्तिमना दधानो
वध्योऽस्मि चेद् भुवनपावन ! हा हतोऽस्मि ॥ ४०

निष्कारणातिकरुमापरिणामधाम
व्याधामपाणिगणवर्ण्यगुणाभिराम ! ।
पाहि प्रसीद भगवन् ! सुकृतेषु मां कु-
सीदन्तमद्य भयदव्यसनाम्बुराशेः ॥ ४१

राज्यं विसृज्य विपुलं त्वमकिञ्चनत्वं
स्वस्वामिभावपरिहारपरं प्रपन्नः ।
विज्ञप्यसे जिन ! मयेति तथापि भूयाः
स्वामी त्वमेव भुवनेऽत्र भवान्तरेऽपि ॥ ४२

यस्मिन्न शुक्रमतिरुत्क्रमते न चापि
वाचस्पतेः प्रभवति प्रतिभाप्रकर्षः ।
श्रीसू(२) सुन्दरतरद्युतिकाः स्फुरन्ति
ये संस्तवं तव विभो ! रचयन्ति भव्याः ॥ ४३

चौरारिमारिवारिव्यालक्ष्मापालहरिकरिभयेभ्यः ।
तव नाथ ! स्तवनादप्याचिरान्मोक्षं प्रपद्यन्ते ॥ (आर्या) ४४

कल्याणमन्दिरमहास्तवनान्त्यपादा-
पादोनपूर्वमिति संस्तुतवैभवश्रीः ।
देयादमेयमहिमा महिमान्यनामा
वामासुतः सततमुन्नतबोधिलाभम् ॥ (वसन्ततिलका) ४५

पू. मु. श्री रत्नमुनिप्रणीतम्

## ४९. ॥ श्रीकल्याणमन्दिरच्छायास्तोत्रम् ॥

(अनुष्टुप्)

श्रेयोबीजमवद्यारी, प्रणिपत्याभयप्रदौ ।
भवाब्धौ पतताम‍र्हत्–पादौ प्रकृतिपोतितौ ॥ १

गरिम्णोर्वर्णने यस्य, न देवा ऋषयोऽप्यलम् ।
स्तौमि तं कमठौन्नत्य–मूलोषर्बुधमीश्वरम् ॥ २

सुवचा न भवद्वार्ता, प्रभो ! सामान्यतोऽपि नः ।
उलूकबालः किं वक्ता, धृष्टोऽपि रविरोचिषाम् ? ॥ ३

आदर्शेनापि सङ्ख्येया, गुणाः केवलिना न ते ।
कल्पान्तप्रकटोऽप्यब्धे, रत्नौघः केन मीयते ? ॥ ४

अनन्तयशसस्तेऽस्मि, जडोऽपि स्तवनोद्यतः ।
बाहू प्रसार्य ही बालः, सिन्धुविस्तारशंसिता ॥ ५

सतामपि भवल्लक्ष्मीं, वक्तुं नैति कियानहम् ? ।
शोच्यैव तदिदं(? यं) प्रौढिः पक्षिभाषावदस्ति वा ॥ ६

स्तवस्तेऽद्भुतमाहात्म्य, आस्तां नामापि विश्वपम् ।
पद्मद्रहस्य वातोऽपि, निदाघेऽध्वगतर्पणः ॥ ७

जन्तोर्नश्यन्ति कर्माणि, हृद्वर्तिनि सति त्वयि ।
अन्तश्चन्दनमायाते, मयूरे भुजगा इव ॥ ८

त्वयि दृष्टेऽपि मुच्यन्ते, नरा रौद्रैरुपद्रवैः ।
स्फुरत्तेजसि गोपाले, पशवस्तस्करैरिव ॥ ९

त्वां हृदोद्वहतां नृणां, तारकोऽसि कथं प्रभो ! ।
मध्यवातानुभावो वा, दृतिस्तरति यज्जलम् ॥ १०

हरादीनपि जेता यो, जितः कामोऽपि स त्वया ।
संवर्तकः पिबत्येव, वारि वह्निविनाश्यपि ॥ ११

हृद्यहो धार्यसेऽत्यन्त-गरिमाऽपि कथं जनैः ? ।
तरद्भिराशु जन्माम्बु, चित्रा वा महतां गतिः ॥ १२

क्रोधं निरस्य भवता, कर्मचौरा हताः कथम् ? ।
नीलद्रुविपिनं प्लोष-त्युत किं न हिमान्यपि ? ॥ १३

हृदब्जकोशे पश्यन्ति, योगिनस्त्वामधीश्वरम् ।
अक्षस्य यदि वा कोऽन्यः, कर्णिकायाः समाश्रयः ? ॥ १४

भवद्ध्यानाद् वपुस्त्यक्त्वा, ब्रह्मत्वे भान्ति मानवाः ।
धातुभेदा इव स्नुत्वं स्वर्णत्वे प्रबलानलात् ॥ १५

यदन्तर्भाव्यसे भव्यै-र्देहं नाशयसे कथम् ? ।
महानुभावा मध्यस्था, विग्रहस्योपशान्तये ॥ १६

त्वदभेदधियाऽऽत्माऽयं, ध्यातस्त्वमिव जायते ।
सुधेति चिन्त्यमानं किं, स्याद्वारि न विषापहम् ? ॥ १७

हरादिबुद्ध्या सेवन्ते, त्वां देव ! परवादिनः ।
काचकामलिनः श्वेते, शङ्खे वर्णान्तरेक्षिणः ॥ १८

आस्तां परस्तरुरपि, स्यादशोकस्त्वदन्तिके ।
जागर्ति उदिते वाऽर्के जीवलोकः सभूरुहः ॥ १९

अधोवृन्तं मरुत्पुष्प-वृष्ट्या प्रत्यय एष मे ।
त्वयि ज्ञाते सुमनसां, बन्धनानि पतन्त्यधः ॥ २०

मनोऽर्णवसमुत्थायाः पीयूषत्वं भवद्गिरः ।
यां पीत्वा स्वचिदेकाग्राः, पदं यान्त्यजरामरम् ॥ २१

नमनोत्पतनैश्चारु-चामराणामितीव धीः ।
तुल्यं प्रणमतां भावाद्, भाविनामूर्ध्वगामिता ॥ २२

रत्नासनगिरौ गर्जि-गिरं भव्यशिखण्डिनः ।
श्यामलं त्वां प्रपश्यन्ति, सद्यस्कमिव वारिदम् ॥ २३

कङ्केल्लिर्लुप्तपर्णश्रीः, शितिभामण्डलेन ते ।
भवत्सान्निध्यतः स्वामिन् ! नीरागः स्यान्न कोऽपरः ? ॥ २४

भो भो भजत मुक्त्यध्व-सार्थवाहमिमं मुदा ।
धीरेभ्य इति शास्तीव, ध्वनंस्ते नाम दुन्दुभिः ॥ २५

व्यधिकारो भयुक् चन्द्रो, जगतां द्योतने त्वयि ।
मुक्ताजालिसितच्छत्र-त्रितनुस्त्वामुपागतः ॥ २६

कान्ति-प्रताप-यशशां, जगत्पूरणपिण्डिताः ।
सञ्चया मणि-कल्याण-तारवप्राणि भान्ति ते ॥ २७

मौलीन् यदि सुरेन्द्राणां, त्यक्त्वा तव पदोः स्थिताः ।
सुमस्रजः सुमनसां, त्वदन्यत्र न रागिता ॥ २८

तारयेः पृष्टिसंलग्नान्, भवाब्धिविमुखोऽपि यः ।
स पार्थिवनिपात्माऽपि, अहो कर्मविपाकमुक् ॥ २९

स्वामी सना दरिद्रो हि, अक्षरात्माऽसि चालिपिः ।
विशदं ज्ञानमास्ते ते, देवाज्ञानवतः सतः ॥ ३०

दैत्येन रेणुभिर्मुक्तै-श्छायाऽपि तव का हता ? ।
रोषान्धकारसंवेशैः, शठो ग्रस्तः स केवलम् ॥ ३१

घनतर्जितडित्पात-धारामुशलभीषणम् ।
मुक्त्वा महाजलं प्राप, स महाजलतां पुनः ॥ ३२

कीर्णकेशदुराकार-मुण्डस्रगनलाननम् ।
त्वयि प्रेतव्रजं कृत्वा, सोऽवपत् प्रेत्यपातिताम् ॥ ३३

भजन्ते पादपद्मं ते, भक्त्युच्छ्वसितकण्टकाः ।
निश्शेषकुतुकोद्विग्नाः धन्या भुवि त एव हि ॥ ३४

त्वामिहापारसंसारे, शङ्के नाशृणवं पुरा ।
श्रुते त्वन्नाम्नि वामेय !, निकषा कान् विपत्त्यहिः ? ॥ ३५

कामदं त्वत्पदाम्भोजं, मन्ये न महितं मया ।
इति पङ्ककलङ्कानां, जातोऽहमिह मन्दिरम् ॥ ३६

मोहावतमसस्थस्य, दृश्योऽभूर्न कदापि मे ।
मर्माविधः पीडयन्ति, मामनर्थाः किमन्यथा ? ॥ ३७

श्रुत-पूजित-दृष्टोऽपि, न सम्यग् भावितोऽसि मे ।
पातकैरिति लिप्ये यद्, भावशून्या क्रियाऽफला ॥ ३८

विश्ववत्सल ! निर्लोभ ! शरण्य ! करुणापते ! ।
भक्तिभाजमिदानीं मा-मदुःखाङ्कुरितं कुरु ॥ ३९

सत्यं सर्वस्य शरणं, त्वामपि प्राप्य दैवतम् ।
प्रमादी यदि वध्योऽस्मि, हा हतोऽस्मि गतिः क्व मे ? ॥४०

देवेन्द्रवन्द्य ! सर्वज्ञ ! दयालो ! नाथ ! तायितः ! ।
व्यसनेभ्योऽतिसीदन्तं, पितः ! पाहि पुनीहि माम् ॥ ४१

त्वदागमानुकम्प्यस्य, या सम्यग् मम योग्यता ।
तत्प्रसादात् प्रभुर्भूया-स्त्वमेवात्र परत्र मे ॥ ४२

नित्यमेव भवद्बिम्ब-दर्शिभिः प्रणिधानिभिः ।
यैः प्रभो ! सान्द्ररोमाञ्च-कञ्चुकाङ्गैः प्रणीयसे ॥ ४३

अक्षयप्रतिभारक्ता, दिव्यां सम्भुज्य सम्पदम् ।
ते त्रिरत्नयुजो वेगाद्, विन्दन्ति परमं पदम् ॥ ४४

इत्येष किल कल्याण-मन्दिरानुगचेतसा ।
रत्नेन मुनिना नूतः, श्रीपार्श्वपरमेश्वरः ॥ ४५

पू.आ. श्री हेमविमलसूरिकृतम्
कल्याणमन्दिरस्य प्रथमचरणयुक्तं 'भक्तामरस्य
नवप्रथमचरण-शेष-चतुर्थचरण-युक्तम्

## ५०. ॥ श्रीवरकाणपार्श्वनाथस्तोत्रम् ॥

(वसन्ततिलका)

श्रेयोमहोदयलतावनयौवनश्री-
सम्प्राप्तिमाधवमगाधतरं महिम्ना ।
पार्श्वप्रभुं स्तवयुगैकपदैः समस्या-
बन्धन्नवीमि वरकाणपुरीगिरीशम् ॥ १

कल्याणमन्दिरमुदारमवद्यभेदि
पादाम्बुजं त्रिजगतीश ! तव स्तवीमि ।
अम्भस्तरङ्गनिकरैः स्नपितं मिषेण
भक्तामरप्रणतमौलिमणिप्रभाणाम् ॥ २

यस्य स्वयं सुरगुरुर्गरिमाम्बुराशेः
प्रज्ञानिधिर्न हि विभुर्गदितुं गुणौघम् ।
अत्यर्णवायितगुणं परमेष्ठिवर्गे
स्तोष्ये किलाहमपि तं प्रथमं जिनेन्द्रम् ॥ ३

सामान्यतोऽपि तव वर्णयितुं स्वरूप-
मज्ञः कथं स्तुतिविधौ प्रभवेयमीश ! ।
सङ्क्रान्तमप्सु शशिनं निशि वा विनार्भ-
मन्यः क इच्छति जनः सहसा ग्रहीतुम् ॥ ४

मोहक्षयादनुभवन्नपि नाथ ! मर्त्यो
मानातिगांस्तव गुणान्न हि चङ्क्रमीष्ट ।

प्राज्यप्रभुत्वपरमेश्वरमप्रगाह्यं
को वा तरीतुमलमम्बुनिधिं भुजाभ्याम् ॥ ५

अभ्युद्यतोऽस्मि तव नाथ ! जडाशयोऽपि
भक्त्येरितः स्तुतिविधावुपहासदेऽपि ।
रागात्स्वशक्तिमविचिन्त्य हरिं कुरङ्गी
नाभ्येति किं निजशिशोः परिपालनार्थम् ॥ ६

ये योगिनामपि न यान्ति गुणास्तवेश !
स्तोतुं कथं चतुरता मम तान् समेतु ।
यद्वा त एव खलु यान्तु चिदाश्रयं मा-
मल्पश्रुतं श्रुतवतां परिहासधाम ॥ ७

आस्तामचिन्त्यमहिमा जिन ! संस्तवस्ते
दूरेऽस्तु दर्शनमपि प्रशमप्रशस्यम् ।
नाम्नाऽपि ते दुरितसन्ततिरन्तमेति
सूर्यांशुभिन्नमिव शार्वरमन्धकारम् ॥ ८

हृद्वर्तिनि त्वयि विभो ! शिथिलीभवन्ति
भव्याङ्गिनां भवशतार्जितकर्मपाशाः ।
आत्मा श्रयेद्विमलतामिव शुक्तिसङ्गा-
न्मुक्ताफलद्युतिमुपैति ननूदबिन्दुः ॥ ९

मुच्यन्त एव मनुजाः सहसा जिनेन्द्र !
त्वत्सेवनादशुभकर्मभरेण भव्याः ।
तेषां च धाम शुचिरं विलसत्यपास्य
पद्माकरेषु जलजानि विकाशभाञ्जि ॥ १०

त्वं तारको जिन ! कथं भविनां त एव
यत्त्वां हृदा परिवहन्त्यथवान्तरस्थम् ।
त्वं तारयस्यथ न चेन्महतोऽग्र्यता का
भूत्याश्रितं य इह नात्मसमं करोति ॥ ११

यस्मिन् हरप्रभृतयोऽपि हतप्रभावा-
स्तं मन्मथं क्षपयतो भवतोऽन्यदेवम् ।
कः सेवते ? ससितगव्यपयः प्रपीय
क्षारं जलं जलनिधेरशितुं क इच्छेत् ॥ १२

स्वामिन्ननल्पगरिमाणमपि प्रपन्ना-
स्त्वच्छासनं लघु तरन्ति भवाम्बुराशिम् ।
विश्वत्रयेऽप्यनुपमाः खलु ते प्रजातो
यैः शान्तरागरुचिभिः परमाणुभिस्त्वम् ॥ १३

क्रोधस्त्वया यदि विभो ! प्रथमं निरस्तः
शेषद्विषो विमहसः स्वयमेव नेशुः ।
भानुर्विभां किमु हरेच्छशिमण्डलस्य
यद्भासरे भवति पाण्डुपलाशकल्पम् ॥ १४

त्वां योगिनो जिन ! सदा परमात्मरूप-
मारोप्य हृत्कमलकोशपदे भजेयुः ।
तेषां गुणाः शशिरुचः शवते त्रिलोकीं
कस्तान्निवारयति सञ्चरतो यथेष्टम् ॥ १५

ध्यानाज्जिनेश ! भवतो भविनः क्षणेन
कर्मावलिक्षयकरान्न मनाक् चलेयुः ।

दुर्गोपसर्गनिवहेन युगान्तवातैः
किं मन्दराद्रिशिखरं चलितं कदाचित् ॥ १६

अन्तः सदैव जिन ! यस्य विभाव्यसे त्वं
मन्ये तदेव हृदयं निलयं शिवस्य ।
यस्मिंस्तमः प्रशमयन्नपधूमवर्त्ति-
र्दीपोऽपरस्त्वमसि नाथ ! जगत्प्रकाशः ॥ १७

आत्मा मनीषिभिरयं त्वदभेदबुद्ध्या-
रोपेण संस्मृत इह प्रगुणप्रभावः ।
त्वद्वद्ध्वेद्धविकपद्मवनावबोधः
सूर्यातिशायिमहिमाऽसि मुनीन्द्र ! लोके ॥ १८

त्वामेव वीततमसं परवादिनोऽपि
प्राप्य प्रभो ! लघु तरन्ति भवाम्बुराशिं ।
वाक्यं तवेश ! जयताद्विमलावबोधं
नित्योदयं दलितमोहमहान्धकारम् ॥ १९

धर्मोपदेशसमये सविधानुभावाः
स्वान्ते समक्षसमुदो भवशर्म भव्याः ।
नेच्छन्ति वा फलितशस्यवतीह विश्वे
कार्यं कियज्जलधरैर्जलभारनम्रैः ॥ २०

चित्रं विभो ! कथमवाङ्मुखवृन्तमेव
सूनोत्करं तव किरन्ति यथा सुरास्ते ।
नैवं परस्य महिमा सुमणेस्तु यादृङ्
नैवं तु काचशकले किरणाकुलेऽपि ॥ २१

स्थाने गभीरहृदयोदधिसम्भवा या
वाचस्तवामृततुला विबुधास्त्वदीयाः ।
यद्भेजुषां सुमनसां न परो भवत्तः
कश्चिन्मनो हरति नाथ ! भवान्तरेऽपि ॥ २२

स्वामिन्सुदूरमवनम्य समुत्पतन्तः
संसूचयन्ति भविकानिति चामराः किम् ।
यन्नेतरा सुतमसूत विभो ! समं ते
स्त्रीणां शतानि शतशो जनयन्ति पुत्रान् ॥ २३

श्यामं गभीरगिरमुज्ज्वलहेमरत्न-
सिंहासनेऽमरगिरिस्थनवाम्बुदाभम् ।
त्वामीक्षते भविककेकिगणो यतस्त्वं
नान्यः शिवः शिवपदस्य मुनीन्द्र ! पन्थाः ॥ २४

उद्गच्छता तव शितिद्युतिमण्डलेन
भात्या वपुः परिवृतं सुषमां बिभर्त्ति ।
लुम्पत्यशोककिसलान्सलतानतस्त्वां
ज्ञानस्वरूपममलं प्रवदन्ति सन्तः ॥ २५

भो भोः प्रमादमवधूय भजध्वमेनं
कर्मच्छिदे विभुमिति त्रिजगज्जनौघान् ।
आमन्त्रयत्यमरदुन्दुभिरुन्नदंस्ते
व्यक्तं त्वमेव भगवन् ! पुरुषोत्तमोऽसि ॥ २६

उद्योतितेषु भवता भुवनेषु नाथ !
भ्रष्टाधिकार इव तारकवच्छशाङ्कः ।

श्वेतातपत्रमिषतस्त्रितनुर्विधत्ते
तुभ्यं नमो जिन ! भवोदधिशोषणाय ॥ २७

स्वेन प्रपूरितजगत्त्रयपिण्डितेन
चन्द्रांशुसान्द्रयशसा गुणराशिपूर्णः ।
दोषैरलब्धनिलयैर्गमितैर्विदूरैः
स्वप्नान्तरेऽपि न कदाचिदपीक्षितोऽसि ॥ २८

दिव्यस्त्रजो जिन ! नमत्त्रिदशाधिपानां
मूर्द्ध्नो महामणिमयानपहाय मौलीन् ।
शेश्रय्यति क्रमयुगं तव तत्प्रतिक्षि-
मुच्चैरशोकतरुसंश्रितमुन्मयूखम् ॥ २९

त्वं नाथ ! जन्मजलधेर्विपराङ्मुखोऽपि
तीर्णश्च तारयसि संश्रितभव्यलोकम् ।
धामस्थितं भविकहृत्सु तमोपहं ते
तुङ्गोदयाद्रिशिरसीव सहस्त्ररश्मेः ॥ ३०

विश्वेश्वरोऽपि जनपालक ! दुर्गतस्त्वं
कष्टव्रजाद्वितनुषेऽभिमतं श्रितानाम् ।
सिंहासनं द्युतिरुचा भवतेश राज-
त्युच्चैस्तटं सुरगिरेरिव शातकौम्भम् ॥ ३१

प्राग्भारसम्भृतनभांसि रजांसि रोषा-
त्साराद्यथा जलमुचा प्रगलन्ति तद्वत् ।
आमस्तव स्मृतिवशेन भवेदसङ्गः
प्रख्यापयत्त्रिजगतः परमेश्वरत्वम् ॥ ३२

यद्गर्जदूर्जितघनौघमदभ्रभीमं
भीतिच्छिदो जयति गीस्तव युक्तमेवम् ।
विश्वत्रयेऽपि गुरुतां भजतस्तवांह्री
उन्निद्रहेमनवपङ्कजपुञ्जकान्ती ॥ ३३

ध्वस्तोर्ध्वकेशविकृताकृतिमर्त्यमुण्ड-
भूषाधनेषु गिरिशादिषु सा न हि श्रीः ।
या तेऽजनिष्ट सवितुः किल यः प्रकाश-
स्तादृक्कुतो ग्रहगणस्य विकाशिनोऽपि ॥ ३४

धन्यास्त एव भुवनाधिप ! ये त्रिसन्ध्यं
त्वामर्चयन्ति विगलन्मदभिन्नगल्लम् ।
व्यालं बलोत्कटमतीवरुषन्तिकासं
दृष्ट्वा भयं भवति नो भवदाश्रितानाम् ॥ ३५

अस्मिन्नपारभववारिनिधौ मुनीश !
चण्डानिलोद्धतजले विषयोर्मिराशिः ।
निर्यामकोज्झितनिजक्रिययानसंस्थं
नाक्रामति क्रमयुगाचलसंस्थितं ते ॥ ३६

जन्मान्तरेऽपि तव पादयुगं न देव !
नेमे वयाश्मपतनप्रसृतं दवाग्निम् ।
ज्वालालिदग्धविपिनं भयदं समेतं
त्वन्नामकीर्त्तनजलं शमयत्यशेषम् ॥ ३७

नूनं न मोहतिमिरावृतलोचनेन
दृश्य प्रभो ! भवदुपास्तिवशाज्जनोऽयम् ।

भीमद्विजिह्वमणुवन्मनुते भुजङ्गं
रक्तेक्षणं समदकोकिलकण्ठनीलम् ॥ ३८

आकर्णितोऽपि महितोऽपि निरीक्षितोऽपि
त्राता जिन ! त्वमसि यत्समरे रिपूणाम् ।
सेना गजाश्वसुभटध्वनिभीषणापि
त्वत्कीर्त्तनात्तम इवाशु भिदामुपैति ॥ ३९

त्वं नाथ ! दुःखिजनवत्सल ! हे शरण्य !
रक्षेति संस्मृतिपरा विचरत्कबन्धे ।
युद्धेऽस्त्रविद्धगजभीमरवे जयश्रीं
त्वत्पादपङ्कजवनाश्रयिणो लभन्ते ॥ ४०

निःसंख्यसारशरणं शरणं शरण्य-
मीशं प्रपद्य मृगपस्य शरन्नखस्य ।
हेलाविनिर्दलितकुम्भिघटस्य सत्त्वा-
स्त्रासं विहाय भवतः स्मरणाद् व्रजन्ति ॥ ४१

देवेन्द्रवन्द्य ! विदिताखिलवस्तुसार !
त्वद्भक्तितः झगिति जीवितसंशयाप्ताः ।
कासक्षयज्वरजलोदररुक् प्रतप्ता
मर्त्या भवन्ति मकरध्वजतुल्यरूपाः ॥ ४२

यद्यस्ति नाथ ! भवदंह्रिसरोरुहाणा-
मन्तः षडंह्रितुलितं सुधियां तदाशु ।
मोक्षं भजन्ति निबिडं निगडैर्निबद्धा
आपादकण्ठमुरुशृङ्खलवेष्टिताङ्गाः ॥ ४३

इत्थं समाहितधियो विधिवज्जिनेन्द्र !
मत्तेभवायनलनागरणाङ्गणोत्थाः ।
यामवेधनभियश्च गलन्ति तस्य
यस्तावकं स्तवमिमं मतिमानधीते ॥ ४४

व्याङ्गिदृक्कुमुदचन्द्रनिभप्रभाव
भोगीन्द्रभोगिललनाश्चित पार्श्वदेवा ।
स्त्वां नवीति वरकाणपुराधिपैवं
तं मानतुङ्गमवशा समुपैति लक्ष्मीः ॥ ४५

एवं जिनेश ! मुनिसुन्दरवंशजाली
संसेव्य हेमविमलस्तुतसद्गुणौघ ।
आशालताः सफलयेर्वरकाणनाथ
श्रीपार्श्व ! मे विमलधर्मशुभप्रभावात् ॥ ४६

पू.मु.श्री विनयहंसविजयविरचितम्
स्नातस्यास्तुतिपदविनिर्मितसमस्यामयम्

## ५१. ॥ श्रीऋषभजिनेन्द्रस्तवनम् ॥

(स्रग्धरा)

हर्षोत्कर्षप्रणम्रत्रिदशपति-शिरः,-स्कारकोटीरकोटी-
स्फूर्जन्माणिक्यमाला शुचिरुचिलहरी, धौतपादारविन्दम् ।
कल्याणाङ्कूरपूरप्रकटनपटुता, पुष्करावर्त्ततोयम्,
वन्दे देवाधिदेवं प्रथमजिनमिनं, चीननिर्णिक् (?) सुभक्त्या ॥ १

(शार्दूलविक्रिडितम्)

नाम्ना नौ वृषभत्वकेऽपि विभुतां, ते देहि मे त्वद् गुणै-
रीणस्य श्रितवत्सलोऽस्यमितस,-च्छक्तित्ववाँस्त्वं यतः ।

तेनार्थित्वमितस्त्वयीति तनुते, यस्यांह्रिलक्ष्मोपधेः,
सेवामोक्षवरश्रिये स वृषभो, भक्तार्ति हर्ता सताम् ॥ २

योगीन्द्रा अपि ते गुणान् कथमलं, वक्तुं न तेषु प्रभुः,
स्तोतुं स्यात्तदहो तथाऽपि न लघु, - मत्तुच्छनुत्या स्तुतः ।
नेतः सैनवनस्थितोऽपि रवणो, नेभः(?सदा कृतेतिः),
**स्नातस्याऽप्रतिमस्य मेरुशिखरे, शच्या विभोः शैशवे** ॥३

श्रीमन्नाभि-नरेश-वंशज विभो !, व्याख्यान-भूम्यासने,
स्थास्नुं मूर्तिचतुष्टयीं तव पृथग् रूपां न मे मे मनाक् ।
यत्पर्षज्जनतोचितं तदनया भूतं यतस्ते पते,
**रूपा-लोकन-विस्मया-हृतरस-भ्रान्त्या भ्रमच्चक्षुषा** ॥४

सोऽस्तु श्रीवृषभप्रभुर्भव-भृतां भूत्यै यदङ्गं पुरा,
दिव्यासन्युपवेश्य सौवतभुजस्नेहेन चीनांशुकैः ।
स्नानार्थं मरुदेवयाऽसकृदहो, हर्षोद्धताङ्ग्या स्वयम्,
**उन्मृष्टं नयनप्रभा-धवलितं, क्षीरोदकाशङ्कया** ॥ ५

इन्द्रोपेन्द्रमुनीन्द्रचक्रि-प्रमुखैरत्यद्भुतव्यक्तकैः,
स्तुत्यार्थोऽपि यथार्थसद्गुणगणो भक्तिरितान्तःकृतेः ।
गङ्गापूर इवान्तरैकसरसः, किं नो पुनीतेऽत्र मे,
**वक्त्रं यस्य पुनः पुनः स जयति श्रीवर्द्धमानो जिनः** ॥ ६

श्रीमानादिजिनः श्रियेऽस्तु स वृषो, लक्ष्मोपधेर्यत्पुरो,
विज्ञप्तिं कुरुते किमित्यनुदिनं, षण्ढात्फलं सेवितात् ।
त्वं नुत्यक्षसुखप्रदो हि भवता, मुक्ता इवाब्धिर्जने,
**हंसां साहत-पद्म-रेणु-कपिश,-क्षीरार्णवाम्भोभृतैः** ॥ ७

नेतस्तावकपावकोज्ज्वलगुण,-श्रेणी-मनन्ता क्षमा,
वक्तुं योगिवराः कथं स्ववचसा, त्वं वाङ्मनो लक्ष्यताम् ।
प्राप्तो यत्कलयन्महार्णवजले, यत्नं नु किं कः प्रभुः,
**कुम्भैरप्सरसां पयोधर-भर-प्रस्पर्द्धिभिः काञ्चनैः ॥** ८

स्वामिंस्त्वद्वर-भक्ति-योग-वशतो, देश-प्रमत्तादिसद्-
गौणस्थानगतोत्तरोत्तरगुणश्रेणीमिताः साम्प्रतम् ।
तद् यत्तेऽत्र सुपर्वणामविरता,-नां मुक्तिबीजं ह्यभूत्,
**येषां मन्दर-रत्न-शैल-शिखरे, जन्माऽभिषेकः कृतः ॥**९

श्रीआदीश ! तवैव भक्तिविभुनैश्वर्यं प्रलभ्यान्तरम्,
ये भव्याः क्रमतश्चतुर्दश गुण,-स्थानक्रियारोहणैः ।
सान्द्रां रुद्र-गुणावलीं शिवपदं, प्रापुर्विधुत्यार्चिताम्,
**सर्वैः सर्वसुरासुरेश्वरगणैस्तेषां नतोऽहं क्रमान् ॥** १०

(स्रग्धरा)

नानानन्तार्थभावं ह्यणुपरिणतिवत्, चिन्तितेष्टप्रवीणं,
चिन्तामण्यादिबद्धा तरणिरिव सतां, स्पष्टिता-शेष-मार्गम् ।
ज्ञानीव व्यक्त-तत्त्व-प्रकटन-पटुकं, संश्रये भक्तियुक्तै-
**रर्हद्-वक्त्र-प्रसूतं गणधर-रचितं द्वादशाङ्गं विशालम् ॥**११

चक्रित्वं तीर्थकृत्त्वं सुरवर-विभुता, लब्धि-लब्ध-प्रकाशो,
यल्लब्ध्वा भव्यजीवैः शिवपदसपदं, प्रापि कालत्रयेऽपि ।
पञ्चत्रिंशद्गुणौघं सुहृदि जिनवहे, त्वद्वचोऽनन्तभावै-
**श्चित्रं बह्वर्थयुक्तं मुनिगण-वृषभैर्धारितं बुद्धिमद्भिः ॥**१२

ग्रन्थेर्भेदं विधायो-पशमजमुखसंदर्शनोत्थस्वचेतो,
निष्ठ-प्रष्ठेभ्य-भक्तेर्जिनवच(र?)चरणो,-पासनं शासनं ते ।
सेवन्ते पूर्व-रत्न-त्रय-चिति-विततं-भोगयोगीह येषाम्,
**मोक्षाऽग्रद्वारभूतं व्रत-चरण-फलं, ज्ञेय-भाव-प्रदीपम्॥१३**

धर्मादि-द्रव्य-षट्कं चरण-करणगं, तच्च धर्मद्विभेदम्,
सादेशं नन्द-तत्त्वं प्रथयति यदहो, मार्गणादि-प्रपञ्चैः ।
मत्यादिज्ञानरूपं मिथ इह जिन ! तत्, कालिकोत्कालिकं ते,
**भक्त्या नित्यं प्रपद्ये श्रुतमहमखिलं सर्व-**
**लोकैक-सारम् ॥** १४

मन्येऽहं मुक्तिकल्पाद्भुतमहिममयं, रूपमाकर्ण्य सूनोः,
यस्योद्वाहोचिता वेक्षणविधिकलया, किं शिवं पूर्व-मग्रे ।
प्राप्तामर्वादिदेवा सुविभुरिह दध-न्तं वृषाङ्कं खुराग्रै-
**निष्पङ्क-व्योमनील-द्युतिमल-सदृशं,**
**बालचन्द्राभ-दंष्ट्रम् ॥** १५

चित्ते ध्यायन्ति भव्या अहमहमिकया, येऽनिशं नाममन्त्रम्,
सिद्धान्ते सार्व तेषां, भवजलधिरपा-रोऽप्य-भून्नाम शेषः ।
तत्तेऽतीयन्ति किं न ज्वलन-मरि-महिंस्तेन-सिंहाम्बु-नागम्,
**मत्तं घण्टारवेण-प्रसृत-मदजलं, पूरयन्तं समन्तात् ॥१६**

त्वत्पादाब्ज-प्रणामैर्यदि भुवि भविनां, सम्भवन्ति क्षणेन,
यक्षैश्वर्याणि वर्याण्यपि न सुर-शिवा-दीनि विश्वत्रयेऽपि ।
स्वामिंस्ते वन्दनार्थं सपरिकरवरैः, किं तदोको न नाका-
**दारूढो दिव्यनागं विचरति गगने कामदः कामरूपी ॥१७**

यः श्रीशत्रुञ्जयाख्यक्षितिधरतिलकं, तीर्थपं मारुदेवम्,
निघ्नन् विघ्नानि कुर्वन् हितमुपनमतां, प्राणिनां शं तनोति ।
सर्वाणीष्टानि स श्रीजिनचरणक्रमोपासको गोमुखाख्यो,
**यक्षः सर्वानुभूतिर्दिशतु मम सदा, सर्वकार्येषु सिद्धिम्** ।।१८

श्रीहर्ष-विनयसूरित-गुरु-हर्ष-विनय-सुधी-भिरप्यद्रौ ।
श्रित-हर्ष-विनय-सूरि श्री जय जयहर्षविनय-गुरो ॥ १९

वन्दे त्वां वृषभैक-हर्ष-विनय, श्री-सूरिभं श्रीपदं,
श्रेयो-मार्ग-विलासि-हर्ष-विनय, श्री-सूरितं सर्वतः ।
मिथ्याज्ञानतमस्सु हर्ष-विनय, श्री-सूरिभूपेष्वपि,
प्रष्टाज्ञोदयदं च-हर्ष-विनय,-श्रीसूरि-पूज्य-क्रमम् ॥ २०

इत्थङ्कारमुदारसारसरसै-र्निर्मितभक्त्युक्तत्वाम्,
'....नृसुरादि राज्यविभवं, याचे न किन्त्वस्तु मे ।
श्री आदीश ! तवेह हर्षविनयश्रीसूरिसेवापदोः,
श्रेयः श्रीस्तु यया शयालयलया श्रीधर्महंसश्रिया ॥ २१

मुनिप्रवरश्री विनयहंसगणिविरचितम्
संसारदावास्तुतिपदविनिर्मितसमस्यामयम् ।

## ५२. ॥ श्रीपार्श्वनाथस्वामिस्तवनम् ॥

श्रीवामेयजिनं निरस्तवृजिनं दुष्कर्ममर्माजिनं
भोगीन्द्रध्वजिनं विगातस्वजिनं भामण्डलभ्राजिनम् ।
दुष्टारिष्टजिनं खजिद्गतिजिनं दुःखाङ्कुरोत्थं जिनं
सेवे पार्श्वसुसेव्यपार्श्वमसकृत् श्रीपार्श्वविश्वेश्वरम् ।।(शा.वि.) १

अर्हद्भक्तिभृतात्मनः परिवृतिं कर्त्तुं मुदा मन्त्रय-
न्त्येताः सप्त जगत् स्वसम्पद इवोद्वीक्षत्यसौ वाञ् शयन् ।
यन्मूर्ध्नि स्फुटकूटतः प्रकटिताः साटोपमुत्कण्ठिताः
स श्रीपार्श्वजिनस्तनोति हृदि सेवासं शिवाशाप्तिकृत् ॥ २
(शा.वि.)

(उपजाति)

श्रीपार्श्वनामाम्बुधरोन्नतिः स्याद्यस्यान्तरेऽनन्तसुखाम्बुवृष्टिः ।
द्विधा भियस्ते स कथं बिभेति **संसारदावानलदाहनीरम्** ॥३

नाम्नाऽपि तेऽभूज्जिननामशेषा यां योगिनां संवरपूर्णयोगात् ।
त्वया सहाऽभ्येतु कथं जयं सा **सम्मोहधूलीहरणे समीरम्** ॥४

श्रियः पुरस्तस्य लुठेयुरिष्टाःसदोचितं स्वोरसि तेंऽह्रिपद्मम् ।
श्रीपार्श्व ! यः श्रीसदनं धरेता-**मायारसादारणसारसीरम्** ॥५

व्याघ्रादयः सद्गतिगामिनश्चे-दर्च्याश्च यस्याः कुरुते कथं तत् ।
स्थिरैकभक्तिस्तव पार्श्व ! तस्यां **नमामि वीरं गिरिसारधीरम्**॥६

(वसन्ततिलका)

यद्वाङ्मनःकरणपावनतथ्यतीर्थ-
मन्तर्धृतं गुणभृतां मुदितं त्रिलोक्याम् ।
संस्मर्यते तव तदीश ! चिदाद्यनन्त-
**भावावनामसुरदानवमानवेन** ॥ ७

विश्वेषु सङ्गतमिदं सदृशैः सहाति-
श्लाघ्यं किमित्युचिततोन्नति ये वितेनुः ।
त्वत्पादपद्मयमुपदाने (?) सुरासुराद्रि-
**चूलाविलोलकमलावलिमालितानि** ॥ ८

दूरे स्तुतिः समवसृत्युपसारिणीयं
छायाप्यनूद्दिशति तेऽभिमताश्रितार्हन् ।
आमुष्मिकैहिककफलार्पणहेतुदेहि-
**सम्पूरिताभिनतलोकसमीहितानि** ॥ ९

यैर्दिश्यतेऽमितनयैः समयत्रयेऽपि
श्रेयःपथः सुयतिनामनवद्ययोगैः ।
श्रीद्वादशाङ्गविहितानि तवाहितानि
**कामं नमामि जिनराजपदानि तानि** ॥ १०

(मन्दाक्रान्ता)

श्रीपार्श्वस्यात् श्रुतिपथपथी सप्रभावोन्नदाद्यः
काष्ठे स्थास्नोर्ज्वलदहिपतेरैन्द्रमैश्वर्यमार्यम् ।
तं ब्रूमोऽब्धिं सदमृतरसोद्वेजनैर्मन्त्रराजं
**बोधागाधं सुपदपदवीनीरपूराभिरामम्** ॥ ११

यत्रोक्ताः स्यात्पदविशदितास्ते नया इष्टसम्पत्-
पुष्टा यद्वद्रससरसिता लोहधातुप्रयोगाः ।
सेवे पार्श्वाभयदसुवचोऽनन्तभावात्मकं ते
**जीवाहिंसाविरललहरीसङ्गमागाहदेहम्** ॥ १२

द्रव्याकारप्रभृतिभगवद्भूषितोऽनन्तशो यो
दिव्यादेशानिमिषगिरिमक्षोभ्यमेवोचितं तम् ।
अन्यादेशिप्रलयमरुता ते वदन्तीश-(?)
**श्रूलावेलं गुरुगममणीसङ्कुलं दूरपारम्** ॥ १३

भाम्पव्यापप्रशमनपटुं संवरोदारचारं
दिव्यादेशोदितहयभिदावीचिकं सर्ववित्ते ।

लोकद्रव्यव्रजमतभिदोत्सर्जनाव्यर्थरत्नं
**सारं वीरागमजलनिधिं सादरं साधु सेवे** ॥ १४

(स्रग्धरा)

देवाभासत्वमप्यनत्वभवदणुपराशेषदेवेषु याना-
रोपं तारस्य शुक्ताविव भविकमनःश्रेण्यसौ त्वत्पदाब्जम् ।
मुक्त्वान्यत्रैति तोषं क्षणमपि हि कथं नाथ ! सेवाऽब्जमाला
**आमूलालोलधूलीबहुलपरिमलालीढलोलालिमाला** ॥१५

स्वामिंस्त्वत्पादपद्मे वसति जलधिजा सा प्रतततप्रमाणे
सिद्धत्वाच्चेन्नतस्यार्चनतपनभृतामन्यथा श्रीः कुतः स्यात् ।
किन्त्वेषा रूढिरेवं कविवचसि लसद्यद्रमानूपुरौघा-
**ज्झङ्कारारावसारामलदलकमलागारभूमीनिवासे** ॥ १६

त्रैलोक्याश्चर्यकार्यद्भुतसदृशपरस्याररूपात्यभावा-
तावद्भिर्वीतरागैरणुभिरनणुभिजतिमत्राधिकेन ।
उत्पत्तौ तेऽङ्ग योगेऽतिशयितगुणिनि श्रेयसंसिद्धिबीजै-
**श्छाया सम्भारसारे वरकमलकरे तारहाराभिरामे** ॥ १७

श्रावं श्रावं मुदा यं शिवपथपथिकां जज्ञिरे ज्ञानविज्ञाः
शश्वत्कालत्रयेऽपि प्रशमरसदया खादसज्जस्क कत्के ।
श्रीसार्वास्यप्रशस्यप्रसृतिसमुदिते शारदे द्वादशाङ्गी
**वाणी सन्दोहदेहे भवविरहवरं देहि मे देव ! सारम्** ॥ १८

एवङ्कारमुदारहर्षविनयश्रीसूरिराजार्चित-
त्वं देहि प्रभुतादिहर्षविनयश्रीसूरितो मे स्तुतिम् ।
ज्ञानाद्वैतपदं सहर्षविनयश्रीसूरितानन्तवाग्-
ब्रह्मागम्यसुधर्महंसकमलश्रीधर्महंसप्रभो ॥ (शा.वि.) १९

पूर्वाचार्यविरचितं 'संसारदावा'-पादपूर्त्तिरूप-

## ५३. ॥ श्रीपार्श्वजिनस्तवनम् ॥

श्रेयो दधानं कमलानिधानं पार्श्वं स्तुवेऽहं प्रमदाभिधानम् ।
श्वःश्रेयसश्रीसहकारकीरं **संसारदावानलदाहनीरम्** ॥(ई.व.)१

निर्धूतदोषं कृतधर्मपोषं प्रोन्मुक्तयोषं दितदुष्टदोषम् ।
सत्केवलश्रीरमणैकवीरं **सम्मोहधूलीहरणे समीरम्** ॥(ई.व.)२

अनिन्द्यविद्यावदनं वदान्यं पार्श्वं स्तवीमि त्रिदशेन मान्यम् ।
कर्मक्षयादाप्तभवाब्धितीरं **मायारसादारणसारसीरम्** ॥ ३
(उ.जा.)

अमन्दमन्दारसुदामदिव्यप्रसूनसारैर्महितं हि पार्श्वम् ।
स्फूर्ज्जद्यशस्तर्ज्जितहारहीरं **नमामि वीरं गिरिसारधीरम्** ॥४
(उ.जा.)

(वसन्ततिलका)

निश्शेषलेख ! वररेख ! नरेषु कामं
दानं ददान ! महिमाद्भुतभागधेय ! ।
श्रीपार्श्वदेव ! जय जन्मजराऽपहेन !
**भावावनाम ! सुरदानवमानवेन !** ॥ ५

निस्सङ्गरङ्गगरिमादिगुणप्रधानि
निच्छिन्नछद्मतिमिराणि मनोज्ञदानि ।
भक्तिप्रणम्रनरनायकनागलोक-
**चूलाविलोलकमलावलिमालितानि** ॥ ६

कल्याणकारणतराणि गतापदानि
सम्पत्प्रदानदितदुर्गतिमण्डलानि ।
निस्सीमभीमभवभीतिविभेदकानि
**सम्पूरिताभिनतलोकसमीहितानि** ॥ ७

वामेयगेयगुणमानविगानमुक्त-
पद्मावतीधरणराजवरप्रयुक्त ! ।
त्वज्जन्मसंयमसुखानि शिवङ्कराणि
**कामं नमामि जिनराज ! पदानि तानि** ॥ ८

(मन्दाक्रान्ता)

तापोच्छेदं दिशदनुदिनं प्राणिनां भावुकानां
सिद्धं यस्यामृतरसमयं तुण्डकुण्डात्प्रवृत्तम् ।
भात्यर्हंस्ते सुवचनसरः पापपङ्कापहारि
**बोधागाधं सुपदपदवीनीरपूराभिरामम्** ॥ ९

रेवा तावद्विमलसलिला नर्मदा शर्मदाऽपि
काशीः काशीकलुषहरिणी तुङ्गभद्रा विभद्रा ।
तुङ्गा गङ्गा जिनमतसरो नासमन्तःपवित्रं
**जीवाहिंसाविरललहरीसङ्गमागाहदेहम्** ॥ १०

भो भो भव्या ! यदि शिवपुरे मोक्षलक्ष्मीबुभुक्षा
सिद्धान्ताब्धिं समुपसरत प्रोल्लसन्न्यायचक्रम् ।
निर्णिक्लान्तःपरमगरिमागारमानन्दहेतुं
**चूलावेलं गुरुगममणीसङ्कुलं दूरपारम्** ॥ ११

मोहद्रोहक्षितितनुरुहोन्मूलने हस्तिहस्तं
प्रोद्भिन्दन्तं परमतरजःपुञ्जमुद्धूतशस्तम् ।

संसेव्यं श्रीजिनजनगणैः कामदं संश्रितानां
**सारं वीरागमजलनिधिं सादरं साधु सेवे** ॥ १२

(स्रग्धरा)

भक्तिप्रह्वावनम्रामरवरनिकरैर्निर्ज्जरैर्निर्मिता यत्
पादाधस्ताद्विहारावभरमवनिबुध्य प्रबुद्धस्य नेतुः ।
उत्तप्ता स्वर्णवर्णा नवनवकमला श्रेण्यनुश्रेण्यबाभा-
**आमूलालोलधूलीबहुलपरिमलालीढलोलालिमाला** ॥१३

भावोद्भूतप्रमोदप्रणतविनतिभिर्भूरि भक्तिं विधत्ते
यः पार्श्वेशक्रमाब्जे तव विपुलरमाः प्राज्यराजैव सार्द्धम् ।
तस्य स्थैर्यं भजेत प्रगतचपलताः ! सन्ततं षट्पदाली-
**झङ्काराराावसारामलदलकमलागारभूमीनिवासे** ॥ १४

यस्मिन् गर्भावतीर्णे भगवति धनदः प्रत्नरत्नैः सुवर्णैः
कल्याणैर्दिव्यवर्णैरनणुमणिगणैर्गन्धवासैर्ववर्ष ।
शुश्रूषां कर्तुकामस्त्रिदशवरगिरा सुन्दरे मन्दिरे वै
**छायासम्भारसारे वरकमलकरे तारहाराभिरामे** ॥ १५

पङ्कोत्पन्नं रजस्विप्रबलतरजडासङ्गमुच्चैर्विहाया-
र्हद्वक्त्राब्जे निवासं निरुपमपरमे या व्यधाद्धारतित्वम् ।
श्रेयोलक्ष्मीविलासे ! भगवति ! वरदे चन्द्रचन्द्रप्रभाढ्ये !
**वाणीसन्दोहदेहे ! भवविरहवरं देहि मे देवि ! सारम्** ॥१६

इत्थं श्रीपार्श्वदेवस्त्रिभुवनविजयी जैनभद्रांह्रिसेवः
श्रीसिद्धान्तप्रभोद्यद्विनयनतमुनिर्जैनचन्द्रो वितन्द्रः ।
श्रीमच्छ्रीमण्डपप्रागुदयगिरिशिरोमण्डनं जीवराजी-
राजीवोल्लासहेतुः प्रदिशतु कुशलं श्रेयसे श्रीविलासम् ॥ १७

(शा.वि.)

पूर्वाचार्यविरचितं 'संसारदावा'-पादपूर्त्तिरूप-

## ५४. ॥ श्रीमहावीरस्वामिस्तवनम् ॥

कल्याणवल्लीवनवारिवाहं, श्रेयः पुरीसत्पथसार्थवाहम् ।
हर्षप्रकर्षेण नवीमि वीरं, **संसारदावानलदाहनीरम्** ॥(इ.व.)१

विभोजनास्ते जगति प्रधाना ये त्वां भजन्ते दलिताभिमानाः ।
सम्प्राप्तसंसारसमुद्रतीरं, **सम्मोहधूलीहरणे समीरम्** ॥(उ.जा.)२

केनापि जिग्ये न हि मोहभूपः, प्रकाममुद्दामतमःस्वरूपः ।
विना भवन्तं भुवनैकवीरं, **मायारसादारणसारसीरम्** ॥ ३
(उ.जा.)

सुवर्णसद्वर्णलसच्छरीरं, सिद्धार्थभूपालकुलामकीरम् ।
औदार्यधैर्यादिगुणे गभीरं, **नमामि वीरं गिरिसारधीरम्** ॥ ४
(उ.जा.)

(वसन्ततिलका)

अन्या विहाय महिला महिमाभिराम,
भेजे जिनेश भवता किल मुक्तिरामा ।
कैवल्यनिर्मलरमासुखमानवेन,
**भावावनामसुरदानवमानवेन** ॥ ५

सत्ताकिनायकनिकायशिरांसि यानि,
ब्रह्मादिदैवतगणेन मनागतानि ।
त्वत्पादनीरजरजः स्पृहयन्ति तानि,
**चूलाविलोलकमलावलिमालितानि** ॥ ६

तापापहा भविकभृङ्गविराजमाना,
मूर्तिस्तव प्रवरकल्पलतोपमाना ।
दत्ते जगत्त्रयपतेऽसुमतः समूहैः,
**संपूरिताभिनतलोकसमीहितानि** ॥ ७

येषामधो नवसुवर्णसमुद्भवानि,
संवारयन्ति विबुधा नवधा कजानि ।
भूपावकानि रजसा किल तावकानि,
**कामं नमामि जिनराज पदानि तानि** ॥ ८

(मन्दाक्रान्ता)

तावत् तृष्णाकुलितमतयः पापतापोपगूढा
दुःखायन्ते नवनवभवग्रीष्मकाले कराले ।
यावल्लोका घनमिव भवच्छासनं नो लभन्ते
**बोधागाधं सुपदपदवीनीरपूराभिरामम्** ॥ ९

पीयूषाभं तव सुवचनं वर्यमाधुर्ययुक्तं
स्वादं स्वादं विपुलहृदयं क्षीरसिन्धोः समुत्थम् ।
क्षीरं नीरं कुसमयमयं कामयन्ते न भव्या
**जीवाहिंसाविरललहरीसङ्गमागाहदेहम्** ॥ १०

निष्पुण्यानां न सुलभमिह श्रीमदानन्दहेतु
विज्ञैर्नान्यैस्तव जिनपते शास्त्ररूपं निधानम् ।
चित्रावासे लसदवलता निर्जिता मर्त्यभूभृत्
**चूलावेलं गुरुगममणीसङ्कुलं दूरपारम्** ॥ ११

अव्याबाधाः सपदि विबुधाः सच्चिदानन्दलीनाः,
पुण्यापीना अजरममरं संश्रयं संश्रयन्ते ।
यस्मात् पीत्वा समशमसुधी तं जिनेन्द्र त्वदीयं,
**सारं वीरागमजलनिधिं सादरं साधु सेवे** ॥ १२

(स्रग्धरा)

ये दुर्ग्गाश्चोपसर्ग्गा भवति कुमतिना सङ्गमेनाहतास्ते,
तस्यैवास्तङ्गमायाऽजनिषत तदनुध्यानसन्धानदष्टै- ।
देवैर्दिव्या समोदं तव शिरसि तदा पुष्पवृष्टिर्विचक्रे,
**आमूलालोलधूलीबहुलपरिमलालीढलोलालिमाला** ॥१३

शान्तं कान्तं नितान्तं निरुपमसुखमालाभवन्तं भवन्तं,
दृष्ट्वा लीना स्वयं सा जिनवर ! कमला चञ्चलाऽपि स्वभावात् ।
विन्यस्ता शौ(शो)रिणा या विधिसविधगता न स्थिता षट्पदाली,
**झङ्काराराबसारामलदलकमलागारभूमीनिवासे** ॥ १४

केचिद् हायन्ति देवाः प्रमदभरभृता नाथ नृत्यन्ति केचित्,
स्नाते जाते सुमेरौ त्वयि जनिसमये रत्नसिंहासनस्थे ।
रम्यक्षौमावृताङ्गे मृदुतरचरणाभासुरस्फारमौलि-
**छायासम्भारसारे वरकमलकरे तारहाराभिरामे** ॥ १५

सिंहाकः सप्तहस्तप्रमिततनुरयं संपदः सर्वभव्या-
देया देयाद् यदीयाननकमलभवा द्वादशाङ्गीमयाङ्गी ।
दक्षौ मोक्षोपयोगी वदति भगवती भारती नित्यमेवं
**वाणीसन्दोहदेहे भवविरहवरं देहि मे देवि सारम्** ॥ १६

एवं देवाधिदेवः सदतिशयचयैः सर्वतः शोभमानः
काव्यैः संसारदावास्तुतिपदकलितैः कोविदैर्वर्ण्यमानः ।
सद्ध्येयस्त्रैशलेयः स भवतु भविनां भूतये वद्र्धमानः,
ज्ञानाभःसागराम्भः सकलसुखकरः श्रीजिनो वद्र्धमानः ॥१७

पू.मु.श्री रामचन्द्रगणिविरचितम्

## ५५. ॥ श्रीनेमिस्तुतिपदसमस्यास्तोत्रम् ॥

(स्रग्धरा)

स्वस्तिश्रीकीर्त्तिकान्तिप्रगुणगुणचयोच्चुम्बिचिद्धर्मकर्म-
प्रारम्भोत्कर्षहर्षाऽधिगतजिनमतप्राप्ततत्त्वप्रतिष्ठाः ।
इष्टाऽनुष्ठानशिष्टव्रतशतपरिचर्याऽर्य ! शं नो ददातु,
**श्रीनेमिः पञ्चरूपत्रिदशपतिकृतप्राज्यजन्माभिषेकः** ॥ १

सिद्धिस्त्रीदक्षवक्षोप्रविलुठदशठस्पष्टसुष्ठुद्विबाहु-
र्व्याहूतक्षान्ति-शान्तिस्त्रिदशपतिनतांह्रिद्वयश्चिन्मयो नः ।
मोक्षाऽक्षामक्षमोच्चैः पदमुदयदयं प्रादिशत्वेष नेमि-
**श्चञ्चत्पञ्चाक्षमत्तद्विरदमदभिदापञ्चवक्त्रोपमानः** ॥ २

ऐश्वर्यस्वैर्यपर्या यतिकलितकला कोटिराटीकतेऽस्मिन्,
विश्वे शस्वद् विपश्चिद् वरगुरुवदना ऽ । ऽ सा यदीया ।
अस्माकं विस्मयाऽर्हं वितरतु चतुरं चिच्च राजीमतीशो,
**निर्मुक्तः पञ्चदेह्याः परमसुखमयः प्रास्तकर्मप्रपञ्चः** ॥ ३

आरूढः प्रोढधर्मद्विरदमपगतत्राशपाशप्रयाशः (सः)
क्रोधान्धध्वान्ततान्तिप्रमथनदिनकृद्दीप्रदीप्तिप्रतापः ।

निन्द्यं भिन्दस्तमोन्तःप्रसृतमपि नृणां शङ्खलक्ष्मा जिनेन्द्रः
**कल्याणं पञ्चमीसत्तपसि वितनुतां पञ्चमज्ञानवान् वः** ॥४

सद्वंशप्रांशुशुम्भत्सदुदयसुरवर्त्मोहुतप्रोज्झितांऽहो,
रंहो राहुप्रसङ्गोऽक्षरदतुलयशोराशिशोभाभिरामः ।
अक्षीणक्षान्तिज्योत्स्नाधवलितभुवनो ज्ञानकामैकबन्धुः,
**सम्प्रीणन् सच्चकोरान् शिवतिलकसमः**
**कौशिकानन्दमूर्तिः** ॥ ५

हिंसावैयुक्तयोषिद्हृदयकुवलयाऽऽतापदो व्यापदोघम्,
प्राश्यन् सन् सम्मुखीनः शमरसशशभृद्वाक्सुधाधारिवक्त्रः ।
सच्चेतःकैरवालीवलयविकसनोद्दामधामा सुभाढ्यः,
**पुण्याब्धिप्रीतिदायी सितरुचिरिव यः**
**स्वीयगोभिस्तमांसि** ॥ ६

जीवाहिंसाप्रशंसाशुचिपथगतिभृद्रोहिणीप्राणनाथः,
कारुण्यानन्ददायी प्रवरबुधसुतो वन्द्यलोकावतारः ।
कैवल्योल्लासि-लीला-जलनिधितनयाबान्धवोऽमित्रमित्रं,
**सान्द्राणि ध्वंसमानः सकलकुवलयोल्लासमुच्चैश्चकार** ॥७

दुष्कर्मध्वंसतारानिकरपरिवृतोऽत्यन्तचन्द्रत्वमैतः,
संसारसारपाटच्चरपटुगतिह(र?)न् मोदयन्नङ्गभाजः ।
सद्वक्त्रकेन्द्रसंस्थः किमपि तनुभृतां ध्वन्सयन् निःस्वयोगं,
**ज्ञानं पुष्याज्जिनौघः स तपसि भविनां**
**पञ्चमीवासरस्य** ॥ (च.क.) ८

मोहद्रोहप्ररोहप्रलयविधिपराऽपारसंसारमाला-
हालाहेलानुसङ्गप्रदलनकुशलं दुर्ल्लभं दुष्कृतीभिः ।
आस्वाद्याऽवद्यमाद्यद्गिरिगरिम-रणद्वज्रसङ्घातपातं,
**पीत्वा नानाभिधार्थामृतरसमसमं यान्ति यास्यन्ति जग्मुः**॥९

जीवाजीवादितत्त्वव्यतिकरबहुलान्तर्द्विषद्वर्गचञ्चत्,
सम्पर्कोदर्कदावप्रचयसुदहनाऽनल्पदावाग्निकल्पात् ।
सम्यक्त्वानन्दिचक्षुःक्षपितखलतमस्तोमसोमानुकारा-
**जीवा यस्मादनेके विधिवदऽमरतां प्राज्यनिर्वाणपुर्याम्** ॥१०

आदेय-ध्येय-पेय-प्रचुरतरवरोदारसम्बन्धवीचि-
व्याकीर्णं जीर्णनिम्नं किमपि शुचितरं प्रोल्लसन्तं च सन्तम् ।
नाना षष्टाऽष्टमादिप्रगुणतरतपोजातिसोपानमार्गं,
**यात्वा देवाधिदेवाऽऽगमद-शमसुधाकुण्डमानन्दहेतुः** ॥११

श्रीमच्छ्रीवीतरागाऽमलचलनसरोजद्वयाशक्तचेतो-
वृत्तीनां सन्मतीनां मुनिवरनिवहैरादृतेऽर्हन्मुखोत्थे ।
गच्छाऽतुच्छाधिनाथैरधिगतमतुलं सन्मतं सत्कृतान्तं,
**तत्पञ्चम्यास्तपस्युद्यतविशदधियां भाविनामस्तु नित्यम्** ॥१२

(च.क.)

ओमर्हं श्रीमती श्रीजिनगुणकलितं मन्त्रराजं स्मरन्ती,
देवी देवासुरालीसुविनतपदनालीकयुग्माऽम्बिकाख्या ।
प्राज्यां राज्यश्रियं नो दिशतु शिवतरां धुर्यसाम्राज्यकाम्यां,
**स्वर्णालङ्कारवल्गन्मणिकिरणगण-**
**ध्वस्तनित्यान्धकारम्** ॥ १३

उग्रोग्रोद्घाटिताऽस्त्रप्रसृमरभयदार्च्चिः शिखाभिश्च दुष्टान्,
साक्रोसं संशयन्ती बहुदनुजगणान्खड्गमुद्दिम्यसम्यक् ।
श्रीसङ्घस्याऽनघस्य क्षपयतु दुरितं देवता सा सुनाशा,
**हुङ्काररारावदूरीकृतसुकृतिजनव्रातविघ्नप्रचारा** ॥ १४

चन्द्रांशुशंशुदन्तद्युतिमिलितमुखाऽभिख्यया ख्यातशोभा,
भासाऽऽशा भासयन्ती दश निजवपुषोऽनङ्गरामा प्रियस्य ।
आर्यं साहाय्य शौर्यं रचयतु भवतां जैनधर्मे सुलभ्ये,
**देवी श्री अम्बिकाख्या जिनवरचरणा-**
**म्भोजभृङ्गीसमाना** ॥ १५

आर्हद्धर्माऽर्हभावोद्भवगलदखिलांऽहस्समूहासमूह-
व्याश्लेषाऽऽश्लिष्टचेता विदलित सुकृतोत्तर्ज्जिजगर्ज्जत्परेता ।
दोषा दोषानसङ्ख्यान्प्रमुदितवदना भापयन्ती च यान्ती,
**पञ्चम्यहृन्यस्तपोऽर्थं वितरतु कुशलं धीमतां सावधाना** ॥१६
(च.क.)

इत्थं शैवेयतीर्थाधिपतिरतिलसच्चिच्चमत्कारधारा-
पारावारोपमोऽसावुदधिगतसदानन्दनलक्ष्मीसनाथः ।
प्राज्ञश्रीमुक्तिचन्द्रोत्तमपटसरसीजन्मभृङ्गानुरूपाः
श्रीमच्छ्रीभीमचन्द्रा इति बुधसुभगा भूरि सौन्दर्यवर्याः ॥ १७

तत्छिष्येण प्रशस्तस्तवपथगतिना रामचन्द्रेण नाम्ना,
सप्त-त्र्यत्यष्टिवर्षे सितहरिदिवसे फाल्गुने मासि शुक्रे ।
पद्यैः प्रोद्यत्स्फुटार्थैं [रनघ] समधुरैस्सत्समस्याभिधानै-
रानीतः स्तोत्रवर्त्माऽनुदिवसमतुलश्रेयसे स्तात् सदा वः ॥१८

(पाठान्तरम्)

इत्थं तीर्थपतिर्नतामलयती राजीमतीवल्लभः,
सुरिश्रीविजयप्रभोत्करचिदानन्दप्रदानोचितः ।
अंहोव्यूह-हृति-प्रवीण-विलसच्छ्रीमुक्तिचन्द्रोज्वल-
श्लोको दुष्कृतवैरि-धर्मसुहृदोऽसद् भीमचन्द्रः स्फुटः ॥ १७
(शार्दूल.)

पृथ्वी भृत्त्रिमुनीन्दुसंमित समुत् संवत्सरे फाल्गुने,
मासे कृष्णसदिष्टकृष्णदिवसे शुक्रेश्चिते पावने ।
आनीतः स्तुतिमार्गमुद्भुतवचः पद्यैः समस्याभिधैस्-
स्ताद् वः सन्ततशमर्णे बहुमुदा चन्द्रेण रामादिना ॥(शा.वि.)१८

## અરિહંત પરમાત્માના સ્તોત્રપાઠનું મહત્વ શું ?

અનાદિ કાળથી આપણા આત્માએ અજ્ઞાનતાદિના કારણે જે જે પ્રવૃત્તિઓ મન-વચન-કાયાથી કરી તેના કારણે આત્માના અસંખ્ય પ્રદેશ પર આઠ કર્મોની અનંતી અનંતી કાર્મણવર્ગણા અડ્ડો જમાવીને બેઠી છે જેના કારણે જીવ દુઃખપૂર્વક સંસારમાં ભટકી રહ્યો છે. દુઃખી થઈ રહ્યો છે. આત્માની પરેશાનીનું મૂળ કર્મ બંધ છે. એવું ગુરુગમથી જાણ્યું, અનુભવ્યું. હવે ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત થવાનો ઉપાય શું ? રત્નત્રયીની આરાધના તેમાં જ્ઞાન અને ચારિત્રને સમ્યગ્ બનાવનાર સમ્યગ્દર્શન છે. જેની પ્રાપ્તિ દર્શન મોહનીયાદિ સ્વરૂપ પ્રધાનકર્મના ક્ષય આદિથી થાય અને તે અરિહંત પરમાત્માની સ્તોત્ર ભક્તિ દ્વારા થાય છે.

પ્રતિક્રમણ હેતુપ્રકાશ ગ્રંથમાં પ્રશ્ન છે. 'લોગસ્સ'નો કાઉસ્સગ્ગ વારંવાર કેમ ? તેના ઉત્તરમાં જણાવ્યું.

**अरिहंतपरमात्मस्मरण-प्रधानकर्मक्षयकारणत्वात्** – અરિહન્ત પરમાત્માનું સ્મરણ પ્રધાન કર્મક્ષયનું કારણ છે. તેથી પૂર્વના મહાપુરુષોએ પોતાના હૈયામાં પ્રભુ પ્રત્યે જાગેલા બહુમાનભાવના કારણે હૃદયમાં પ્રગટેલી સ્ફુરણાઓને અક્ષર દેહ આપી પોતાના આત્માને કર્મમુક્ત બનાવવાનો પુરુષાર્થ કર્યો છે. તો આપણે પણ તેઓની કૃતિના આલંબને આપણા આત્મામાં સમ્યગ્દર્શન પ્રાપ્ત કરી જ્ઞાનપૂર્વકના ચારિત્ર દ્વારા કર્મક્ષય સાધી આત્માને ભવમુક્ત, દુઃખમુક્ત, કર્મમુક્ત બનાવવા દ્વારા આત્માનું સામ્રાજ્ય પ્રાપ્ત કરીએ.

# परिशिष्ट

## સ્તોત્રસંદેશમાલાના ૨૦ ભાગમાં આવેલા છંદોની યાદી

अचलधृति
अतिधृति
अतिशर्करी
अतिशायिनी
अतिरुचिरा
अनङ्गशेखर
अनुष्टुप्
अपरनाराचक
अपरललितक
अपरवक्र
अपराजिता
अपरान्तिका
अभिमुखी
अवितथ
अशोकपुष्पमञ्जरी
अष्टि
असम्बाधा
आख्यानकी
आपातलिका
आर्या

आर्यागीति
आलिंगनक

इन्द्रवंशा
इन्द्रवज्रा

उज्जवल
उत्कलिका
उदयम्
उद्गता
उद्धत
उपचित्रा
उपजाति
उपेन्द्रवज्रा
उर्वशी

ऋषभ
ऋषभगजविलसित

एकावली
औपच्छन्दसका-
परान्तिका

औपच्छन्दसिक

कन्या
कामक्रीडा
कामबाण
किसलयमाला
कुटज
कुटील
कुसुमलता
कुसुमविचित्रा
कुसुमितलता
कुसुमितलतावेल्लिता
केकीरव
केसर
क्रीडनक

क्षिप्तक

खिज्जित

गाहा
गीतपद्धति
गीति
गुणमणिनीकर

चन्दनप्रकृति
चन्द्रवर्त्म
चन्द्रलेखा
चन्द्रिणी
चपलम्
चम्पकमाला
चलधृति
चलम्
चित्रमाला
चित्रलेखा
चित्राक्षरा
चूडामणि

छाया

जगती
जया
जयानन्द
जलधरमाला
जलोद्धतगति

तामरस
तोटक
त्रिभङ्गी

दण्डक
(अर्णवदण्डक
उद्दामदण्डक
गगनदण्डक
चण्डवृष्टिदण्डक
प्रयातदण्डक
महादण्डक
सुरामदण्डक)
दयाविमल
दीपक
दोधक
दोहा
द्रुतविलम्बित
द्विपदी

धृति

नगस्वरूपिणी
नन्दितक
नन्दिनी
नर्कुटक
नवमालिनी
नाराचक
नारी
निशा

पङ्क्ति
पञ्चकावली
पञ्चचामर
पत्रपतितं
पथ्या
पथ्यावक्त्र
पद्म
पद्धतिका
पादाकुलक

पुष्पदाम
पुष्पिताग्रा
पृथ्वी
प्रकृति
प्रमिताक्षरा
प्रभावती
प्रबोधिता
प्रमाणिका
प्रमुदितवदना
प्रियंवदा
प्रहरणकलिका
प्रहर्षिणी

बृहती

भद्रक
भद्रिका
भाराक्रान्ता
भासुरक
भुजगशशभृता
भुजङ्गपरिरिङ्गितक
भुजङ्गविजृम्भित
भुजङ्गप्रयात

भ्रमरविलसिता

मञ्जुभाषिणी
मणिगुणनिकर
मणिमध्य
मत्तक्रीडा
मत्तमयुर
मत्ता
मत्तेभविक्रीडित
मदनावतार
मदिरा
मधुनामा
मधुमती
मन्दाक्रान्ता
ममातिशायिनी
महास्त्रग्धरा
मागधिका
माणवक
मालभारिणी
मालाचित्र
मालिनी
मुखमोटनक
मेघमाला
मेघविस्फूर्जिता
मोटनक
मौक्तिकदाम
मौक्तिकमाला
मृगचपला
मृगी
मृदका
मृदङ्गक

युगलम्
युग्मविपुला

रत्नमाला
रथोद्धता
रमणा
रासकनन्दितक
रासकलुब्धक
रुक्मवती
रुचिता
रुचिरा

लक्ष्मी
ललितक

| | | |
|---|---|---|
| ललिता | | सुधा |
| | श्री | सुधाकळश |
| वंशपत्रप्रतितं | श्लोको | सुन्दरम् |
| वंशस्थ | शङ्ख | सुप्रभा |
| वक्त्र | शरभललित | सुभद्रामालिनी |
| वनमञ्जरी | शर्करी | सुमति |
| वसन्तचामर | शशिलेखा | सुमुख |
| वसन्ततिलका | शशिवदना | सुवदना |
| वस्तु | शशीकला | सोपानक |
| वस्तुवदन | शार्दूलविक्रीडित | सोमराजी |
| वाणिनी | शालिनी | सौभाग्यविमल |
| वानवासिका | शिखरिणी | स्रग्धरा |
| विद्युद्विलसित | शुद्धविराट् | स्रग्विणी |
| विद्युन्माला | शोभा | स्त्री |
| विभावरी | श्येनी | स्वागता |
| विभ्रमगति | | |
| वियोगनी | | हंसमाला |
| विषम | | |
| वेगवती | संगतक | हंसलयं |
| वेष्टक | सान्द्रपदं | हंसी |
| वैतालीय | सिंहोद्धता | हक्काषट्पदी |
| वैश्वदेवी | सिद्धि | हरिगीत |
| वृन्दारक | सुदन्त | हरिणी |

# स्तोत्रसंदेशमाला


१ अर्हदादिसहस्रनामसमुच्चयः
२ अनेककर्तृकृतचतुर्विंशतय
३ बहुकर्तृकृतानेकस्तोत्रसमुच्चयः
४ श्रीपञ्चजिनेश्वर-गणधराणां स्तोत्राणि
५ कल्याणक-छायापूर्तिस्तोत्राणि
६ चतुर्विंशतिजिनस्तोत्राणि
७ श्रीआदिनाथजिनस्तोत्राणि
८ श्रीनेमिनाथजिनस्तोत्राणि
९ श्रीपार्श्वनाथजिनस्तोत्राणि -१
१० श्रीपार्श्वनाथजिनस्तोत्राणि -२
११ श्रीपार्श्वनाथजिनस्तोत्राणि -३
१२ श्रीमहावीरस्वामिजिनस्तोत्राणि
१३ शेषतीर्थंकरजिनस्तोत्राणि
१४ सामान्यजिनस्तोत्राणि
१५ पञ्चपरमेष्ठिसिध्दचक्राणां स्तोत्राणि
१६ शाश्वताशाश्वततीर्थानां स्तोत्राणि
१७ सम्यग्दृष्टिदेव-देवीनां स्तोत्राणि
१८ पू.आचार्यादियोग्यमन्त्रस्तोत्राणि
१९ स्तुतयः १
२० स्तुतयः २